देवनातिव्याप्तिरिति बोध्यम् तन्निष्ठविधेयतानिरूपिततन्निरूपितवृत्तित्व्यधिकरणं तन्निरूपितावयवित्वव्यधिकरणं चयदुद्देश्य — त्वेन तदवच्छेदकाक्रो
नत्वं स्यान्निनिष्ठोद्देश्यतायानि वृत्तिसामानाधिकरण्यमागमिनिष्ठायास्तस्या अवयविसामानाधिकरण्याच्च स्यान्यागमिनो नातिव्याप्तिः अवधित्वनिवे

स्वप्रकृत्यर्थत्वञ्च धातुपाठकोशादौ नमुच्चार्य बाधितत्वम् अतएव नभवधाद्यादेशानां न सञ्ज्ञा तेषां स्यान्यर्थेनैवार्थवत्त्वं न तु स्वार्थो

स्ति· अतएव कोशादौ तदर्थाकथनम्·॥ (( अतएते नवैत्त्वादावकारस्यलृप्तशक्तिकत्वेन युक्तो विकाररूपस्वार्थप्रत्यायकत्वाभावेपि प्रकृत्यर्थ
प्रत्यायकत्वात् प्रत्ययत्वं दुर्वारमित्यपास्तम् श्रमस्तु शिक्करणान्तु लोह इति निर्देशाद्धिकरणानां द्योतकतया स्वार्थप्रत्यायकत्वाद्धप्रत्ययत्वं शवादीनां
तु प्रकृत्यर्थप्रत्यायकत्वात् द्योतकतया स्वार्थप्रत्यायकत्वाद्धातत्वम्॥ ॐ ॥ ननुपदार्थे वाच्ये द्योत्ये वा विधानं तत्त्वं स्वार्थत्वमिति वन्तु स्वप्रकृत्यर्थत्वं चवदुर्व
चं तदर्थे तासामभिधानात् तत आह स्वप्रकृत्यर्थत्वं चेति· कोशादौ त्यादिना निरुक्तनिर्घंटसंग्रहः ननु प्रत्यायकत्वमित्येवास्तु मास्तु तं त्वादिः स्वशब्दोपादानं चे
त्यत आह अतएव नभेति· स्वशब्दार्थों तर्भावेन प्रत्ययशब्दे वृत्तिस्वीकारादेवेत्यर्थः। अतएवेति। स्वार्थावगमादेव नभ्यशब्दादपि नाभिशब्दप्रकारकबोधो राम:

र्थकानामपि सञ्ज्ञां वारयति· अतएवेति·। अन्वर्थसञ्ज्ञाविज्ञानादेवेत्यर्थः। नभवधाद्यादेशानामिति·। नाभि नभञ्चाहनश्च वधः। आदिना विरागो विरङ्· १६५
श्चेत्यस्य परिग्रहः। स्यान्यर्थेनैवेति·। स्यान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति सिद्धान्तात्· एवकारव्यवच्छेद्यमाह· नत्विति स्वः। स्वीयः। ननु स्वार्थत्वाभावेपि उक्ता

मे॰ तदर्थेति॰ तेषाम्पृथगर्थेत्यर्थः। अत एव नम्पशब्दान्नाभिहित इत्येव वोधो नतु नभहित इति। नचैतावतात्युक्तप्रकृत्यर्थत्वव्याहतिः कथमिति वाच्यम्॰ तत्र प्रकृति
शब्दस्य प्रत्ययविधानावधिपरतया यस्माद्यस्य विधानं तत्प्रयोज्यविषयताविल्लक्षणविषयत्वात्प्रयोजकत्वस्य साधारणधर्मस्य तत्राभावेन न प्रकृत्यर्थार्थकत्वस्यच्य

भ॰ ननु कदाचिदपि नभिहित इतीयपि शास्त्रानभिज्ञास्तेपि वृद्धव्यवहारात्तथैव प्रतिपादयंति उक्तार्थे भाष्यं प्रमाणयति॰ एतदर्थमेवेति॰ स्यान्यर्थे प्रत्यायकत्व
मादेशः प्रत्ययत्वव्यावृत्त्यर्थमेवेत्यर्थः इति विग्रहे इत्यर्थः स्वमर्थं प्रत्याययतीति विग्रहे इत्यर्थः स्वीयपदेत्यत्रापि स्वीयार्थस्वपदेत्यर्थो वोध्यः यथाश्रुतं तु न युक्तं
भाष्येनादृशपाठस्यानुपलंभात्॰ एवमुक्तिस्तु तन्त्रत्यपदःस्यात्मीयार्थकत्वं ध्वनयितुं आत्मावाचकेत्यर्थे नाभेदो वाधितःस्यात् एतेन तदर्थमेव प्रकृत्यर्थसं

एतदर्थमेव भाष्ये स्वीयमर्थं प्रत्याययन्तीति विग्रहे स्वीयपदोपादानम् भाष्यप्रामाण्याच्च तदर्थान्तर्भावेण प्रत्ययशब्दस्य वृत्तिः। यत्तु
विकारागमादेशानां देशांशे निराकांक्षत्वात्परश्चेत्यस्यानुपस्थितौ तत्सन्नियोगशिष्टप्रत्ययसञ्ज्ञाया अप्रवृत्तिरिति तन्न॰ प्रमकज्वृहग्रप

ग्रहार्थमेव स्वीयपदोपादानमिति॰ अन्यथा स्वशब्दमेवोपाददीत स्वीयपदे उपात्ते त्वात्मीयवाचकः स्वशब्दप्रकृतिकछप्रत्ययान्तादात्मीयप्रकृतिसंवंध्यर्थे
संग्रह॰ आत्मवाचिप्रकृतिकादात्मसंवंधिस्वार्थसंग्रहो जायत इति व्याख्यानमित्यपास्तम्॰ कर्मसाधनोपि प्रत्ययशब्दोऽस्तीत्यग्निमभाष्यानुस्थितिप्रसंगा
त तदर्थान्तर्भावेणेति स्वशब्दार्थान्तर्भावेणेत्यर्थः रायर्थान्तर्भावेणेत्यर्थ इत्यन्ये। यत्तु विकारेति विकार एकदेशस्थानिको हन्तृचेत्यर्थः आदेशः सर्वस्थानिको

वहार इति भावः। ह्मादेशानामपि त्रिनिष्ठनिरुक्तप्रत्ययत्वाश्रयादेशतयाख्यानिवद्भावेन प्रत्ययत्वं सुलभम्॰ अत्रार्थे भाष्यसम्मतिमाह॰ एतदर्थेति॰ ननु विग्रहवा
क्यादेतादृशार्थप्रतीतावपि प्रत्ययपदात्कथं तदर्थप्रतीतिरत आह॰ भाष्यप्रामाण्यादिति। प्राचामुक्तिं दू॰ खण्डयति॰ यत्त्विति॰ अप्रवृत्त्यापत्तेरिति॰ एकदेशकांक्षा

श·शे· भै· ननुतृणह इतिनिर्देशादकधः कप्रत्ययबाधकतया बहुचा श्चेतःसप्रष्ठतेर्वह्वकजर्थमितिभाष्यात्प्रत्ययत्वत्तानम्भविष्यतीत्यतआह· किन्त्वेति· विशेषविहितत्वंनि
टी·भ· रवकाशत्वेसत्येवबाधप्रयोजकमित्यतआह· परत्वादिति· नचलादेशप्राप्तियोग्यविषयेसीयुटश्चारितार्थ्याभावेनपरत्वात्सीयुडित्यसङ्गतमितिवाच्यम्। लादेश
टी·भै· पदस्यलादेशसामान्यबोधकत्वेपिलविधीयेलन्तलादेशस्येटएवप्रवृत्त्यातद्प्राप्तियोग्येसीयुटश्चारितार्थ्यस्यासिद्धमेवेत्याशयात्। यद्यपिलादेशानाम्प्रत्ययत्वंस्था
१६६

भ· ननुतृणह इतिनिर्देशात्तनयासयोरिनिज्ञापकाच्च श्रमकचोनदोषः बहुचितुप्रत्ययत्वाभावेपिनक्षतिरित्यरुचेराह किंचलवीति· पाठकोकारुविस्तुचिन्त्या
नभशब्देपिप्रत्ययत्वापत्तेः विशेषविहितत्वस्यानवकाशत्वेसत्येवबाधकत्वप्रयोजकत्वात्सीयुटश्चलादेशप्रवृत्त्युत्तरंचारितार्थ्यमतआहपरत्वादितिउक्त

किन्त्वलविधीयेत्यत्रविशेषविहितत्वात्परत्वाच्च पूर्वंसीयुटितितोलादेशेप्रत्ययसञ्ज्ञासन्नियोगेनेटोविधीयमानमाद्युदात्तत्वंसीयुटएव
स्यादतआगमानुदात्तत्वंवक्तव्यमित्याद्युदात्तश्चेतिसूत्रस्थभाष्यकैयटासङ्गतिः लस्थानिकत्वेनदर्शांशनिराकांक्षत्वेनपरश्चेत्यस्याप्रव
त्तौप्रत्ययत्वस्याप्यप्रवृत्तौतत्सन्नियोगकथनासङ्गतेरितिदिक्॥ १. एत्वादित्यर्थः ब्राह्मणाः भोज्यंतांमाठरकौण्डिन्यौपरिविविषातामितिन्या
येनलादेशप्राप्तियोग्यविषयाभावरूपानवकाशत्वस्यसीयुठिसत्वेनापवादत्वादितियावत्। यासुटविषयेसीयुटः प्रतिषेधेनलिङ्सम्बधिनामुक्तन्याय
नवाध्यबाधकभावोनेतिआख्यातेवक्ष्यमाणत्वात् तक्रकौण्डिन्यन्यायस्यतुनात्राश्रयणंतदाश्रयणेहितक्रदानोत्तरंदधिदानस्येवसीयुठिलादेशप्रवृत्ति

निवद्धत्वेनसिद्धन्तथाप्यधिकृतस्यप्रत्ययइत्यस्यतत्रासम्बन्धेमानाभावइत्याशयः। अथवापरत्वादित्यस्याद्युदात्तश्चेतिसूत्रोपन्यासयापरत्वादित्यर्थः लादेश गम·
निमित्ताद्युदात्तत्वस्यापवादत्वादिरवकाशः शयिष्टेत्यादौलसार्वधातुकानुदात्तत्वात्सीयुट्सावकाशः। प्रकृतेचोभयप्रसङ्गेपरत्वात्सीयुडित्यर्थः। लावस्थाया १६६
न्तुनस्वरस्तस्यानकत्वात्। नचपूर्वंसीयुटिअनिर्दिश्यमानत्वान्नसमुदायस्याव्यवहितत्वान्ननिर्दिश्यमानस्येत्यादेशाप्रवृत्तिरवस्थादितिवाच्यम्· धातोरि
त्यस्यविहितविशेषणत्वाङ्गीकारेणाव्यवहितेपिप्रवृत्तेः॥

भि॰ ननुप्रत्ययशब्दस्य शुद्धाधिकारत्वेस्वरूपमितिशास्त्रवलेनाग्रिमसूत्रैः प्रत्ययशब्दस्यापिविधानापत्तिरतआह सञ्ज्ञाधिकार इति॰ एवञ्चाशब्दसं
ज्ञेतिनिषेधान्नस्वरूपमित्यस्योपस्थितिरितिभावः। ननुपूर्वोच्चारितशब्देनसञ्ज्ञानिर्देशात्कथंसञ्ज्ञात्वावगतिरित्यतआह सञ्ज्ञात्वावगम इति॰ व्याख्या
नादिति॰ उत्तरसूत्रेषुप्रथमान्तप्रत्ययपदोपस्थितौविधेयसामानाधिकरण्येननिर्देशात्सञ्ज्ञात्वावगममूलकात् विकारावगमेषुसञ्ज्ञात्वप्रसङ्गं वा

भ॰ ननुस्वप्रत्ययंतरादिष्ववयवानांसर्वथानिरर्थकत्वात्कथंसाजात्येननियमस्यार्थवत्समुदायविषयकत्वमपीत्यतआह अस्येति अन्वाख्या
नेसमूहस्येतिशेषः॥ विकारेतित्रपुजतुनोः षुक् हनस्तचेत्यादीनांवहुवचनमवयववहुत्वाभिप्रायंनसंज्ञेनितत्सत्वेदूषणंप्रकृतभाष्यतोवसेय
म महासंज्ञयेति। प्रत्याययतिप्रत्याय्यतेवाऽनिरापर्थात् भावेणकर्तृकर्मसाधनप्रत्ययशब्दयोः प्रकृतसूत्रभाष्योक्ततंत्रेणचेतिशेषः तत्रकर्तृ

अधिकारोयमिति सञ्ज्ञाधिकार इत्यर्थः सञ्ज्ञात्वावगमस्तुव्याख्यानात् विकारागमानान्तुनसञ्ज्ञाप्रत्यय इतिमहासञ्ज्ञया
साधनेनस्वार्थप्रत्यायकसंग्रहः कर्मसाधनेतुप्रत्याय्यतेप्रकृत्यावोध्यतेइति १ स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैवतत्सञ्ज्ञकत्वात्॰॥
प्रत्ययस्ययद्यपिस्वार्थिकेषुप्रकृत्यानतदर्थः प्रत्याय्यतेनसएवतथापिशब्दार्थयोस्तादात्म्यात् प्रकृत्याप्रत्याय्यमानार्थकत्वादेवमुच्यतेइतितद्भाष्याशयंकेयट्केचेनेद
तन्मनसिनिधायाह प्रकृतीति। प्रकृतित्वंचात्रपरश्चेत्यत्रवक्ष्यमाणंन ग्राह्यंइदानींप्रत्ययत्वस्यानिर्णीतत्वेनवधा देशरूपप्रत्ययविध्युदेश्यतायाःस्यानितिहं
स्यादौसत्वेननद्वोधकानांवधादीनामपिसंज्ञापत्तेरन्योन्याश्रयापत्तेश्चकिंचयस्यप्रत्ययत्वमानेयंतदवधित्वंप्रकृत्यर्थप्रत्यायकानांनभादिवत् स्वार्थप्रत्याये

रयति विकारागमानान्विति॰ वहुवचनमत्रविकारागमानांवहुत्वात्तदभिप्रायेण। महासञ्ज्ञयेति॰ एतद्वलादेवण्यर्थान्तर्भावस्वभः। स्वस्वप्रकृत्य
न्यतरार्थेति॰। स्वार्थप्रत्यायकत्वंधातोरितिसूत्रविहितसनिस्पष्टम्॰ स्वप्रकृत्यर्थप्रत्यायकत्वंस्वार्थिकेऽन्यत्रस्वार्थिकेचप्रसिद्धम्। अत्रापिस्वार्थि
कस्यप्रकृत्यर्थद्योतकत्वमन्यत्रस्वार्थिकस्यतुद्योतकत्वाभावेपिप्रकृतिप्रयोज्यविषयताविलक्षणविषयत्वाप्रयोजकत्वरूपस्यप्रकृतिसाधार

श्री·शे· भै· अपादानत्वासम्भवादिति· गुपादिभ्यः प्रत्ययस्य विश्लेषाभावात्।तत्र· तस्यां सत्याम्।अस्यैतदुपपत्तेरितिशेषः।ननुगापोष्टगित्यत्र पञ्चम्यनिर्देशाद्देशत्वाप

टी·भै· त्तिरत आह·गापोष्टेति· अस्यप्रत्ययाधिकारेपाठेनप्रत्ययत्वज्ञानेषष्ठीस्थानेयोगेतिसूत्रस्याप्रवृत्तिकल्पनेषष्ठ्यर्थाकाङ्क्षायांसत्यामनन्तरपदाध्याहारेणतन्निरूपितस

टी·भ· म्बन्धार्थकत्वमस्यादितिभावः।सचसम्बन्धः स्वाधारदेशसम्बन्धिदेशाधिकरणकसम्भावितकर्तृत्वरूपः।व्यवधानेनपरत्वापत्तिंवारयति।अत्रेति।अत्र· तत्तत्प्रत्य

१९७ भ· वार्थस्यैकत्वेनतत्रन्यायाप्रवृत्तौविकारादिष्वपि प्रवृत्तौ श्नमादिष्वतिव्याप्तिरितिवाच्यंउभयस्यदुर्लभत्वादिति एतेनतत्व्याख्यावसरेउद्योतेयदुक्तंनहिप
रत्वनिमित्तेनदृमाव्यत्यर्थः तथाहिव्यापकाभावेनव्याप्यत्वाभावंसिध्येदितिभावः अपितुप्रत्ययसंज्ञानिमित्तंपरत्वमितितच्चिन्त्यंराजपुरुषइत्यादौप्रत्ययत्वाभा
वेपिपुरुषशब्दपरत्वदर्शनात्।यत्त्विति· न्यायानित्यत्वेनश्नमादीनांप्रवर्ततएवसंज्ञाचतद्पाप्तंचिन्त्यंच तद्व्याख्याशयस्तुफलाभावान्नप्रत्ययत्वमित्येवआद्यु

परश्च·गुप्तिज्किद्भ्यइत्यादावपादानत्वासम्भवाद्दिग्योगलक्षणापञ्चमी तत्रपरः पूर्वोवेत्यनियमेनाध्याहारेप्रसक्तेपरएवेतिनि
यमार्थमिदम्·गापोष्टगित्यादावपिषष्ठ्यर्थआनन्तर्य्येपूर्वपरसाधारणमित्यनियमोस्त्येव·अत्रतस्मादितिपरिभाषोत्तराङ्·विकला
प्रवर्तन्ते इत्यव्यवहिताएवप्रत्ययाः॥ ॥ ११ दाजत्वेचपरत्वसंनियोगशिष्टं———— अतएवपरश्चेत्यस्याग्रेआद्युदात्तश्चेति
सूत्रितंवाचनिकंवागमाउदात्तत्वमित्यादिकैयटेस्पष्टं।यत्रच श्नमादौफलमस्तिभवत्येवतत्रप्रत्ययत्वमित्यादिनादिगर्थस्तुप्रदीपतोवगन्तव्यं इत्यलंबहुवेनि।
व्याचक्षतेतराम्॥ ॐ ॥ परश्चेतिअपादानत्वासंभवेतिगुपादिभ्यः सनादिर्भवतीत्यर्थेनापातीत्यर्थोगुविनतज्जन्यविभागानाश्रयणत्वादितिभावःषष्ठ्यर्था
नंतर्यमितिवोद्धैकदेशेप्याधारकस्थित्याश्रयत्वरूपषष्ठ्यर्थसंबंधनिरूपकाध्याहृतानंतरादिपदवोधानंतर्यमित्यर्थः॥ ॥ ॥ ॥

यविधायकयोगे।नचयत्रतस्मादितिपरिभाषोपस्थितिस्तत्राव्यवधानलाभेपिगापोष्टगित्यादावव्यवधानलाभः कथमितिवाच्यम्।अत्रापिधातोरित्य· १९७
स्यानुवृत्त्यागापोरनन्तरोधातोरव्यवहितइत्यर्थकल्पनेनादोषात् उत्तराङ्गेति।उत्तरस्येत्यंशेत्यर्थः

भै॰

षष्ठ्यंशेति। तदर्थस्यासम्भवात्। तस्मादिति सूत्रोपस्थितौ सुपि च बहुवचने झल्येदिति सप्तमीनिर्देश एव प्रमाणम्। यदि पूर्वशब्दाध्याहारेण प्रत्ययः पूर्वः स्यात्तदा सप्तमीनि
र्देशोऽनुपपन्न एव स्यात् ननु विभाषा सुप इति सूत्रे पुरस्ताद्ग्रहणे न बहुजेव पूर्वो नान्य इति नियमेनान्यः प्रत्ययः पूर्वो न भविष्यति। न च यत्र षष्ठीनिर्देशो गापोष्टगिति

भ॰ अव्यवहिता एवेति गापोष्टगित्यत्रानंतर्यस्य षष्ठ्यर्थकत्वे सिद्धे ङ्क्तेशेनार्थान्तरकरणं पाठकस्य मुग्धैवेति भाति षष्ठ्यंशेति अत्र च सुपि चेत्यादिनिर्दे
शात्तात्पर्यग्राहका इति भट्टव्याख्यानेन तथा च प्रथमां स्वीकृत्य प्रत्ययैः सामानाधिकरण्यमिति भवत्येव नियमेति अयं भावः विधिर्हि विधः नित्यो वैकल्पि
न्वेवं षष्ठ्यंशविकल्पं संपूर्णं सूत्रमुपतिष्ठतां किं परश्चेत्यनेनेति वाच्यम् प्रकृत्यर्थमात्रविवक्षायां केवलप्रकृतेः पचपदित्यादेः प्रयोगो माभू
दिति प्रत्ययः परो भवत्येवेति नियमार्थत्वात्तेन न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय इति सिद्धम् अनुकरणे तु अभेदविवक्षयाऽ
र्थवत्वाभावात्प्रातिपदिकत्वाभावेन प्रकृतित्वाभावात् गविन्त्यथमाहेत्यादौ नानुपपत्तिः। प्रकृतित्वं प्रत्ययविधावुद्देश्यतावच्छेदका
क्रान्तत्वम्॰ अयन्न्यायः शास्त्राबोधितान्यतरप्रयोगविषयेऽनएवलिट्द्यानित्यादौ न दोषः। अत्र प्रकृतिविशेषोद्देशेनैव प्रत्यया
नां विधानान्नापि केवल इति न्यायमूलकम्॰ एतन्मूलकमेव पठ्यतेऽपदं न प्रयुञ्जीतेति॥ ((क श्च तत्र नित्यविधेः अजुपश्लिष्टस्य यण् तद्
घटितः साधुः स प्रयोक्तव्यः तद्घटितो न साधुः स न प्रयोक्तव्य इत्यादिरीत्या स्वविधेयाघटितासाधुत्वबोधनपर्यन्तमपि व्यापारः। स्वरतीत्यादिविकल्पविधे
श्च साधुत्वबोधनपर्यन्तमेवेत्येवं स्थिते विध्यंतवर्द्धमानत्वविवक्षायां तद्घटितस्य साधुत्वं न्यायसिद्धं तदविवक्षायां तद्घटितस्यासाधुत्वबोधनार्थे नियमः

तत्र मध्येपि प्रत्ययोत्पत्तिः स्यादिति वाच्यं अव्ययसर्वनाम्नामिति सूत्रे प्राक् टेर्ग्रहणेना यमेव मध्ये नान्य इति नियमेन मध्यदेशस्यापि नियमनात्॰। एवं सति
परिशेषात्पर एव भविष्यति किं षष्ठ्यंशविकल्पसूत्रोपस्थानेनेति चेन्न। विधेयतया प्रधानीभूतयोर्बहुजकचोर्नियामकतयापि पुरस्ताद्ग्रहणस्य प्राक्टेर्ग्रहणस्य च

भै॰ वारितार्थ्यसम्भवेनप्रत्ययान्तरनियामकत्वेव्यापाराभावइत्याशयात्। इतिसिद्धमिति॰। परत्वस्यसावधिकतयाऽवध्याकाङ्क्षायांयस्माद्विधा
नंततः परोभवत्येवेतिफलितमिति। शास्त्रेणचधात्वादेर्विधानात्केवलस्यपचपठित्यस्यप्रयोगोनभविष्यति। नन्वेवंगवित्ययमाहेत्यस्यप्रयोगोनस्या
स्यादतआह॰। अनुकेति॰ अभेदविवक्षयेति॰ तदासाहश्यात्स्यसम्बन्धेनोपस्थितिर्नेहत्याख्यसमन्धेनप्रकृतेचहृत्तिरूपसम्बन्धेनार्थबोधकतयालोकह
ष्टस्यैवग्रहणमिष्यतइतिभावः। प्रातिपदिकत्वाभावेनेति॰। अस्यस्वाद्यनुत्पत्तेरितिशेषः। एवञ्चयत्फलितन्तदाह। प्रकृतित्वाभावादिति॰ प्रत्ययविधा

भ॰ अत्रचलडादिर्निरर्थकएवभूतानिकालः पचतीत्यत्रयथानस्यापत्यमित्यादिविकल्पविधावुपगवपत्यमुपगोरपत्यमित्यादिप्रयोगभं
गभियाअणा घटितसाधुत्वेनन्यायसिद्धंतत्रमहाविभाषयावाक्यंअन्यतरस्यांग्रहणानुवृत्यासमासः उपगवपत्यमित्यर्थेउपगुरितिनप्र
योक्तव्यमितिनियमेनसाध्यमस्पष्टंचेदमत्रभाष्येविपरीतंतुनव्याख्यानात्त्रैमेपूनित्यमित्यत्रयोगविभागादिकंतुसुवंनान्निर्दिष्टार्थप्रतीति
मेश्वानियमेनस्यादेवमर्थेपरश्चेतिनियमेनतुनिरर्थकोमपस्यात्अत्यंतस्वार्थिकेतुनास्यसंबंधोमहाविभाषयासहविरोधात्विभाषायाहृस्व
विधेयाघटितसाधुत्वंनियमेनचासाधुत्वमितिविरोधःस्पष्टएवेति अतएवाषउक्षेत्यादौउत्तरसूत्रस्यान्यतरस्यांग्रहणस्यज्ञापकत्वेननित्य
त्वमुक्तमाकरे अनुकरणेत्विति अस्यचगवित्ययमाहेत्यादाविति तत्पक्षपाठेन्वयः शास्त्रावोधितेनतुशास्त्रवोधितत्वंचशास्त्रवोधितासाधुत्व
कत्वंअतःपाचकइत्यादेर्घञ्विधायकशास्त्रवोधितस्यप्रयोगः स्यादितिनापादनीयं॥ एवित्यस्यपदितिशेषः। अस्योद्देश्यतावच्छेदके ॰न्वयः

गमकत्वात्समासः। ननुप्रत्ययःपरोभवत्येवेत्यस्ययत्रप्रत्ययस्यलुक्तत्रनियमभङ्गइत्यतस्तत्परिहारमाह॰ अयन्न्यायइति॰। अन्यतरेति प्र कृतिप्रत्य १६८
यान्यतरेत्यर्थः। एतेनयत्रप्रकृतेर्निवृत्तिस्तत्रापिव्याप्तिरेवयानित्यादौननियमाव्याप्तिः। नन्वपदन्नप्रयुञ्जीतेतियथावाचनिकंतथानकेवलप्रकृतिरिति
नियमस्यापिवाचनिकत्वमेवास्त्वित्यतआह। एतदिति॰ एतन्मूलकमेव॰। नकेवलाप्रकृतिरितिनियममूलकमेवेत्यर्थः॥ ॥

भ॰ रेवस्यात् भोजनन्यायाश्रयणेतु परिवेषणोत्तरं भोजनस्येव तदुत्तरं तत्प्रवृत्तिर्निर्वीजैव यद्वा उक्तन्यायेन सीयुटो बलीयस्त्वाद् प्रतिषेधाभावेन परत्वाप्रयोजकत्वादा
हच्चेतीति। चेन चोक्तार्थसमुच्चयः सीयुट एवेति यद्यपि तनीयसूत्रे लस्थाने इड्डुदात्तो भवतीति उत्पत्तिकाले एव स्वरविधानादनुवादविषये यदागमाद्युदात्तस्याप्रवृत्तेरा
गमविशिष्टस्योदात्तत्वाप्राप्त्योच्चार्यमाणस्येट एवाद्युदात्तत्वे सीयुटः शेषनिघात सिद्धिः परन्तु सीयुडागमसमवधाने तस्यानर्थक्यादादेशासंभवेन सीयलङ्घत्व
स्य स्थाने सीयडित्यादेशः स्यात् स च प्रत्ययसंज्ञक आद्युदात्तश्चेत्यानुमानिकवचनेन प्राप्नोतीत्याशयः आगमानुदात्तत्वे त्वपवादत्वात् पूर्वमेव नानुमानिकाद्यु
दात्तत्वप्रवृत्तिरिति श्रौताद्युदात्तत्वस्यैवावस्थानमित्याहुस्तन्न आनुमानिककल्पनेपि विशेषण विशिष्टस्य लक्षणानुलक्षिते विशेषणान्वयरत्वंगीकारा
त् अन्यथापवादस्यवाक्यस्य वा आद्युदात्तत्वापत्तिरिति तथापि अस्यैकदेशयुक्तित्वादिति स्पष्टमुद्योतेन च क्रियमाणेप्यागमानुदात्तत्वे क्रियमाणे
पि प्रत्यय संनियोगेनाद्युदात्तत्वे सीयुटादेर्लिङ आद्युदात्तत्वं प्रसज्येतेति भाष्यं लिङ विधावुपस्थितनाद्युदात्तश्चेत्यस्य विधानकाले लिङोऽनचकत्वेनाप्रवृत्तावपि
सीयुटि यदागमेति न्यायेन लिङ्त्वात् सीयुटः प्राप्नोतीत्यभिप्रायकमित्यादि अथ विधौ तदंतसंबंधेपि तदसंगतिरतः कैयटासंगतिमाह कैयटेत्यादि तन्न सूत्रस्य प्रदी
पाद्यो मोतुश्चिन्त्यावि वचिंनावीजंतुस्फुटंतथाहि पत्तु प्रकृतसूत्रे कैयटे उपपदस्यापि प्रत्ययत्वे राजपुरुषादिषु सावकाशमुपसर्जनमित्येतद्बाधित्वा परत्वापत्ति
रिसुक्तं तस्यायं भावः राजपुरुषयोः सुनिरूपितप्रकृतित्वेपि शब्दांतरापेक्षया परं परापेक्षया वा पर्यायेण प्रयोगप्राप्तिसमस्यमानपदापेक्षयोपपदस्योपसर्जनस्य पूर्वनिपा
तार्थं तत्सार्थकं आदिपदग्राह्यं दास्याः पुत्र इत्यादावलुक्समासे जहिजोडमिति तिङन्तपूर्वपदके च समासे तत्सार्थकं न हि तत्र तिङन्तयोः प्रकृतित्वेन प्रत्यय
त्वप्राप्तिरस्ति येन परत्वं प्रसज्येतेति एतेनोपसर्जनपूर्वत्वस्यानवकाशत्वाभिप्रायको विवरणग्रंथः परास्तः यदपि प्रकृतसूत्रे विकारागमेषु च परविज्ञानादिति भाष्य
व्याख्यानावसरे कैयटेनोक्तं न हि परत्वनिमित्ता प्रत्ययसंज्ञा अपितु प्रत्ययसंज्ञानिमित्तं परत्वं तथा च परत्वाभावेपि प्रसवहुज कजां प्रत्ययसंज्ञा भवतीति तस्याप्ययं
भावः परत्वसंनियोगशिष्टं न प्रत्ययत्वं प्रत्यय इत्यविकाराभावात् व्याप्तेश्च किंतु प्रत्ययत्वसंनियोगशिष्टं परत्वमिति न च तन्नण हरतीति निर्देशेन संनियोगशिष्टन्यायानित्यत्वे

श्री·शे·
टी·भै·
टी·भ·
१९९

भै· भाविनकथमेतदिति वाच्यम· अवध्याकाङ्क्षायाः प्रकृते नित्यत्वात्प्रकृतेरितिशब्दाध्याहारेणविवक्षितवाक्यार्थपर्यवसानसम्भवात्॥ ॐ ॥ नहिद्वितीयादीति·
पश्यमृगो धावतीत्यादौ धावतिपदात्कर्मबोधिकाद्वितीयास्यात्। नचपचतिभवतीत्यत्रतिङन्तात्प्रथमाया अप्यापत्तिसम्भवेनप्रथमादीतिवक्तव्ये द्वितीयादी
त्यनुपपन्नमिति वाच्यम· अनभिहिताधिकारेकर्मणीतिसूत्रस्यप्रथमोपादानात् संख्याभावादिति·। सङ्ख्यान्तराभावादित्यर्थः। गमकाभावेनौत्सर्गिकैकव
चनस्याप्यप्रवृत्तेः। एवंसर्वत्रतिङन्तस्यभवतिक्रियाकर्तृत्वसम्भवेनप्रथमायादुर्वारत्वात्सुबन्तत्वेनैवपदत्वे सिद्धे तिङ्ग्रहणस्यानर्थक्यमपिसम्भाव्येत। नच
तिङर्थेसङ्ख्यावच्छिन्ने सुबर्थसङ्ख्यायाः प्रकारतयाभानंस्यादितिवाच्यम्। दण्डवान्दण्डवानितिवदुद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्येनशाब्दबो

भ· ध्यापत्तेरितिपदिकार्थत्वाभावेनमात्रपदेनद्वित्वातिरिक्तकालादेर्व्यावृत्त्यावप्रथमायाअप्राप्तावपिपश्यधावतीत्यादौद्वितीयास्यादतआह· नेतिआदि
नाज्योतिष्टोमेनयजेतेत्यादौतृतीयासंख्येति। संख्यावच्छिन्नेऽन्यसंख्याभावादित्यर्थः नन्वस्यसंख्याभावेपितत्संख्यामादायस्यादतआह संख्येति एतेनवाक्यानस्तु

तिङन्तात्तु नद्वितीयादिः संख्याभावात् सङ्ख्यायास्तिङोक्तत्वाच्च· ॥ ॥ ॐ ॥ ॥

वुत्पत्तिनिरासायसदत्यपास्तमितिभट्टाः अन्येतुसंख्याभावादित्यस्याप्रतीतेरित्यर्थः ननुकर्तृकर्मप्रत्ययेप्रतीतावपिशब्दं तदित्यादौनतत्प्रतीतिरस्त्येवभावा
र्थकतिङन्तेऽतआह· उक्तत्वादिति। एतेनधावतिपश्येत्यादौकारकसंख्यायाउक्तत्वेपिक्रियागतामनुक्तामादायस्यादित्यपास्तमितिव्याचक्षते· ॥

धासम्भवात् ननुतस्याएवसङ्ख्यायाः प्रतिपादकः सुप्कथन्नस्यादित्यतआह· तिङोक्तत्वादिति·। एतेनैकसङ्ख्याया धात्वर्थेऽपरस्यास्तिङर्थेसाधनेऽ
न्वयाभिप्रायेणतिङन्तात्सुबुत्पत्तिःस्यादित्यपास्तम्। नचद्योतकविषयेउक्तार्थानामितिन्यायाद्ब्राह्मणोवित्यादौयथादृष्टस्तथाऽत्रापिस्यादितिवाच्यम्। द्योतक
विषयेपिक्वचिन्न्यायप्रवृत्तेः स्वीकारात्। अतएवस्त्रीप्रत्ययप्रकरणेघ्कैलोक्तेपीत्यादिवक्ष्यति। वाक्यात्तर्हिसुबुत्पत्तिःस्यादित्यपिनाशङ्कनीयम· स्वघटकसुपान्त

पिसङ्ख्यायाउक्तत्वात्॥ १९९

भे॰ ननु धातुभ्यस्तर्हि स्यादत आह॰ धातुभ्य इति॰ अपवादत्वादिति॰ विशेषविहितत्वेनेत्यादिः। ननु धातुतिङन्तेभ्यस्तद्धितव्यावृत्त्यर्थम्प्रातिपदिकाधिकार इत्यत आ
ह। तस्येत्यादीति॰ तिङन्तादेतत्तरणा पितद्धितं वारयति॰ तमविधाविति॰। न्यायेनेति॰। अनयानुपपत्त्या सुबुत्पत्त्यनन्तरमेव तद्धितोत्पत्तिसम्भावनेति भावः। हेत्व

भ॰ अपवादत्वादिति फलस्य व्यपदेशिवद्भावेन कर्मत्वात् धातुमात्रस्य तदुपस्थापकत्वात्तस्मिन्नेव संख्यासत्त्वाच्च सर्वत्र द्वितीयाप्राप्तेरिति भावः। क्वचि
त्तदकरणत्वेनान्वयविवक्षायां ज्योतिष्टोमेन यजेतेत्यादौ हरिन्नमेद्वेदित्यादौ च तृतीयाप्राप्तिर्बोध्या इदं तु चिन्त्यम्॰ संख्यामात्रविवक्षायां कालसाधुना

धातुभ्यस्तु न॰ तिङ्समपवादत्वात्॰ तस्येत्यादिसमर्थविभक्तिनिर्देशात्तमविधौ तिङः श्चेति ज्ञापकाच्च न तेभ्यस्तद्धितव्यावृत्त्यर्थेऽ
तिचेन्न॰ तदभावे स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोग इति कुत्सित इति सूत्रभाष्योक्त
न्यायेन तस्यापत्यमित्यादेस्तत्सम्बन्ध्यपत्यमित्याद्यर्थे प्रथमोच्चारितबोध्यात्प्रत्यय इत्यर्थस्य सत्त्वेन च सार्थकतद्धितानां सुबन्तादुत्प॰
त्यानुदात्तादेरित्यस्य प्राधान्यादुपस्थितसुबन्तविशेषणत्वापत्तौ सर्वस्य विकारः सार्व इत्यत्राजनापत्तेः। सर्वस्य सुपीत्याद्युदा
त्तत्वात्॰ तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैव तद्विशेषणमिति न दोषः। सर्वशब्दस्योञ्छादिपाठेनान्तोदात्तत्वात्॰॥ ॥

देशविवक्षायां तिङादेः प्राप्तौ सुपो वारणाय स आवश्यक इति। ननु वर्तमानकालिके कर्तृक पाकसमूह इत्यर्थे पचतीत्यस्मादणादिव्यावृत्त्यर्थः सोऽत आह
तस्येति। ननु तस्येत्यादेः नवर्ण्यतादित्यर्थः किं तु तत्संबंधीत्यादि रेवं च तिङ॰ तारणादिः प्राप्नोत्येवेत्यत आह॰ ज्ञापकेति॰ तिङ॰ ततद्धित श्चेत्यादेरेव नियमः॥

तदमाह॰ तस्यापत्यमित्यादेरिति॰। उपस्थितत्वादिति॰ पूर्वोक्तहेतुद्वयेनोपस्थितत्वादित्यर्थः। एवञ्च प्रातिपदिकाधिकाराभावे अनुदात्तादेरित्यस्यानुदात्तादेः
सुबन्तादित्यर्थोऽपि सम्भाव्येतेति भावः। न चोञ्छादिगणे सर्वशब्दस्य पाठेनाऽभिकर्तव्ये सर्वस्य सुपीत्येतन्न प्रवर्तत इति कल्प्यते सर्वत्रैव सर्वस्य सुपीत्यस्य प्र
त्यान्तोदात्तत्वस्य श्रवणाभावात्तत्पाठस्यान्तसिद्धिमात्रफलकत्वात्। यदि च प्रातिपदिकाधिकाराभावे अनुदात्तादेः सुबन्तादित्यर्थश्चस्तनि सार्व इत्यत्र भवदुक्तरीत्या

प्र·शे· भे· ओः प्रवृत्तिस्तर्हि उञ्छादिषु सर्वशब्दपाठस्यैव पर्यवसपष्टमेवेति वाच्यम्। अस्य ग्रन्थस्यैतत्सूत्रभाष्यपठितवार्तिकोक्तप्रयोजनसामान्योपलक्षणत्वात् एवंहि वार्ति
टी·भे· केउक्तम्। वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्सम्प्रत्ययार्थम्। वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे तर्हि प्रत्ययविधौ तत्सम्प्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं
टी·भ· क्रियते। वृद्धात् अवृद्धात् अवर्णान्तात् अनुदात्तादेः द्व्यच इति एतानि प्रातिपदिकविशेषणानि यथा स्युरिति। अक्रियमाणे प्रातिपदिकग्रहणे कस्यैतानि विशे
१७० षणानि स्युः समर्थविशेषणानि। तत्र को दोषः। उदीच्यां वृद्धादगोत्रात्। इह च प्रसज्येत तानां ब्राह्मणानामपत्यम् एतद्धि समर्थम् वृद्धम् इह न स्यात् तयोर्ब्राह्मण्यो
रपत्यमिति। प्राचामवृद्धात्फिन्बहुलम्। तयोर्ब्राह्मण्योरपत्यमित्यत्र प्रसज्येत एतद्धि समर्थमवृद्धम्। इह न स्यात् तानां ब्राह्मणानामपत्यमिति। एतद्धि समर्थं

भ· चेति भावः एतेन व्याख्यानस्य लेशेश्वरविरोध इत्यपास्तम् वाक्यार्थं त्वेतत्स्वार्थिकनिरासाय चं इति चिंत्यमिदमिति वदंति· । सुवंतस्योपस्थितत्वसिद्धये
हेतुद्वयमाह· स्वार्थेति। तस्येति च· । बोध्ये ति· । अत्र च हि द्वन्मानसेति वक्ष्यमाणवत्तंत्रं बोध्यम्· प्रथमोच्चारितबोध्यादिति प्रथमोच्चारितं बोध्यं वा^
च्यपस्येति च तदर्थः। बोध्यबोधकादिति यावत्· अन्यथाभुक्तेपीति न्यायेन बोध्यादुपस्थिते वादित्यर्थात् प्रत्ययस्य वाधार्द संगतिः स्पष्टैव तद्बोध्यबोधकं च सुवंत सुवंतं
मेवेति तस्योपस्थितत्वमिति भावः घटक तयोपस्थितप्रातिपदिकत्वविशेषणत्वाभावायाह· प्राधान्येति। न दोष इति· यद्यपि प्रकृ तेसर्वस्य सुवंतस्य प्रातिपदि
(( कत्वमपि न तथा· तथाप्युपलक्षणं तदिति

द्धम्। अत इञ् इहैव स्यात् दक्षस्यापत्यं दाक्षिरिति। एतद्धि समर्थमकारान्तम्। इह च न स्यात् दक्षयोरपत्यं दाक्षायणम्
पत्यमिति। एतद्धि समर्थमनवर्णान्तम्। अनुदात्तादेरञ् भवति। इह प्रसज्येत वाचो विकारः स्व वचो विकार इति। इह न स्यात्। सर्वेषां विकारः सार्व इति। द्व्यचष्ठन्नि
ह प्रसज्येत वा चातरन्ति त्व चातरति। इह न स्यात्। घटेन तरतीति भाष्ये उक्तम्। एवं पञ्चानां विकार इति विग्रहे षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वेन सम^ सुवंतमितिप्रथमा रामः
र्थस्यानुदात्तादित्वादञ् प्राप्नोति। प्रातिपदिकाधिकारे तु नः सङ्ख्याया इति पञ्चन् शब्दस्याद्युदात्तत्वादनुदात्तादिना प्रातिपदिकप्रकृ तिकसुवन्तत्वाभावात् १७०

भे॰ ननु परिनिष्ठितपदार्थाप्रसिद्ध्यापदपदार्थाप्रसिद्धिरित्यत आह॰ अप्रवृत्तनित्यविधीति॰। अप्रवृत्तो यो नित्यविधिस्तस्य यदुद्देश्यतावच्छेदकं तदनाक्रान्तत्व
मिति विवक्षितम्। न च गन्तेत्यादावप्रवृत्तो यो नित्यविधिराई— धातुकेति तस्य यदुद्देश्यतावच्छेदकं वलाद्यार्द्धधातुकपरधातुत्वं तदाक्रान्तमेतदिति परिनि
ष्ठितमेतन्न स्यादिति वाच्यम्। उत्सर्गापवादस्थले॰ पवादविषयम्परित्यज्यैवोत्सर्गप्रवृत्तिस्वीकाराद् उपदेशकालावच्छिन्नैकाच्त्वानुदात्तत्वावच्छिन्नप्रतियो
गिताकभेदविशिष्टधातुपरवलाद्यार्द्धधातुकत्वस्योद्देश्यतावच्छेदकतया तदनाक्रान्तत्वस्य प्रकृतेसत्त्वादेवमेवान्यत्रापि बोध्यम्। सेढेत्यादावव्याप्तीति॰न
भ॰ परश्चेति नियमेन स्वाघटितस्य तस्यासाधुत्वबोधनात् अनुकरणे॰तिव्याप्तिवारणाय परत्वं व्याचष्टे अपरीति विहितादावतिव्याप्तिवारणाय तदपि परिष्कु
र्वन्नेपरीति। अप्रवृत्तत्वं च प्रतिबंधकाप्रतिहतप्रवृत्तिकत्वं तेन लिडित्यादौ एवलाद्युद्देश्यतावच्छेदकधातुत्वाक्रान्तत्वेपि नाव्याप्तिः हरीएतावित्यादौ च नसा प्रतिबंध
अपरिनिष्ठितमिति तदर्थः। परिनिष्ठितत्वं चाप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम्॰ निहतेतिङं तादावव्याप्तिवार
णाय प्रवृत्तेति॰ वैकल्पिकेडागमोद्देश्यतावच्छेदकाक्रान्ते सेढेत्यादावव्याप्तिवारणाय नित्येतीति दिक्॰ ङ्याप्प्रातिपदिकात्॰।
समाहारद्वन्द्वः। ननु परश्चेत्यनेन प्रकृतेरासेपात्प्रातिपदिकाधिकारो व्यर्थः॥ ११ कृत्वं च निहते तिङं तेलस्ये लक्षणस्येति न्यायशान्तिरू
दाहृतार्थानामित्यपवादविषयतावाप्रकृतिभावश्चेतिरीत्यान्यत्रानेकविधं यथासंभवं बोध्यम् दिगर्थस्तु वैकल्पिकविधीनां वा ग्रहणं रूपप्रतिबंध
कप्रतिहतप्रवृत्तिकत्वान्नित्यग्रहणं वैकल्पिकमिति— केचित् व्याचक्षते॥ ११ च नित्यपदानेपि कथमस्यपरिनिष्ठितत्वम् पूर्वोक्तविशेषणविशि
ष्टधातुपरवलाद्यार्द्धधातुकत्वसत्त्वादिति वाच्यम्। स्वरित्यादिद्भिन्नत्वेनापि धातोर्विशेषणीयत्वात् नन्वस्य निषेधस्य व्यापकतया न केवलेतिव चमस्य च प्र
कृति प्रत्ययमात्रविषयकतयैतन्मूलकतयेत्यसङ्गतमिति चेत् केवलप्रत्ययप्रकृतिप्रयोगेप्यपरिनिष्ठितस्य प्रयोगे प्राप्ते तेन नियमेन तस्य निवृत्तावेकदेशा
नुमत्या व्यापकस्यापि तन्मूलकत्वमिति गृहाण एकवचनोपपत्तये आह॰ समाहारेति॰। प्रकृतेरासेपादिति॰। परत्वस्य सावधिकत्वात् न चासिद्धिस्तस्य पञ्चद्वो चेभाना

श्रा·शे· टी·भै· टी·भ· १७१

मे· बहुतरोदाहरणेति। अयस्कुम्भीत्यादिः। नन्वनयास्त्रीप्रत्ययविशिष्टस्यप्रातिपदिकग्राहकशब्देनग्रहणेपिप्रातिपदिकत्वतद्व्याप्यधर्मेस्त्वभः कथमतआ
ह· कुमार्येत्यादिधर्मिग्राहकस्यभाष्येसाक्षादनुपलंभादुदाहरणंप्रमाणयतिवहुतरेति। नन्वयस्कुम्भीत्युदाहृते प्रातिपदिकरूपेणकुंभत्वादिनाग्रहणेप्रवृत्ति
विशेषविषयेबहुतरोदाहरणदानाच्च स्त्रीप्रत्ययसमभिव्याहारेप्रातिपदिकत्वतद्व्याप्यधर्मविशिष्टेऽनेनातिदिश्यते अतएववहु
व्रीहेरूधसइतिसूत्रभाष्येनद्युतश्चेत्यस्यनद्यन्तवहुव्रीहेरित्यर्थेकुण्डोध्नीत्यत्रकवापादितः अन्यथातुङ्यन्तस्यवहुव्रीहित्वाभावान्न
दसङ्गतिः नद्यन्तानांयोवहुव्रीहिरित्यर्थेनचपरित्त्यक्तरूपत्वत् समासान्तेषुतत्परिभाषाभावस्तुङ्याप्सूत्रभाष्योक्तोऽवयवविषयए
वसमुदायविषयेतत्प्रवृत्तावपिदोषाभावेनतदंशेतदप्रवृत्तौनमानमित्याशयः। ङ्याबन्तादिति ङ्याप्ग्रहणंस्त्रीप्रत्ययमात्रोपलक्षणम्
तेनब्रह्मबन्धूतरायुवतितरेत्यादेःसिद्धिः जातेश्चेतिनिषेधात्पुंवत्त्वं वयोवाचिनांवैकल्पिकजातिकार्यस्यवक्ष्यमाणत्वात् तद्धितइति
एतच्चसमासान्तप्रत्ययाद्यतिरिक्तपरं व्याख्यानात् तेनपूनीतिर्वहुगोमतिकेतिस्यादित्यपास्तम् एवञ्चस्त्रीप्रत्ययेषु अत्यन्तस्वा
र्थिकानांऽरभ्यतद्धितेषुचङ्याप्ग्रहणसम्बन्धोव्याख्यानात् अतएवलोहितिकेत्यत्रसिद्धयेलोहितात्लिङ्गवाधनं वेतिचरितार्थम
त्यन्तस्वार्थिकानांसुत्पत्तेःपूर्वमुत्पत्तिरितिसर्वस्यद्वेइतिसूत्रेभाष्येस्पष्टं कैयटेच तत्रहिपदस्येत्यस्यप्रयोजनं द्विपदिकेत्यादौद्वित्व
सङ्ख्यायुक्तपादार्थस्यवीप्सितत्वात् वीप्सायामेकत्वलक्षणसङ्ख्यायाअनन्तर्भावात्समासाद्विभक्त्यभावेनपदत्वाभावा
त्प्राक्तद्धितोत्पत्तेःपरत्वात्प्राप्तद्विर्वचनाभावइत्युक्तम्॥ ॥ लाभेपितद्व्याप्यवहुव्रीहित्वादिनाग्रहणेप्रवृत्तिर्नस्यादतआहस्त्रीप्रत्ययेङ्
ति। तद्धितदृष्ट्याइतिशेषः तद्धितत्वंचतत्प्रकृतिभूतमेवअतएवनद्युत्तरपदादित्यर्थेप्युत्तरपदत्वस्यविशिष्टेऽतिदेशात्कप्यादित्यपास्तम् उत्त १७१
ह· स्त्रीप्रत्ययेति· ननुसमासान्तविधौनेतिङ्याप्सूत्रभाष्येउक्तत्वाद्विरोधइत्यतआह· समासान्तेष्विति· अवयवविषयएवेति। यथामद्राणांराज्ञीमद्रराज्ञीत्यत्रराजा

मे॰ हरिनिटच्च्व।उपलक्षणमिति।अत्रमानन्तु कुत्सितइतिसूत्रभाष्येस्वार्थादिप्रयुक्तकार्यैःसंस्कृतस्यवहिर्भूतकुत्सादियोगइतिन्यायेनातिशायनिकःप्रत्ययः
स्त्रीप्रत्ययानन्तरमेवभविष्यतितद्वीसोऽन्नात्तद्धितोत्पत्तिःस्यात्ङ्याप्ग्रहणस्यवाच्यार्थमात्रनान्यर्थकत्वेतुनेतिफलैक्यापलक्षणाप्याआवश्यकत्वमितिभावः
सिद्धिरिति॰।विशिष्टात्तद्धितसिद्धिः।अन्यथालोहितिकाइत्येवस्यादादिनायुवतिकेत्यादिपरिग्रहः।ननुपुंवद्भावाद्धस्वत्वंविप्रतिषेधेनेतिवार्तिकव्याख्यानावसरे
पुंवद्भावावकाशोदारदिका इतिभाष्येउक्तन्तेनतसिलादिषुकप्यत्ययस्यापिपाठेनयुवतिकेत्यत्रोपलक्षणत्वाभावेपिनक्षतिरतआह।जातेश्चेति॰।ननुवयसो
नित्यत्वेननास्यजातिवाचकत्वमतआह॰।वयोवाचिनामिति॰वैकल्पिकेति॰आकृतिग्रहणेत्यादिलक्षणेऽनित्यव्याहृतविशेषणाभावाद्युवत्यादिकमपिजाति

म॰त्वस्यप्रकृतौदृष्टत्वाभावात्एतत्ध्वननायैवसमभिव्याहारइति॰अन्यथातद्धिफलमेवस्यात्॰विशिष्टेति॰तन्मात्रविशिष्टएतेनदृष्टपामालयाइत्यत्र
तत्प्रकृतौमालेदृष्टप्रातिपदिकत्वस्यदृष्टामालाइतिविशिष्टेऽतिदेशात्प्रातिपदिकत्वेनलुक्स्यात्इत्यपास्तमितिकेचित्॰पाठकग्रंथेउत्तरइतितत्त्वमिति॰व
सुतस्तुसमासांतानामलौकिकेप्रवृत्यात्तत्रचसुपःसत्वात्तदीचरमावयवकत्वंबाधितमतःटाबंतेस्वादिविधिरितिपदत्वेपिह्रिर्वचनप्रसक्तिरस्तीति॰नच
तद्धितोत्पत्तेःप्राक्समासस्यनह्रिर्वचनमपवादत्वादित्यभिप्रायकमाह॰नदपिन॰प्रकृतार्थस्यभाष्यानभिप्रेतत्वात्॰तथाहि॰तद्धितनिवृत्त्यर्थमित्यस्यत
द्धितांतनिवृत्त्यर्थमित्यर्थः।नहितदुत्पत्तेःप्राक्तदन्तसमासनिवृत्त्यर्थमित्यनेनगतार्थत्वाच्च॰किंचतदर्थाभिप्रेतत्वेहितद्धितेनोक्तत्वान्नभविष्यतीति॰
तदुत्तरंतन्मन्याख्यानभाष्यासंगतिः।नहितत्पूर्वःप्राक्तेनोक्तंसंभवतीतिपुनःसर्वथानिरवकाशत्वेनतद्बाधकत्वात्ततःप्राक्तर प्रवृत्तेश्चलुकिकृतेपितत्

रतसर्वेयुवतितरेतिभाष्योदात्तेतेनपुंवत्वम्।नचैवंयुवजातिरित्यत्रपुंवत्वानापत्तिर्जातेश्चेतिनिषेधादितिवाच्यम्।अपरआहेत्यादिनाप्रादुर्भावविनाशाभ्यांद्रव्य
स्ययुगपद्धुलेरित्यादिनायावद्द्रव्यभाविस्वघटितलक्षणान्तरकरणेनपुंवत्वस्यतन्मतेजातित्वाभावात्।एवञ्चभिन्नऋषिकर्तृकलक्षणद्वयप्रामाण्येनव
योवाचकेजातिकार्येविकल्पइतिभावः।वृद्धावेव्यानपस्विनीत्याद्येपक्षेतर्हिङीष्प्राप्नोतीत्यतएतादृशानामजादिषुपाठोबोध्यः।एवञ्चगौरादिषुतरुण
तलुनयोःपाठस्तुअपरआहेतिमतेजातित्वाभावात्।एतच्चेति तद्धितपरञ्चेत्यर्थः।व्याख्यानादिति॰।लक्ष्यसिद्धिमूलकव्याख्यानादित्यर्थः ॥ ॥

शु·शे·
टी·भै·
टी·भ·
१७२

भै· एतेन·। तद्धितपदस्यसमासान्तमितिप्रत्ययातिरिक्तपरत्वेन। तद्धितपदस्यतद्धितसामान्यपरत्वेसमासान्तप्रत्यययोरपितद्धितसञ्ज्ञकत्वेनएतेषामपिस्त्रीप्रत्ययान्ता
देवोत्पत्तिःस्यात्तथाचवृत्तीतिर्बहुगोमतिकेतिस्यादेवतच्चाधुनानेतिभावः। तद्धितपदस्यसमासान्तप्रत्ययातिरिक्तपरत्वेसतियत्फलितन्तदाह· एवञ्चेति· तदन्यप
रत्वेचेत्यर्थः।आरभ्येति·।एतेनसमासान्तानांसङ्ग्रहः।व्याख्यानादिति·कुत्सितइतिसूत्रभाष्योक्तन्यायेनसार्थकतद्धितानांआवनादेवोत्पत्तिर्भविष्यति।आपोःस्व
र्थविवक्षायामेवप्राप्त्याःत्यन्तस्वार्थिकानान्तुस्वार्थद्रव्यमात्रापेक्षत्वेनताभ्याम्पूर्वमेवप्राप्तिरितितन्न्यायाविषयत्वमित्येवंयुक्तिमूलकादित्यर्थः एवंसतियत्सिद्ध

भ· प्रकृत्याद्वित्वंनप्राप्नोत्येवेतिनचापिभाष्यासंगतमेवेतितुनवाच्यंउत्सर्गेद्वित्वेकृतेउक्तत्वाद्वीप्सायांतुनोऽप्राप्त्यातंन्यायविषयाभावात् हलङ्यादिलोपेकृते
पदत्वात्·द्विपदिकाइतिबहुवचनांतंपाठ्यमितिचतदुक्तंचिंत्यंतत्पाठस्यापियोजितत्वात् यत्तुविवरणेद्विपदिकेत्युक्तंभाष्येशब्दइत्यपपाठःपदग्रहणेनापितत्र
तन्निवृत्तेरशक्यत्वात्शसंतस्यापिपदत्वात्तत्पूर्वभागस्यापिसुबंतत्वात् शसउत्पन्त्यापदत्वादित्युक्तंतत्रतत्पूर्वभागस्यापिस्वादिष्विनिपदत्वादितियुक्तःपा
ठः अत्यंतस्वार्थिकानांसुबुत्पत्तेः पूर्वमुत्पत्तिरितिपूर्वमुक्तत्वादिति।प्रकृतग्रंथार्थस्तुइत्थंद्वित्वसंख्यायुक्तेतिस्त्रीत्वप्रयुक्तेत्यपिबोध्यम्।एकत्वेति।कैयटे
लिंगानंतर्भावस्योक्तत्वेपिउक्तहेतोरेवत्यागेऽनंतर्भावात्सुबुत्पत्तेःप्राक्टावंतस्येतिशेषः तस्यपदत्वाभावाद्द्विर्वचनाभावः प्रयोजनमित्यन्वयः ननुकृतेत
द्धितेपवादत्वात्तेनोक्तत्वाद्द्विर्वचनाभावेपितदुत्पत्तेःप्राक्समासस्यकृतेनेत्यतआहसेति।अभावेनेति।तस्याःसंख्यापेक्षत्वेनबहिरंगत्वात्तद्धितस्यच
स्वार्थिकत्वेनांतरंगत्वात्तेनबाधादितिभावः। यद्यपिवुनोबाधकत्वात्तद्विषयेद्विर्वचनाप्रवृत्तिरितिवक्तव्यंतथापिअपवादत्वात्प्राप्तिरेवनेत्युक्तेरिवान्य

न्तदाह।अतएवेति।अत्यन्तस्वार्थिकानाम्प्रकृतिप्रयोज्यविषयताविलक्षणविषयत्वाप्रयोजकत्वादेवासुबुत्पत्तेःपूर्वमुत्पत्तिरिति (त्राप्यपवादत्वादेवमुक्तमितिभाव्या
सुबुत्पत्तेःसंख्यापेक्षत्वेनबहिरङ्गत्वादितिभावः।पूर्वोक्तार्थंभाष्यसम्मतिमप्याह।सर्वस्यद्वेइति।प्रयोजनमिति। अस्यद्विर्वचनाभावइत्यनेनान्वयः।पादार्थस्य।
पादशब्दार्थस्येत्यर्थः।एकत्वलक्षणेति।द्वित्वसंख्यायुक्तपादार्थस्यव्याप्तिबोधसमयेतदर्थगतैकत्वाननुभवात्।पदत्वाभावादिति।एतेनद्विर्वचनादेर्हेतुरुक्तः।
प्राक्तद्धितोत्पत्तेरितितद्धितोत्पत्त्यनन्तरन्तुनद्विर्वचनम्।तद्धितान्तेनवीप्सायाबोधनात्।तद्धितस्यास्यस्वार्थिकतयासुबुत्पत्तेःप्रागेवोत्पत्तिरितिस्पष्टमनेनलभ्यते

१७२

भे॰ ननु प्रातिपदिकाधिकारेऽपि यत्प्रातिपदिकं सर्वदन्ते नदन्तुदात्तादि तन्न समर्थम्। यच्च समर्थं सर्वङसिति तन्न प्रातिपदिकमित्यत्र न प्राप्नोति लक्षणया प्रातिपदिकप
दस्य तत्प्रकृतिकपरत्वञ्चेत्समर्थपदस्यैव समर्थप्रकृतिके लक्षणास्तु किम्प्रातिपदिकाधिकारेणेत्याशङ्क्य नेत्याह नचेति। मानाभावात्। अस्यानुपपत्त्यात्मकबीजाभा

भ॰ उञ्छादिपाठं प्रमाणयन्नाह स्पष्टं चेति अत एव सर्वेति। तत्र नदन्तसप्तमीत्वादेवेत्यर्थः अन्यथा बहुव्रीहिकालेऽन्तोदात्तत्वात्तस्यैव पूर्वपदप्रकृतिस्वरेण

स्पष्टञ्चेदमत्र भाष्ये नचान्तरङ्गानपीति न्यायेन लुङ्निमित्तप्रत्ययात्पूर्वमाद्युदात्तप्राप्त्या सुबन्तविशेषणत्वेऽपि न दोष इति वाच्यम्
तेन न्यायेन धर्मिग्राहकमानादन्तरङ्गनिमित्तविनाशकलुक एव प्राबल्यबोधनेनादोषात्। सर्वस्य सुपीत्यत्र सौवरीणां सप्तमीनां
नदन्तसप्तमीत्वात्प्रत्यये परतः पूर्वस्य कार्यित्वाभावेन न लुमता तस्याप्राप्तौ प्रत्ययलक्षणेन सुबन्तनयात्तस्यान्तरङ्गनिमित्तविना
शकत्वाभावात्। अत एव सर्वस्तोमादिबहुव्रीहेराद्युदात्तत्वसिद्धिः नचानुदात्तादिप्रकृतिकषष्ठ्यन्तादित्यर्थेन न दोष इति वाच्य
म् गर्गादिभ्य इत्यादौ सुबन्तम्प्रति गर्गादीनां विशेषणत्वासम्भवाद्गत्या लक्षणास्वीकारेऽपि प्रकृते लक्षणायां मानाभावात् व
स्तुतस्तत्रापि न लक्षणा गर्गादिरूपात्प्रातिपदिकात्तत्सम्बन्ध्यपत्यमित्यर्थे प्रत्यय इत्यर्थे प्रातिपदिकात्परत्वं तद्व्यवधाने न
भविष्यति तद्व्यतिरिक्तव्यवधाने तु न मानाभावात् एतच्च मतुप्सूत्रे कैयटे स्पष्टमित्यन्यत्र विस्तरः। लिङ्गविशिष्टस्येति॰
रूपञ्च प्रातिपदिकसामान्यग्रहणे तद्विशेषग्रहणे च अनया परिभाषया ङ्याप्ग्रहणवैयर्थ्यस्य भाष्ये शङ्कितत्वात्॥

निर्देशः स्यात्। धर्मिग्राहकमानान्न्यायसंकोचादेवेति तु नातएवेत्यस्यार्थः तदसंकोचेऽपि पूर्वं लुकि अन्तरङ्गत्वात्सर्वस्वरे प्रकृतिस्वरेणतत्त्वसिद्धेः॥

वादित्यादि। तत्रापि॰ गर्गादिभ्य इत्यत्रापि। न लक्षणेति॰। प्रकारान्तरेण निर्वाहे जघन्यवृत्तिकल्पनमन्याय्यमिति भावः सामान्यग्रहणे तद्विशेषग्रहणे
चेति॰। अनया परिभाषया ङ्याप्ग्रहणवैयर्थ्यप्रतिपादनपरभाष्यात्सामान्यग्रहणं कुमारः श्रमणादिभिरित्यस्य ज्ञापकतया विशेषग्रहणञ्चेत्यर्थः॥

भै॰ अत्रैवार्थेभाष्या  न्तरमपिसाधकमाह।पुंयोगादितीति। अन्तरङ्गत्वादलीति।सुबुत्पत्तेः संख्यापेक्षत्वेनबहिरङ्गत्वमितिभावः।एवञ्चोत्पन्नस्वार्थिका
नांसुबुत्पत्तेःप्रागुत्पत्तिस्वीकारवत्स्त्रीप्रत्ययानांलिङ्गबोधकत्वेनबहिरङ्गतयास्त्रीप्रत्ययोत्पत्तेःप्रागित्यपिबोध्यम्। इन्नुलीति।कूटधात्तोरितिशेषः।स्वार्थिकभ

भ॰ ननूपजनिष्येतिन्यायेनतेनपदत्वबाधात्प्राकृतद्धितोत्पत्तेःसमासेकृतेपदत्वाभावात्तदभावइतिकैयटः।सुयोज्योऽनआहपुंयोगेति।अपिना
पुंयोगादितिसूत्रभाष्येप्यतत्स्पष्टम् तत्रहिगतिकारकोपपदानामित्यस्याः साङ्कटिनमितिप्रयोजनमुक्तम् तत्रहिअभि
विधौभावइनुणिकृटिन् शब्दादण्प्रत्ययविभक्त्योःप्राप्तयोःस्वार्थिकत्वेनान्तरङ्गत्वादणिकृटिन्नित्यस्यैवैयाकरणः पूर्वं
समासेविशिष्टादणिरूपसिद्धौभाष्यासङ्गतिः प्राक्सुबुत्पत्तेःसमासेनुक्तरीत्यैवान्तरङ्गत्वात्पूर्वंसमासेनततोविशिष्टादणिसा
ङ्कटिनसिद्धिरित्यन्यत्रविस्तरः।स्वौजस्।सूत्रेसमाहारद्वन्द्वः।टङ्पाश्चेतइति नचफलाभावः लोपस्यैवफलत्वात्।तत्र
नेत्रेतरव्यावृत्त्याचरितार्थानांवर्णानांलोपफलकत्वस्वीकारेबाधकाभावात् काम्यजादौतुलोपेसतिवर्णोच्चारणवैय
र्थ्यान्नतन्मात्रफलिकेत्सञ्ज्ञेतिबोध्यम्॥ ॥ पूर्वोक्तकैयटसंग्रहः एतेनोक्तार्थस्यभाष्यासंस्पर्शंसूचितवान् अन्यथासूत्रेपी
तिवदेत् इनुणंतत्वरूपेति।समासविधौहिगतित्वज्ञानंसमर्थत्वज्ञानंचेतिद्वयमेव अणविधौतुप्रातिपदिकत्वंसमर्थत्वंइनुणंतत्वंचेतित्रयः अतस्त
त्वेनानरङ्गत्वादिति।विभक्तेर्बहिर्भूतसंख्याकारकापेक्षत्वेनबहिरङ्गत्वादितिशेषः।अत्रस्वार्थिकस्यानरङ्गत्वकथनेनसुबुत्पत्तेःप्रागुत्पत्तिरितिस्पष्टमे
वलभ्यते।तस्यापि।अत्पनस्वार्थिकाणोपि।अपिशब्देनसमाससङ्ग्रहः। नचसमासस्य पदद्वयसापेक्षत्वमणस्त्विनुणन्तत्वमात्रापेक्षतयाऽनरङ्गत्व
वृद्धिस्स्यादित्युक्तमतस्यापिसुबन्ताद्भवन्तीतुपूर्वंसापेक्षनुणंतत्वरूपाधिकसापेक्षत्वेनबहिरंगत्त

भे॰ मितिवाच्यम्। अण्प्रत्ययो भवतीत्यर्थजननीये सौत्राण्पदादण्प्रत्ययस्वरूपज्ञानस्यापेक्षासत्त्वेन समासाद्बहिरङ्गत्वमिति भावः। इदमत्र बोध्यम्॰ स
मासान्तप्रकरणे प्रातिपदिकादित्यस्याप्यसम्बन्धः। तेषामलौकिकविग्रहवाक्य एवोत्पत्त्या तस्यामवस्थायामप्रातिपदिकत्वादिति। समाहारद्वन्द्व इति॰ इ
तरेतरद्वन्द्वे बहुवचनापत्तिः। पृथक्पदत्वे प्रत्येकं विभक्तिश्रवणापत्तिरत आह॰ समाहारद्वन्द्व इति॰ ननु लोपफलिके त्वस्मिन्नयुक्ता। उच्चारणसामर्थ्या
भ॰ स्याधिकां न च पदद्वयाश्रितत्वेन समासतो लघुतः प्रकृतिकसुबन्तोत्तरपदकार्यस्यैवबोध्यः। असंगतिरिति। ननु तदन्तात्तदुत्पत्तावपि परि
भाषांगीकारेण सुबुत्पत्त्यनन्तरं प्राप्त्यात दुत्पत्तेः प्रागेवान्तरङ्गत्वात्समासे तत्सन्दुत्पत्तौ समुदायाद्गणिसांकुटिनसिद्धिः तदनङ्गीकारे तु द्वयोरपि त
दुत्पत्त्यनन्तरयुगपत्प्रासैकपदाश्रितत्वेनान्तरङ्गत्वाद्गणिसांकोटिनमिति रीत्या भाष्यसुयोग्यत्वेन क्वाप्यसंगतिरिति चेन्न सत्यामप्यवस्थाम
वयवादुत्पत्तिः प्राप्नोतीति तदुत्तरभाष्यस्योक्ताभिप्रायकत्वेनैव व्याख्येयत्वेनादोषा तिसादवस्थायां न हि सुबन्तादिति नियमः वयवात्तदुत्प
त्तिः प्राप्नोतीत्यवयवस्यतत्वाच्चैन तत्भाष्यसंगतं स्यात इदं प्राचामनुरोधेन वस्तुतः संचस्कारेत्यादौ सुट इति वान्तरङ्गतरार्थक निमित्त
कत्वेन समासस्यान्तरङ्गत्वे बोध्यं तदाह अन्यत्रेति। एतेन तत्वेन तत्वानंगीकारे स्वग्रंथान्तरविरोध इत्यपास्तमिति केचिदित्यादिना स्वौजस
मौडिति। जसादौ रुत्वं सौत्रत्वान्नेति भावः वस्तुतस्तिपतसञ्जीत्यत्र वक्ष्यमाणरीत्या लाघवेन निर्विभक्तिकानुकरणभूतानि पृथक्पदान्ये
त। अन्यथा काम्यचः ककारस्यापि सा कथन्न स्यादत आह। इतरथा इत्याचरितार्थ्यो नामिति। एतेन काम्य॥ (( वेत्यरुतंत्याप्यमेवेति बोध्यम्॥
॥ ॥ जवयवककारइवोच्चारणसामर्थ्यमेषु नास्तीति भावः॥ ॥ ॥ ॥

शा.शे. मे· निषेधोपयोगिनीमिति· वाच्यतासम्बन्धेन विभक्तिशब्दावच्छिन्नस्य निमित्तत्वादिति भावः। ननु विभक्तिश्चेति सूत्रमकर्त्तुं शक्यम् न विभक्तौ तुस्मा इति सूत्रे सुप्तिङु
टी.भे. ग्रहणेनैव सिद्धेः। अष्टन आ विभक्ताविन्यादिसूत्रे सुब्ग्रहणमेवास्तु त्यदादीनामः इत्यत्रापि सुब्ग्रहणमेवानुवर्त्तताम्। तथा सति प्राग्दिशो इत्यत्रापि सुपीत्येवाधिकारः
टी.भ. पञ्चतन्त्रेत्यादौ सुपः सम्भक्तेस्त्रलादावत्वम्भविष्यति। न चैवमेतर्हीत्यत्र सुपि चेति दीर्घापत्तिरिति वाच्यम्। थीति करणेनादोषात् यादौ भादौ सुपीति तदर्थः। न च
१७४ पञ्चतन्त्रेत्यादौ सुपस्त्रलादेर्लोप इदानीमित्यादावनुदात्तौ सुप्पितावित्यनुदात्तत्वं स्यादिति वाच्यम्। त्रलादिविधानसामर्थ्येन लुगभावसिद्धेः। त्रलोलित्कर

भः विभक्तिश्च·। नन्वेवं त्रीणि त्रीणीत्यस्याननुवृत्तौ अष्टन आ विन्यादौ निर्वाहेऽपि प्रथमयोरित्यादौ दोषोऽत आह प्रथमेति·। वाच्ययोरित्यत्र त्रिक इति शेषः

न विभक्तौ तुस्मा इति निषेधोपयोगिनीं विभक्तिसञ्ज्ञामाह विभक्तिश्च चकार एकसञ्ज्ञाधिकारेऽपि पुरुषवचनसञ्ज्ञाभ्यां समावेशा
र्थोऽन्यथा पर्यायः स्यात् सुप इति सूत्रं तिङस्त्रीणि त्रीणीति सूत्रात्तिङ् इति चानुवर्तते प्रथमयोरित्यादौ व्याख्यानात्प्राचां वैयाकरणा
नां प्रथमा द्वितीया पद वाच्ययोर्ग्रहणं बोध्यम् अन्यथा औजसोः पूर्वसवर्ण्णवदेत् विभक्तिप्रदेशेषु सुप्तिङितिन वक्तुं शक्याम्
तत्र यत्रेत्यादौ न स्यादव्यत्वानापत्तेः॥ ९ आख्यानादित्यस्यार्थमाह अन्यथेति· औजसोरिति स्वावोरिति नोक्तं जसत्वादर्थकान्तादिवीतिर
चग्रहात्सोरिति त्वकृते शिवोऽर्च्य इत्यत्र बोध्यम्· तस्मात्क्वस इति लिंगमप्यत्र बोध्यम्॥ ९ लेनज्ञापकेन प्राग्दिशीये प्रत्ययेऽनुदात्तौ सुप्पितावित्यस्य
प्रवृत्तेश्चेति चेन्न· त्रलादीनां विधानसामर्थ्यकल्पनेन त्रलो लित्वस्य ज्ञापकत्वाश्रयणेन मनोव्यापारगौरवस्य स्पष्टत्वात् प्रभिरत्येन तत्परद्वयकरणं स्वास
वेदा इत्यत्र दाः इत्यत्र दा प्रत्ययस्य विभक्तिसञ्ज्ञायां प्रत्ययाद्युदात्तत्वेनान्तोदात्तत्वम्भवति। सुप्सञ्ज्ञायां तु सोवर्यः स तम्य इति सिद्धान्तादौ विभक्तिनिमित्त
काद्युदात्तत्वेऽपि पुनर्दान्तस्य सर्वस्य सुपीत्याद्युदात्तत्वापत्त्या वनुदात्तत्वापत्तेश्चेति। समावेशार्थ इति· तेन युष्मद्युपपदे इत्यादिप्रवृत्तिः। न त्वन्यतरबाधः। वचनद्वयप्रा
माण्यान्नदाहापर्याय इति· ननु त्रीणि त्रीणीत्यस्यानुवृत्तौ अष्टन आ विभक्ताविति सूत्रविषये सामर्थ्यान्निर्वाहेऽपि प्रथमयोरित्यत्र वचनयोरेवग्रहणम्प्राप्नोतीत्य

नउआदः प्रथमयोरित्यत्र विभक्तिः। वाच्ययोरिति। त्रिक इत्यर्थः
विभक्तिरष्टत्रिति। त्रिकोऽयमिति कमनता॥

राम: १७६

भ॰ इत्यादेः सिद्धिरिति आदिनायुवतिकायाः अन्यथांतरंगत्वाद्देवट्चापोः पूर्वमप्यूढादेः सिद्धेः स्त्रीप्रत्ययांताच्चेत् ङ्यावंतादेवेति नियमार्थत्वापत्त्या ष्यूङोः पूर्वमनुत्पत्तावसिद्धिः।
स्यात् मानं तु प्रत्याख्यानपरं भाष्यमेव। एतच्चेति। तिप्रत्ययाद्वृत्तीत्यादिना स्वतंत्स्वार्थिकपरिग्रहः। यूनीतिरिति। उक्तार्थेति न्यायस्तु स्त्रीप्रत्ययप्रकरणेनेति प्रत्ययारंभा
द्बाध्यत इति भावः। एवं चेति। लस्यानुरोधे न तस्य तदन्यपरत्वे चेत्यर्थः। आरभ्येत्यनेन समासांतपरिग्रहः। पठितेष्विति शेषः। व्याख्यानादिति ङ्यापग्रहणस्य स्त्रीप्रत्यय
मात्रोपलक्षणत्वस्य प्रत्याख्यानानुरोधेनावश्यकत्वेन तद्धिततद्धितस्यैव तेन ग्रहणमिति सूत्रमतेपि यूनस्तिरित्यत्र न तदसंबंधः अन्यं तत्स्वार्थिकादिषु तेषामतिरिक्तार्थाभा
वेन परिपूर्णमिति न्यायाविषयत्वात् यासुवंताद्धित इति सिद्धांतस्य ङ्यापोः प्राक्प्रवृत्तेश्चाभावात्तदसंबंधः न्यायसिद्धेर्थे सम्मतिमप्याह· सर्वस्येति। तत्र भाष्ये उक्तार्थोसं
स्पर्शादाह· कैयट इति। अत्र केचित् प्रत्यवतिष्ठंते तत्र हि भाष्ये पदग्रहणं कर्तव्यं समासनिवृत्त्यर्थं सप्तपर्ण इत्युक्तं यदा सप्तसंख्याकपर्णविशिष्टो वृक्षः एकत्वादिसंख्या
वल्लिङ्गिनः वीप्साविषयत्वाभिबोधसमये इत्यैकत्वस्यानुभवाद्भिमन्तु त्यक्तेः प्रागेव समासस्य प्राप्तिरपवादत्वान्न भवति हते स्वादौ पदत्वेपि संख्यालिंगितार्थवीप्सितत्वा
भावान्न भवति तदा लिंगितेति वीप्साविवक्षायां तु भवत्येव घटपटं पश्येतीतिवत् इति भावः सप्तसंख्यानिपर्णायनिवीप्सं तेन नतु तद्वान्वृक्ष इति कैयटस्तु चिंत्य एव वृक्षादेरवी
प्सितत्वे विभक्त्यंत इव द्विर्वचनाप्रसक्त्या पदग्रहावश्यकत्वासंगतेः ततः तद्धितनिवृत्त्यर्थं च द्विपदिकेति स्त्रीत्वलक्षणलिंगसंख्यान्वितः पदार्थो वीप्स्यते न तु एकत्वालिं
गित इति वीप्साविषयत्वाभिबोधसमये एकत्वादेरननुभवात् सुवुत्पत्तेः प्राक् पूर्वांतत्वेन तद्धितानस्य टावंतस्य द्विर्वचनं प्राप्नोति पदाधिकारात्तु न भवति कृते सौ
हल्ङ्यादिलोपे च पदत्वेपि तदर्थकस्यैकत्वालिंगितस्या वीप्सितत्वान्न भवतीति त्वेनु भवत्येवेति भावः। यत्तु कैयटः स्त्रीत्वस्यापि वीप्सायामनंतर्भावमाह तन्
न सम्यक् द्विपदिकाभ्यामित्यत्र प्राप्नोतीति वक्ष्यमाणभाष्यासंगतेः न हि लिंगस्यापि वीप्सितस्यापि बहिरंगत्वेनोभयोः तयोः परत्वाट्टाबेवस्यादिति वाच्यं सांकृटि
नादिलक्ष्यानुरोधेनोक्तान्तरंगत्वस्यैव पुरस्कारादिति कैयटाशयः। एतेन समासस्यांतरंगत्वेपि प्रतिपदोक्तत्वात् इत्युणस्यादित्यपास्तम् इत्युणंत निष्ठधर्म
वयोपस्थितावण् विध्युपस्थितावाः ण्विधेर्विलंबोपस्थितिकत्वात् प्रत्युत तन्निष्ठावश्यकसमर्थत्वरूपधर्ममात्रोपस्थितौ समासविध्युपस्थित्यात्र स्यैवनत्वान्

प्र·शे· मे· एकग्रहणमिति· यथैकवचनेति· अत्रैकशब्दस्यानुपादानेन प्रसिद्धस्यैकशब्दार्थैकत्वस्याभावेप्येकवचनसिद्धिरितिभावः। बहुषुबहुवचनमित्यनेनशा
टी·भै· स्त्रेणबहुत्वेबहुवचनस्यवृत्तिरुक्ता विनातत्रकेषांबहुष्वित्याकाङ्क्षायांयेषुकर्मादिषुबहुवचनंविधीयतेतेषांबहुष्वितिभाष्येउक्तम्। अत्रकेषांबहुष्वित्यत्र प्र
टी·भ· क्त्युपादानाद्बहुत्वंबहुवचनंवोध्यम्। नचबहुत्वन्नसङ्ख्यानियतविषयपरिच्छेदहेतुर्हिसङ्ख्या। बहुत्वन्तुनतथा। नचबहुत्वस्यासङ्ख्यात्वेसुपांकर्मादयोप्यर्थाः।
१७५ सङ्ख्याचेत्यनेनविरोधइतिवाच्यम्। तत्रत्यसङ्ख्यापदेनबहुत्वस्याप्युपलक्षणत्त्विचतुरादिव्यक्तौनोविवक्षायामपिबहवइतिप्रयोगात्। अतएवबहुगणेतिसूत्रभा
ष्येप्यसङ्ख्यांसङ्ख्येत्याहसङ्ख्यावश्यम्भवतीत्युक्तम्। नच्चबहुत्वंत्र्यादिसङ्ख्याव्यापकमखण्डोपाधिरूपम् किन्त्वलोकेघटाइत्युक्तेकतीतितद्व्याप्यसङ्ख्या
जिज्ञासाभवति यदिबहुत्वमेवनियतविषयपरिच्छेदम्भवेन्नर्हितादृशजिज्ञासाबोधकव्यवहारोनस्यात् नचयत्रघटत्रयविषयकंघटाइत्याकारकंज्ञानन्तत्रबहु
प्रकारकज्ञानेपित्रित्वप्रकारकनिश्चयाभावात्त्रित्वप्रकारकसंशयप्रतिबन्धोनस्यात् दितिवाच्यम् द्वित्वादिबहुत्वस्याप्यपेक्षाबुद्धिजन्यतयायदापेक्षाबुद्धिविशेषज
न्यबहुत्वप्रकारकप्रत्यक्षन्तदात्रित्वप्रकारकप्रत्यक्षसामग्र्या अपिकल्पनेनजायमानत्रित्वादिप्रकारकप्रत्यक्षेणप्रतिबन्धात्संशयानुत्पादात् यत्रतुनप्रत्य
क्षविशेषसामग्रीतत्रबहुत्वस्यापिनप्रत्यक्षम्। नचैवमपियत्रघटाइतिबहुवचनान्तशब्दप्रयोगस्तत्रत्रित्वत्वस्यबहुवचनार्थतानवच्छेदकतयातदवच्छि
न्नप्रकारताकशाब्दबोधासम्भवेनतादृशसंशयापत्तिरितिवाच्यम् इष्टापत्तेः यदात्रयइत्यादिशब्दान्तरात्त्रित्वादिशाब्दधीस्तदैवसंशयनिवृत्त्यभ्युप
गमात्। नचबहुत्वस्याखण्डोपाधित्वेः भावत्ववत्प्रत्येकवृत्तितयाप्यकिञ्चिद्व्यक्तिविवक्षायामपिघटाइतिप्रयोगापत्तिरितिवाच्यम्। त्रित्वादिव्याप्ति
विशिष्टपर्याप्तेरेवबहुत्वसम्बन्धत्वोपगमेनैकस्मिंस्तादृशपर्याप्तिसम्बन्धेनतस्यासत्त्वात्प्रामाणिकानांतथाव्यवहारः। अतएवदाराइत्यादौबहुवच
नस्यारोपेणसाधुत्वस्वीकारःसाधुसङ्गच्छतइत्याशयादितिदिक्· ननुबहुष्वितिसूत्रेबहुशब्दस्यबहुत्वार्थकत्वेबहुवचनासङ्गतिरतआह। बहुवचा रामः
नन्त्वाश्रयेति· नन्वेकव्यक्तावपिदारशब्दस्यबहुवचनान्तस्यप्रयोगोदृश्यतेसचवाच्यार्थबहुत्वाभावादसङ्गतइत्यतआह· दाराइत्यादाविति· ॥ १७५

मे॰ कोशव्द्व्यवहारेति॰ कोशब्दयथा दाराःपुंसिभूम्न्येवेतिव्यवहाराद्यथा गुरवःसमागताइत्यादौ।रामइतीति॰ रमन्तेयोगिनोयस्मिन्निनुत्पत्त्याहलश्चेतिघञाकृद
न्ततयाप्रातिपदिकत्वात्स्वादयः।कार्यकालपक्षाभिप्रायेणाह।एकदेशविकृतन्यायेनेति॰।रेफान्तसमुदायेसान्तनिष्ठपदत्वस्यातिदेशः।एतेनसकारमात्रस्यरुत्वेस्था
म॰ कोशादपिव्यवहारस्यप्राबल्यमितिध्वनयितुमाहभर्तृदारेति।अयंस्मार्तप्रयोगः अन्यःशावरभाष्यीयः।रुत्वेइति॰।सुबन्ततयेति॰।हेतौतृतीया॰सुबन्त
ताहेतुकंयत्पदत्वंतदेकदेशविकृतन्यायेनकृतेरुत्वेइत्यर्थः यथाश्रुतंनसाधुतेनन्यायेनविकृतावयवनिबंधनकार्यस्यानतिदेशात्ममत्तुप्रदेशाप्रवृत्ति
द्योतनायदंचपक्षद्वयेपिबोध्यम॰ अग्नीइत्यत्रेवरुत्वस्यासिद्धत्वानुबुध्याप्रवृत्त्यापुनःपदत्वमित्यादिप्रागुक्तंनविस्मर्तव्यं।सरूपविभक्तंनानांसरूपा
सचकोशव्द्व्यवहारानुसारेणैवेतिनातिप्रसङ्गः।भर्तृदारयोरपतेजसोरित्यादौद्वन्द्वेतुद्विवचनमेवारोपेमानाभावात् अत ए
वद्व्येकयोरितिसङ्गच्छते एतेनैकस्मिन्नपिगुरवःसमागताइत्यादिसमर्थितम अन्वर्थसंज्ञयैवसिद्धेरिदंसूत्रद्वयंस्पष्टार्थ
म रामइति॰ रुत्वेएकदेशविकृतन्यायेनसुबन्ततयापदत्वाद्विसर्गः।सरूपाणामे॰ वृद्धोयूनेतिसूत्रादेवकारोऽपकृष्यतइत्याह।
सरूपाण्येवेति॰ तेनजननीपरिछेतृवाचिनोर्मातृशव्दयोर्भ्यामिनैकशेषः नचैकविभक्तौविति व्यर्थंयानिसरूपाण्येवेत्यु।
नैवोक्तदोषवारणादिति वाच्यम हरिणस्त्रीवाचकहरिणीशव्दस्यहरितवर्णविशिष्टस्त्रीवाचकहरिणीशव्दस्यचैकशे
णामेकशेषइति——साधारणंफलंवक्तुमाहभ्यामीतिायद्याएवकारापकर्षाभावेउपलक्षणस्यातिप्रसंगमात्रं।भ्यामीतिसिद्धांतपक्षेत्वौजसादावपिनद्याहृत्ति.
फलंबोध्यंध्वंनितंचेदंभ्यामादावपीत्युक्तावहति॰॥ ९.नितयातन्निष्टसुत्वस्यरुशव्देऽल्विधित्वादतिदेशोदुर्लभइत्यपास्तम।भ्यामीति॰भ्यामादावित्यर्थः॥
एवकारवलेनान्वयितावच्छेदकावच्छेदेनविधेयान्वयवलाद्विभक्तित्वावच्छेदेनसारूप्यएवैकशेषइतिभावः॥ ॥ ॥ ॥

प्र॰ शे॰ भै॰ पुंवद्भावेनेति॰।भस्याढे इति सूत्रविहितेनेत्यादिः। नन्वेकशेषस्यापरनिमित्तकत्वेनान्तरङ्ग॰ तयाबहिरङ्ग॰ दीर्घादीनामसिद्धत्वान्मातृशब्दयोर्वैरूप्यादश

टी॰ भै॰ नादेकशेषोदुर्वार इत्यत आह। लौकिइति सचपरिनिष्ठितएवतत्र वैरूप्यंदृश्यतएवेतिभावः। प्राप्तिरेवनेति॰ एतावते॰॥ ॥ ॥ ॥

टी॰ भ॰ वद्भावापवाद एकशेष इति व्यवहारः। नचसर्वशब्दस्य सञ्ज्ञाभूतस्यासर्वनामत्वाज्जसिसर्वा इति सर्वनाम्नस्तु सर्वे इत्येवं वैरूप्यादेकशेषो न प्राप्नोतीति वाच्यम्। विभ॰

१७६ क्ताविति सप्तम्यन्तोपादानेन तत्परत्वयोग्यप्रातिपदिकांश एव वैरूप्याभावस्य विवक्षितत्वात्। नचैकविभक्तावित्यस्यैकत्वसङ्ख्यावच्छिन्नविभक्तावित्यर्थ

भ॰ तद्धितार्थवि—ति॰ आदिनाकप्॰ हारितं हारिणं हरिणीयते हरितायते इत्यत्रा ननु सत्यप्येवकारापकर्षे मातृमात्रोरेकशेषो दुर्वारः अलौकिके औजसा

दावपि वैरूप्यादत आह॰ लौकिकेति॰। यद्यपि विरूपाणि नेत्यर्थपर्यवसानात् लौकिके च वैरूप्यात्॰ तत्र समुदाय एव तथापि अन्यतरीयं लौकिकं अपदीय

पुम्वद्भावेन तद्धितादौ वैरूप्यात् दृष्टानीति॰ लौकिके प्रयोग इति शेषः एकशेषश्चायमनैमित्तकत्वेनान्तरङ्ग॰ त्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति

एतद्विषये हन्तु प्राप्तिरेवनेति बोध्यम् ननु तन्त्रेणैव सिद्धेरिदंव्यर्थं यथा अक्षाभज्यन्तांभुज्यन्तामदीव्यन्तामित्यत्राक्षा इति

मलौकिकमादायाव्याप्ति वारणंशेषफलं बोध्यमिति वदंति। अत्र वैरूप्यमपि प्रातिपदिकांश एव तेन संज्ञासर्वनाम्नोः प्रथमासर्वादिशब्दयोरेक

शेषः अन्यथाजसि प्रथमे प्रथमा इति नस्यादिति बोध्यमित्यन्ये॥ ॥ ॥ ॥ ॥ ॥ ॥

र्थो न सम्भवति। यत्रैकशेषस्तत्र समुदायादेकविभक्त्यभावेनैकशेषशास्त्रस्य वैयर्थ्यापत्तेः। एकजातीयायामित्यर्थे स्वसा च स्वसारौ च मातां च मातरौ। १७६

चेत्यत्रैकशेषानापत्तिरिति वाच्यम्। लौकिकप्रयोग इत्यस्यैकशेषप्रवृत्त्युत्तरमुत्पत्तियोग्याया विभक्तिस्तस्यामित्यस्यैकशब्दोपादानेन विवक्षितत्वा।

त्‌ तन्त्रेणैवेति॰ सकृदुच्चरितस्यैकस्य शब्दस्यानेकार्थप्रतिपादकत्वं तन्त्रम्॥

मै॰ दीर्घापत्तेरिति। नचनिङ्‌संज्ञैवास्तु।निघातापत्तेः।अस्मिन्व्याकरणइति· नेनेहेत्यस्यास्मिन्प्रकरणइत्यर्थकत्वभ्रमनिरासः। ननुसुविनिसप्तमीवहुवचनस्यैवग्रहण
मस्त्वित्यतआह·प्रत्याहारादिति· अनेकसंज्ञाकरणादित्यादि। नन्वादश्यतः सङ्‌ख्याशब्दस्यसङ्‌ख्येयपरतयाद्वित्वैकत्वयोरित्यनुपपन्नमतआह· नसङ्‌ख्येयपराविति
भ·सुप्संज्ञेति·तिङ्‌संज्ञाप्येवमेवतदंताद्यापत्तेः।रामइहेत्यादौनिघातापत्तेश्च।दीर्घापत्तेरिति·।सन्निपातपरिभाषयादीर्घवारणेतुसर्वत्रेत्यादैस्सर्वस्यसुपीत्याद्युदाहृता

तेषांसुप्संज्ञात्वशङ्का। एतर्हीत्यादौसुपिचेतिदीर्घापत्तेः।सप्तम्यन्ताइतिस्त्रीलिङ्गइतिशेषः प्राचांवैयाकरणानामितीहापि
अस्मिन्व्याकरणेपि सुपः सुविनिप्रत्याहारात्षष्ठ्यत्र द्व्येकयोः नियमार्थेइमे इहसूत्रे द्व्येकशब्दौसङ्‌ख्यापरौनसङ्‌ख्येयपरौवहुव
चनापत्तेस्तदाह द्वित्वैकत्वयोरिति· लौकिकप्रयोगत्वादशनः सङ्‌ख्याःसङ्‌ख्येयइतिकोशभाष्याद्युक्तेःसङ्‌ख्येयपरत्वेएवप्रायः
साधुत्वं क्वचित्सङ्‌ख्यापरत्वेपिसङ्‌ख्येयग। नसङ्‌ख्यारोपेणसाधुत्वम् अतएवैकस्यद्वित्वेइत्याद्यर्थकयोर्द्वयोः केषांवहुष्विति
निभाष्येप्रयुक्तमितिवोध्यम् एकशब्दोद्विशब्दसाहचर्यात्सङ्‌ख्यावाच्येव एकग्रहणंत्यक्त्वैकवचनमुत्सर्गःकर्त्तव्यस्तेनाव्ययेभ्यः
पचतिकल्पमित्यादौचव्यर्थैकवचनप्रयोगसिद्धिरितितद्धितश्चेतिसूत्रेभाष्येस्पष्टम् वहुषु वहुशब्दोऽत्रत्रित्वादिपरार्द्धान्तसङ्‌
ख्यानांव्यापकोयोधर्मविशेषोवहुत्वंतत्परः। वहुवचनत्वाश्रयगतंवहुत्वंधर्मआरोप्यकृतं तेनवैपुल्यवाचिनोनग्रहणम्॥
दाराइत्यादौत्ववयवादिगतवहुत्वस्यावयविन्यारोपोवोध्यः॥ ॥ ॥ ॥ ॥

पत्तिर्वोध्येत्यन्यत्रविस्तरः वहुषु। नग्रहणमिति· तेनवहुच्चर्वतइत्यादौननवात्रपरत्वादेकवचनंस्यादितिवाच्यम्·तस्यौत्सर्गिकत्वेननतस्यतदपवादत्वादि
ति·वहुवचनापत्तेरिति·एवंहिसतिद्व्येकेष्विति स्यात्। प्रायःसाधुत्वमिति·एतत्फलमाह· क्वचिदित्यादि· नन्वेकशब्दस्यान्याद्यर्थकस्यापिग्रहणंस्यादतआह·

भै· कुटुम्बधारणइतिधात्वर्थानुसारात्तत्र्व्यवहारउभयत्रापिसंमतसएव॥ ॐ ॥ परन्तुयत्रानेकार्थबोधजायतामितीच्छयावक्तुः शब्दोच्चारणानुकूलाकृति
सत्वतन्त्रेणोच्चारणमितिव्यवहारो यत्रतुननादृगिच्छातत्रतथाव्यवहाराभावः। इदन्तन्त्रेणोच्चारणमनेकक्रियान्वयविवक्षायामेवसकृदुच्चरितः शब्दःसकृदर्थंग
मयतीत्याशयेनाह· अन्वयीति· अन्वयानुयोगिधात्वर्थस्यभेदादित्यर्थः। एकत्वइति· नचक्रियायांसङ्ख्यानन्वयादेकत्वइत्यसङ्गतमितिवाच्यम् सङ्ख्याकृतपरि
च्छेदशून्यत्वेइत्यर्थात् एकस्थितीति· दृश्युपस्थापितदर्शनेबहुवचनान्तेनाक्षानितिपदेनतन्त्रेणोपस्थापितानांदेवनाक्षरथाक्षविभीतकाक्षाणामन्वयः।तत्फ

अन्वपिपदार्थस्यैकत्वेतु एकोपस्थित्यैवान्वयो यथाक्षान्पश्य घटान्पश्येत्यादाविति चेत्सत्यम् सरूपाणामेकश एवेतिनि
यमार्थत्वात्· तत्फलंतु प्रत्यर्थं शब्दनिवेशस्यापिदर्शनेन कदाचिन्नाहशप्रयोगप्रसङ्गः द्वन्द्वस्यनि· ——————— ॥
वृत्तिः सचायंनियमो विभक्तौयानिसरूपाण्येवतद्विषयः सहविवक्षाविषयश्च। अतएवविभक्त्यन्तानामेकशेषइतिपक्षेद्वन्द्वप्र
तिषेधोवक्तव्य इत्याशंक्यानवकाशएकशेषोद्वन्द्वंबाधिष्यतेइतिभाष्येउक्तम् किञ्चासहविवक्षायामपितत्प्रवृत्तौ सहवि
वक्षायांद्वन्द्वस्येवान्यत्रकर्मधारयस्यापिबाधापत्तौसारवसारवोमिंजइत्यादिप्रयोगविरोधापत्तिः॥ ॥

लन्त्विति· नियमफलन्त्वित्यर्थः। प्रत्यर्थमिति। अर्थमर्थम्प्रतीत्यर्थः। अत्रापिना अर्थावर्थौप्रतीतिभाष्योक्तविग्रहोपिसूचितः। तद्विषयइति· सूत्रस्यार
स्यात्। अन्यआह। अतएवेति· सहविवक्षाविषयत्वस्वीकारादेव। प्रकृतसूत्रेतिष्यपुनर्वस्वोरित्यतोद्वन्द्वइत्यपकर्षणादेतल्लाभः। तस्यापकर्षमकृत्वातादृ
शनियमास्वीकारेदोषमाह· किञ्चेति· सारवसारवइति· आरवैः सहिताः सारवाः सरघाभवाः सारवाः। सारवाश्चतेसारवाश्चऊर्मयस्तेषुजातइत्यर्थः 

भे॰ विभक्त्यनन्तत्वत्वं सहविवक्षायामपि स्वीक्रियत इत्याह· असहविवक्षेति· ब्राह्मणाभ्यामिति तृतीयान्तस्य चतुर्थ्यन्तस्य च। पयइति द्वितीयान्तस्य प्रथमान्तस्य चानवमेका
व्यपकाशे भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशौ तन्वती युष्माकं कुरुता
म्भवार्तिशमनं नेत्रे तनुर्वा हरेरिति लिङ्गवचनश्लेषोदाहरणम् तथा विहन्मानसहंस वैरिकमलासङ्कोचदीप्तद्युते दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वान
र सत्यधीतिनिधान दक्षविजयप्राग्भाव भीम प्रभो साम्राज्यं वरवीरवत्सरशतं वैरञ्च्यमुच्चैः क्रियाः इति द्रुमोल्लासे उक्तम्। अत्र विदुषां मानसाभिन्नमान

असहविवक्षाविषयेण विभक्त्यनन्तत्वेन ब्राह्मणाभ्यां कृतं देहि पयो जरयति इत्यादि नीलोत्पलस्पर्द्धिनी नेत्रे तनुर्वा हरेरिति व
हिहन्मानसहंसेति वच्चोष्ठमेवेति बोध्यम् न चासहविवक्षायां तन्त्रसत्त्वे इदित इति गुरुनिर्देशो व्यर्थः अन्यपदार्थावगतये तत्स
त्वात् द्वयस्य धानोरिति करणे तु गौरवम् एतच्च सूत्रभाष्यप्रत्याख्यातम् अर्थावर्थौ प्रतिपदर्थानर्थान्प्रतिवचन इदपि प्रत्यर्थ
मेवत्याश्रयणेन॥ अनेकघटादिपदानां साहित्ये वृत्तिरेवनानभिधानात् एकस्यैव त्वनेकार्थस्य तन्त्रवृत्तिरभिधानस्वाभा
व्यादिति तदाशयः॥

साधिकरणकहंसेत्याद्यर्थः। एतेषु सहविवक्षाया अभावेपि तुल्यत्वात्मकस्य तन्त्रकारणस्य सत्त्वात्तन्त्रसद्भावो नानुपपन्नः
शब्दानां तुल्यरूपत्वमेव तन्त्रकारणम्। तदुक्तम्। अक्षादिषु यथा भिन्नामक्षिभङ्गि विक्रियाः। प्रयोगकालाभेदेपि प्रतिभेदं पृथक्स्थिताः। अक्षाणां तन्त्रेणा
नन्वेवं पायस तुल्यरूपतेति। भाष्यकृत्सम्मतमेकशेषप्रत्याख्यानमाह· एतच्चेति· नन्वेवं सूत्रप्रत्याख्याने यदानेकेन नानाप्रतिपादनविवक्षा किन्तु प्रतिम
क्तिप्रतिपादने च्छान्तदानेकघटशब्दानां सहप्रयोगः प्राप्नोतीत्यत आह· अनेकघटादिपदानामिति· सूत्रारम्भवादिमतापेक्षया प्रत्याख्यानवादिमतस्य प्र

भै॰ तन्त्रपरइति॰ विभक्त्यन्तन्त्रपरः।सूत्रारम्भपक्षे एकग्रहणेपिविभक्तित्वव्याप्यरूपेणसाजात्यविवक्षयायद्धर्मावच्छिन्नेसारूप्यन्तत्रैकशेषलेनभ्यामाद
वेकशेषोभवत्येवतेषुसारूप्यसद्भावात् नत्वौजसादिषुतत्रवैरूप्यादितिकेचित् तन्मतंदूषयन्नेकग्रहणफलमाह॰ एकविभेति॰ एवकारलभ्याभावप्रतियोगि
भू॰ तंविरूपत्वंविभक्तित्वावच्छेदेनविवक्षितमितिभावः।यत्तुसमाहारविवक्षायामप्येकशेषेणभवितव्यंसूत्रारम्भेऽनभिधाने प्रमाणभावात्तत्रापिसूत्र
म्प्रवर्त्ततएव॰ अन्यथाघटघटाविन्यस्याप्यनभिधानेनैववारणेनसूत्रस्यैववैयर्थ्यादितिकश्चिदाह।नचैवंशिष्यमाणादेकस्मात्समूहस्यतरेतरयोग

भ॰ नन्वेकशेषस्यसहविवक्षायाविषयत्वेकथमन्यत्रतदुक्तिरतआहद्विर्वचनेतिस्पष्टार्थमिति।सूत्रारंभसामर्थ्यात्वक्ष्यमाणोत्तरार्थस्या
पिबोधयितुंशक्यत्वेनवक्ष्यमाणएवार्थइतिस्पष्टतयाबोधनार्थमित्यर्थः एकस्यामपीति॰ समानायामित्यर्थः।बोधयितुमिति।अन्यथाचाल

द्विर्वचनेचेत्यादावेकशेषशब्दस्तुभाष्येतन्त्रपरः सचोच्चारयितुः।बोद्धुस्त्वावृत्तिरेवेतिबोध्यम् एकविभक्तावित्यत्रैकपदन्तुस्प
ष्टार्थम् एकस्यामपिविभक्तौयानिविरूपाणितेनत्यर्थेबोधयितुं ध्वनितञ्चेदम्विभक्तिःसारूप्येउपलक्षणमितिभाष्येएकपदा
नुच्चारणेनसमाहारद्वन्द्वविषयेतुनैकशेषः॥ ((नीन्यायेनभिन्नविभक्तौवैरूप्यमादायासंभवःस्यात॰रामौरामाभ्यांस्वसास्वसारौइत्या
दौभिन्नविभक्तौसर्वत्रवैरूप्यस्यसत्वादितिभावः नैकशेषइति।वृद्धौपूनेत्यादिविरूपैकशेषस्यपक्षेगार्ग्योगार्ग्यइत्यादौसमाहारेएकशेषोनगार्ग्य
इत्येकवचनंनविभक्त्यं तंतत्रतुनवैरूप्यात्सरूपैकशेषस्थलेतुतत्रैणरामइत्यस्यदुर्वारत्वात्॥ ((स्यवाप्रतीतिरित्यत्रविनिगमकाभावइतिवा
च्यम्॰ प्रकरणादेरेवनिर्णायकत्वादन्यथाघटाइत्यादौकदाचिद्व्यक्तित्रयस्यकदाचिच्चतुर्सांप्रत्त्वानांवेत्यत्रापिनियमोनस्यात्॰समाहारविवक्षायाम १७८
र्य्यासाधारण्ययोर्द्विवक्षायै द्वयोरपि प्रत्ययपदयोः सामर्थ्यं वर्णनीयं तच्चासंभवि लोपेस्थानिवदित्युक्तावतिप्रसङ्गस्योक्तत्वात् उभयोरप्यभावे प्रत्यासत्तेरप्यु
क्तयावक्तुमशक्यत्वात् तृतीयस्य च प्रत्ययपदस्य भगवता प्रत्याख्यानात् तथा च कोस्य भाष्यस्याशय इति चेदित्थं तावन्मात्र फलकत्वे मात्रालाघवाय प्र
तिपत्तिलाघवाय च कृत्स्न प्रत्ययलोपे इत्येव ब्रूयात् इति न चैवमपि प्रत्यय ग्रहणसामर्थ्यादवधारणान्तर्भावेण समासेऽसाधारण्यलभ्यतां स्वसमा
नाधिकरण वर्णविशेषत्वरूपं प्रत्ययस्य प्राधान्यं दुर्लभम् तं विनापि तस्य चारितार्थ्यात् एवं च चित्रायांजाता चित्रा इत्यादावनिष्टं ङीवादिविधाय
कत्वमेवास्य स्यान्न नियामकत्वमिति चेन्न अकारान्तायेटिङ्गादयः तदन्तं यस्मात्तिपदिकं तदन्तादिति तदर्थाङ्गीकारेण नत्विधावित्यनुवृत्तेर्वि
धिपक्ष इव विशेषण सामर्थ्यात् श्रूयमाणाकारान्तादित्यर्थाङ्गीकाराद्वा तत्रास्याप्रवृत्तेः स्पष्टं न्यायमन्यः प्रकारः प्रकृतसूत्रे कैयटे अस्तिसिचो
पृक्त इति सूत्रे शेखरे च न चास्य पक्षे सर्वशमारज्जुरित्यत्र ङीवर्थनञ्मात्रजिति प्रत्याहारनिर्देश इति सिद्धान्तेकतिस्त्रिय इत्येतद्धारणया वक्ष्य
कत्वेनान्यत्र इचात्र सामर्थ्याभावादितिवाच्यं नषडितिनिषेधेनापिकतौन्यस्य सुसाधुत्वात् अस्तु वा श्रवणेन्यादिनिर्देशेनउक्तप्राधान्यस्य
लाभ इति दिक् तत्रैवेतीति तदेतियुक्तं अम्यत्रेति यङ्लुङन्तशेखर इत्यर्थः एवं पास्पर्द्धीति वक्तव्ये वेभिदीति उक्तिमात्रमेकदेशिनो न्यास्यं चेसिद्धा

मे॰ ननुप्रत्ययनिमित्तकंकार्यंस्यादितिव्याख्यानेप्रत्ययलोपसूत्रेणैवकार्यप्राप्तिर्वाच्या।एवंसतिपरिवीरित्यत्रव्येञः क्विपिसम्प्रसारणेकृतेक्विपोलोपेप्रत्
यलोपशास्त्रेणतुग्दीर्घत्वयोःप्राप्तौपर्यायस्तयोःस्यादेकदेशस्थत्वादतआह· इहापीति· प्रतिपादितमितिशेषः। अन्यथा· तद्देशस्थत्वानङ्गीकारेसूत्रस्यासिद्धा
म॰ नलुमताङ्गस्येतदुद्देश्यकमिति· तत्पूर्वत्वेनतदुद्देश्यकमित्यर्थः अन्यथासुबन्तत्वेनतत्पूर्वभागस्याराजनित्यस्योद्देश्यतासत्वात्राजपुरुषेपदत्वं
नस्यादितिबोध्यम् संज्ञाचनेति· आद्यपक्षेइतिशेषः जातातिष्ठतीति· वक्ष्यमाणरीत्याजातेपिलुकितत्प्रवृत्त्यालुकोऽनरङ्गाङ्गसंज्ञानिमित्तविनाश
कार्यमिति· प्राधान्यात्कार्यातिदेशोयमितिभावः। इहापिपरिवीरितिशास्त्रपरविप्रतिषेधेनपरत्वाद्दीर्घत्वंभविष्यतीतिभा
ष्येणतज्ज्ञत्सूत्रेशास्त्रकार्य्यातिदेशयोरैक्यकथनेनचातिदिश्यमानकार्याणामुत्पत्तिदेशएवदेशइत्यङ्गीकारात्परिवीरित्य
त्रतुग्दीर्घौपर्यायेणन किन्तुदीर्घएवपरत्वात् अन्यथानैवोभयोर्विधानात्परत्वाभावेनपर्यायोदुर्वारइतिबोध्यम् तदाह जसिचे
तिगुणेप्राप्तइति· जसिचेतिविहितगुणेप्राप्तइत्यर्थः। नलुमता· लुशब्दयुक्तालुमतास्तदाह लुगित्यादि· अङ्गकार्यमिति· लुप्तप्र
त्ययेपरतोयःपूर्वस्तत्प्रकृतिभूतोलब्धाङ्गसंज्ञस्तदुद्देश्यकंयत्कार्यमाङ्गमनाङ्गंवेत्यर्थः। तेनपञ्चेत्यादौपदसंज्ञाभवतिराजपुरु
षादौभसंज्ञाचन· अङ्गसंज्ञातुयद्योद्देशत्वात्प्रत्ययसमकालेजातातिष्ठत्येव· तत्कालेकार्याभावादप्रवृत्तावपि प्रत्ययल
क्षणेनसा तस्यालब्धाङ्गसंज्ञककार्यत्वाभावेननिषेधाप्रवृत्तेःस्पष्टञ्चेदंयुवोरनाकाविसूत्रेकैयटे· नलुमतेत्यस्यानित्यत्वाद
कत्वाभावेनतत्रकर्तव्यायांतन्यायाप्रवृत्तेरितिभावः भसंज्ञायास्तुलुकिकृतेनलुमतेतिनिषेधाद्प्रवृत्त्यातद्रूपान्तरंगनिमित्तविनाशकत्वंलुकोस्त्येवेति
तत्रकर्तव्यायांतन्यायाप्रवृत्तिरितिबोध्यम्॥ ॥ ९ नार्थमाह· लुमतेत्यादि· लब्धाङ्गसंज्ञकेति· लुप्तप्रत्ययनिरूपितेत्यादिः तेन· लुप्तप्रत्ययपरतोयः
पूर्वस्तदुद्देश्यकत्वनिवेशेनाभसंज्ञा नेति· पदसंज्ञायांयथासमुदायोद्देश्यतातथाभसंज्ञानसमुदायोद्देश्यिका किन्तुलुप्तप्रत्ययपरतोयःपूर्वस्तदुद्देश्य

भ॰ इमन्तेकस्यनाहूयेनेतिगौरवमितिभावः ननु कान्त्येविवक्षायाः फलं विद्यार्थमितिपक्षे आम्नीयेति॰ नियमार्थमिदंसूत्रमितिपक्षेतर्हिविवक्षा
याः किंफलमितिचेच्छृणु तर्हिविवक्षांविनान्तस्यनियामकतायाएववक्तुमशक्यत्वमिति॰ किंच प्रथिमानमाचष्टे प्रथिमयतितिनतः क्विप् प्रथिमतस्य
समीपमुपप्रथिमम् इत्यत्रानश्चेति टचः सिद्धिः एवंवाग्मिनमाचष्टे वाग्मयतितिनतः क्विप् संयोगान्तलोपे वहवोवाग्मोयस्यांनगर्यांसाबहुवाग्मिकानग
रीत्यत्र इनः स्त्रियामितिकप्सिद्धिश्च एवंसर्वांत आचष्टे सर्वंतयतितिनतः क्विप् सर्वादित्यत्रात्वसन्तस्येतिदीर्घसिद्धिश्च अचः परेतिस्थानिवत्वं तु
नन्वमतेसपादसप्ताध्यायीस्थदीर्घविधौ तन्निषेधात् एवंसर्वाहिघतेयस्य ससर्वाह्णीसर्वाह्णिनावित्यत्रास्मायामेधास्रजइतिविनप्रत्ययस्यसिद्धिः एवं
सुसर्वादित्यत्रनसुधातोः क्विप्परमेणसमासेआचक्षाणेणिचिक्विपिपरमतसु नासमासेसुपरमन् इत्यत्रसोर्म्म नसी॰ अल्लोमोषसीतिस्वरसिद्धिश्च इ
हापिनस्थानिवत् आद्ये अपूर्वविधित्वात्॰ अन्त्ये स्वरविधित्वात् अन्यथा प्रसक्त्यावयवलोपेपिप्रसंयस्साधारणधर्म्मनिमित्तकमेवेतिनियमेनान्तत्वमि
न्तंनत्वमसन्तत्वंस्थानिवद्भावेनोत्पर्यदासेनक्वाचित् तन्सूत्रस्थपदान्तरसाहचर्येणश्रूयमाणतदन्तेष्वेवोक्तविधीनांप्रवृत्तिमङ्गीकारेणवक्ष्यमाणु
लक्ष्येषु तदप्रवृत्तिसिद्धौ प्रत्ययलक्षणसूत्रंव्यर्थं न साहचर्यन्त सर्वत्रव्यवस्थापकमितिहितत् ज्ञापनार्थं तदितिशब्दरत्नाद्युक्तं बहूनांज्ञापकानाम्
णांसत्वादिस्ययास्तम्॰ साहचर्येणतत्रैव तत्प्रवृत्त्यङ्गीकारे उक्तलक्ष्येषु तदप्रवृत्त्यापत्तिः नचेष्टापत्तिः सुदृषत्प्रासाद इतिभाष्योदाहरणस्यासंगत्यापत्तेःनि
यमार्थमिति॰ तत्फलन्तु सुदृषत्प्रासाद इत्यत्र स्थानिवत्वेनासन्तत्वात् स्वरदीर्घो न ननु निर्दिश्यमानपरिभाषया निर्दिश्यमानावयवाच एव दीर्घवि
धानात् कथमत्र तत्प्राप्तिरितिचेत् शृणु असपदस्यषष्ठ्यन्तत्वाभावेन तत्परिभाषाया अप्रवृत्तेरिति ननु अन्तरङ्गानपीतिपरिभाषया इत्संज्ञालोपा
भ्यांप्रागेवजसोलुकिस्थानिवत्वेनजसन्तत्वमेवनासन्तत्वं नचस्थानिवत्वेनजसन्तत्वेऽसन्तत्वमर्थसमाजग्रस्तमितिवाच्यं॰ एवंसति ज्याद्टिनद्
त्यादौस्थानिवत्वेनएयन्तत्वइत्यनिर्दिश्यमानणिवृद्धेरपिसमाजग्रस्तत्वेनषाष्ठद्वित्वस्यादेशेणिलोपोनस्यादितिभाष्योक्तेरसंगत्यापत्तेः एवंच न

भै· नचेति· अङ्गसञ्ज्ञाह्वारेति· अङ्गस्येत्यनेनसहतस्यसूत्रस्यैकवाक्यतयाङ्गत्वज्ञानस्यवाक्यार्थज्ञानेकारणतयाङ्गत्वज्ञानस्यपरप्रत्ययज्ञानप्रयोज्यतयोर
दत्वस्यापिपरप्रयोज्यत्वेनस्थानिवद्भावप्रवृत्तिरित्येवभाष्यप्रामाण्यात्कल्प्यतेननूत्तरपदत्वस्यपरनिमित्तकत्वंसास्यादितिभाष्ययोरविरोधइतिभावः। एत
न्मतेचलुप्तप्रत्ययेपरतोयःपूर्वोलब्धाङ्गसञ्ज्ञकइत्यर्थोनकिन्तुनाहशप्रत्ययपूर्वस्ययत्कार्यमाङ्गमनाङ्गंवातस्मिन्कार्येनिषेधइत्येवविवक्षितम्। अतएव।

भ· स्त्रीप्रत्ययेति· गोरवादितिस्त्रियांचेतिसूत्रेभाष्यकारैकदेशिनः तृत्वत्वमिति· ज्ञात्वंनिष्ठतीतिभावः अङ्गसंज्ञायांनलुमतेतस्याप्रवृत्तेरेवंचलुकोः
अतएवपञ्चभिःक्रोष्टीभिःक्रीतंकुलमितितद्धितार्थेतिसमासेठकोध्यर्द्धेतिलुकिलुक्तद्धितेतिस्त्रीप्रत्ययलुकिचपञ्चक्रोष्टृ
त्यत्रतृज्वत्वम् तदुक्तंभाष्येतृज्वदितिसूत्रे नचापरंनिमित्तमाश्रीयतेकिन्तर्ह्यङ्गस्यक्रोष्टुलृज्वदितिअङ्गसञ्ज्ञाचभवतिप्रत्यय
लक्षणेनेति· नचोरदत्ववत्तृज्वत्वेपिपरनिमित्ताश्रयणमितिपञ्चक्रोष्टृइत्यस्यासिद्धिरितिवाच्यम्· उरदित्यत्रशब्दतःपरस्य
निमित्तत्वानाश्रयणेपिअङ्गसञ्ज्ञाह्वारोरदत्वस्यापिपरनिमित्तकत्वेनस्थानिवत्वप्रवृत्तिरित्येवलित्यभ्यासस्येतिसूत्रस्थभाष्या
शयात्· नियमतःपरवृद्धेःपूर्ववृत्तितयापरनिमित्तत्वात् अतएवचर्करीतजर्घाइत्यादावत्वप्रवृत्तिरचिश्नुइत्यादावजादिप्रत्य
यइत्यर्थेतुअङ्गस्येतिषष्ठ्यानिमित्तेइत्यध्याहारेणतस्यविशेष्यतयायथाकथञ्चिदुपपाद्यः। आकडाराधिकारस्थैकार्यकाल
त्वाङ्गसंज्ञानिमित्तविनाशकत्वाभावादन्तरङ्गानपीतिन्यायाप्रवृत्तेःपूर्वमङसंज्ञायांतृज्वत्वेङीवादिरितिभावः॥ ७ ॥ ❁ ॥

अनित्यत्वेननलुमतेतिनिषेधाप्रवृत्त्याङ्गसञ्ज्ञत्वादेवायथाकथञ्चिदिति· शब्दाध्याहारेणोपपादनेक्लेशः। अत्रकार्यकालपक्षमाश्रित्यवत्रश्चेत्य
स्यसिद्धिः कैयटेनोक्तासानोचितेत्याशयेनाह· आकडाराधीति॥

भै॰ कार्यकालत्वमभ्युपेत्याह॰ वस्तुतस्त्विति॰ एतेन पदैकवाक्यतयाऽन्वयासम्भवेन। आवृत्त्या॰ अङ्गस्येत्यस्यावृत्त्या प्रकृते॰ युवोरनाकौ तृज्वत्क्रोष्टुरित्यत्र चालस्यानुरोधात्। नन्वनद्धिकारकद्धिपञ्चक्रोष्टृ इत्यादिलस्यानुरोधादित्यर्थः। तदाशयः। युवोरित्यादिसूत्रस्थभाष्याशयः। ननु क्रोष्टोरद्त्वस्य परनिमित्तकत्वे चर्करीतीत्यादावत्वं कथमत आह॰ चर्करीतस्येति॰ चर्करीति अजर्घाइत्यस्य सिध्यर्थमन्यकल्पितमर्थं निरस्यति। अङ्गस्येति॰

वस्तुतस्तु कार्यकालपक्षे एकोष्टुशब्दः प्रत्ययेऽङ्गसञ्ज्ञो भवत्यङ्गसञ्ज्ञकस्य च तस्य तृज्वत्त्वं स्त्रियामित्येवार्थ इति तृज्वत्त्वमनैमित्तिकमेव उरदित्यादौ गतिरुक्तैव॰ पदैकवाक्यतयाऽन्वयस्तु सञ्ज्ञासूत्राणां दुर्लभ इत्यन्यत्र निरूपितम् एतेनोरदित्यादौ त्वावृत्त्याऽत्वं प्रतिनिमित्ततापि वत्र श्चेति लस्यानुरोधान्न तथा प्रकृते लस्यानुरोधादेवेति तदाशयः। चर्करीत्यजर्घा इत्यादौ तु न लुमतेति निषेधान्नित्यत्वादत्वप्रवृत्तिरयं पाइत्यादौ गुणवत् अङ्गस्येति प्रत्ययनिमित्ते लुकि भवत्येवेति तु भुहितमित्यादावुवङापत्त्याचिन्त्यमित्यपास्तम्॰ त्रिषुसत्स्वाइति॰ उ॰ प्रथमयोरिति सूत्रे युष्मानित्यादौ तस्मा च्छसो न इत्युपन्यासपरेण भाष्येणास्वमोर्नपुंसकादिति सूत्रे शिशीनुमादिभिर्युष्मदाद्यादेशानां विप्रतिषेधपरेण वार्तिकेन तद्भाष्येण च नपडिति निषेधेन च लिङ्गसत्ताबोधनेऽपि लिङ्गबोधकप्रत्ययानुत्पत्त्या रूपेन विशेष इत्यर्थः। सामआकमिति सूत्रस्थस्यालिङ्गे युष्मदस्मदी इति भाष्यस्य पदान्तरसन्निधानं विना लिङ्गविशेषो युष्मदस्मच्छब्दमात्रा

पदैकवाक्यतान्वयो न सम्भवतीत्याशयेनाह॰ अपास्तमिति॰ किञ्चाङ्गसञ्ज्ञाहृ एकपरम्परयोरदित्यस्य परनि ९९ न्नमतीयत इत्यर्थ इति दिक्॥ मित्तकतया भाष्योक्तप्रयोजननिर्वाहः तद्भाष्यानुवृत्तिकल्पनं गौरवग्रस्तमित्यपि बोध्यम्। युष्मदादीनां त्रिषु सारूप्यमात्रमुक्तं न त्वलिङ्गत्वम् अत एवालिङ्गाव्ययसन्निधान एवैषां निरूपणं न्वक्तमित्याशयेनाह॰ उ॰ प्रथमयोरमिति सूत्र इत्यादि॰ सामआकमिति सूत्रस्थभाष्यविरोधं परिहरति। सामआकमि

सि॰

श॰शे॰ टी॰भै॰ टी॰भ॰ २३६

भै॰ शङ्कावारणायेति नचनिजांत्रयाणामितिनिर्देशात्सकारान्तत्वशङ्कापाद्वास्या अप्याशङ्कायावारणम्भविष्यतीतिवाच्यम्। अस्यग्रन्थस्यदोषोपलक्षणत्वात्
तेनपरमेत्रिशब्दादस्मानार्थेलिचिटिलोपेततः कौणिलोपे टिलोपे चकृतेत्रौलुप्तमितिस्थानिवत्त्वनिषेधेनिर्दिश्यमानावयवत्रशब्दस्य त्रयादेशोपरम

भ॰ स्वमोर्नपुंसकादितिसूत्रे इति॰ इत्यनुवर्तमानेनेतराच्छन्दसीतिसूत्रे इत्यर्थः त्रेस्त्रयः शंकावारणायेति॰ तत्रापिन्यासेउक्तनिर्देशाश्रयणेनत्राण
त्रेस्त्रयः। अयन्तसान्तोनिजान्त्रयाणामितिनिर्देशात् त्रेरयङन कृतः। अयङ्॰यीयादाविवोच्चारणार्थत्वशङ्कावारणाय॰ केचिदि
ति॰। आमिसर्वनाम्न इतिसाहचर्यादितिभावः वस्तुतस्त्विति॰। साहचर्यस्यासार्वत्रिकत्वात् सूत्रान्तरस्थतदाश्रयणेदृढतरप्रमा
णभावाच्चेतिभावः। नचगौणमुख्यन्यायेनात्रनेतिवाच्यम्॰ अप्रसिद्धत्वगौणलाक्षणिकत्वान्यतररूपगौणत्वाभावात् अत
एवोपसर्जनानांसर्वनामत्वप्रतिषेधआरब्धोवार्त्तिककृता॰ इतरविशेषणतामात्रेणतत्त्वाभावात्॰ पदकार्यएवेतन्मदृत्तेश्चे
त्यन्यत्रविस्तरः। द्व्यष्टनोनित्यंद्विवचनान्तइति॰ सङ्ख्यापरत्वेपीत्यर्थः। अतएवकस्यद्वित्वेइत्यर्थेकस्यद्व्योरितिभाष्येवक्ष्यति
सूत्रेप्रयुक्तम्॰ त्यदादी॰ अष्टनआइत्यतोविभक्ताविप्यनुवर्त्तते॰ तत्फलन्तुतत्कुलमसोर्लुक्त्वन्न॰ इष्टिरिति॰ भाष्यकारस्येतिभा
वः द्विपर्यन्तानाङ्कमिति॰ युष्मदस्मदोरात्वयत्वलोपैर्वाधात्किमः कादेशविधानाच्चप्रश्नः। ९ अस्तुञ्जीवप्रतिपत्तिगौरवमितिभावः ॥

याणामिसत्रान्तपादेशात्वापत्तिर्दोषोवोध्यः केचिदितीति प्राप्तादकारादयइत्यर्थः। तेषामेवशङ्कान्तरत्रिरस्यति। नचेति॰ अतएवगौणमुख्यपरिभाषा
यानाद्दृष्टास्यैवगौणत्वस्यगौणपदार्थत्वादेवातदेवोपपादयति। इतरेति॰ एतच्चगौणमुख्यपरिभाषाप्रवृत्तिसम्भवमभ्युपेत्यवस्तुतस्तस्याः सम्भवएव
नेत्याह॰ पदकार्यएवेति॰ अतएव॰ नित्यंद्विवचनान्तत्वादेव॰ अत्रनित्यपदोपादानेनद्विशब्दप्रकृतिकसुपोद्विशब्दार्थेद्वित्वानुवादकत्वमेवेतिनियमः
बाध्यते। नचद्वित्वमप्रधानम्प्रधानंवेत्यन्यदेतत्॰॥

भि॰ कृत्वाङ्गसञ्ज्ञायां प्रत्ययलक्षणप्रतिषेध इति भसञ्ज्ञा नेत्यर्थः। अङ्गसञ्ज्ञा यथा लुमतेऽपि प्रत्यये भवति तथोपपादयति। अङ्गसञ्ज्ञा त्विति। एवञ्चाङ्गसञ्ज्ञाया
न लुमतेति निषेधाभावादङ्गसञ्ज्ञायां लब्धायामङ्गसञ्ज्ञकोद्देश्यकमन्यत्प्रत्ययलक्षणप्रतिषेधात्त्वे कर्त्तव्ये निषेधः प्रवर्त्तते कैयट इति। तत्र हि युवुशब्दान्तस्य
नाकौ भवतेऽस्त्यर्थे ननु नप्रियः। कारकप्रिय इत्यत्र वाक्यस्य विभज्यान्वाख्यानेन ननु नशब्दात्कारकशब्दाच्च या विभक्तिस्तस्याः सुपो धात्विति लुकि कृते
कौ न प्राप्नुत इति पूर्वपक्षे माभूतां या सौ सामासिकी विभक्तिस्तस्यां यासौ समासाद्विभक्तिस्तस्यां भविष्यत इति समाधाने कृते यत्र तर्हि समासाद्विभक्तिर्न
स्ति। नन्नर्धिकारकर्धि इति पुनः शङ्कायां मा भवतां हि न वा परन्निमित्तं सञ्ज्ञा च प्रत्ययलक्षणेन। न चेह परन्निमित्तमाश्रीयते अस्मिन्परतः युवोरनाकौ
भवत इति। किं तर्हि अङ्गस्य युवोरनाकौ भवतः। अङ्गसञ्ज्ञा भवति प्रत्ययलक्षणेनेति भाष्य उक्तम्। अत्र कैयटः। न हीह विभक्तिः प्रत्ययान्तसंज्ञानिमि
त्त्वेनोपात्तमिति प्रत्ययलक्षणत्वमनाकयोर्नास्तीति न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्यायमविषयः केवलमङ्गस्य युवोरनाकौ भवत इत्युच्यते
अस्ति च प्रत्ययलक्षणेनाङ्गसञ्ज्ञा। न हि तस्यां विधीयमानायां न लुमताङ्गस्येति प्रतिषेधः प्रवर्तते। लब्धाङ्गसञ्ज्ञकस्य कार्यान्तरे विधातव्ये स प्रतिषेधः
प्रवर्त्तते। न चाङ्गसञ्ज्ञाऽङ्गस्य कार्यमिति प्रतिषेधाभाव इति अत्र कैयट इत्यनेनारुचिः सूचिता न लुमतात स्मिन्निति वार्त्तिकरीत्याङ्गपदं पूर्वत्वोपलक्ष
णमिसङ्गसञ्ज्ञापामपि प्रतिषेधः प्राप्नोति तस्मान्न लुमतेति निषेधान्नित्यत्वेनाङ्गसञ्ज्ञा भवतीति भाष्याशयः। अत एव न लुमतेति निषेधानित्यत्वादेव
ननु तृज्वत्सूत्रभाष्याक्तरीत्या पञ्चाङ्गस्यान्यस्योपस्थितिस्तस्य परनिमित्तकत्वं न स्यात्। एवञ्चोरदत्वस्य परनिमित्तकत्वाभावात्स्यादितिवद्वाक्यस्याव
स्य परनिमित्तकत्वमाश्रयणीयमिति पञ्चक्रोष्टृ इत्यस्यासिद्धिरित्याशयेन प्राङ्क्ते॥ गणपतये नमः॥ श्रीरामचन्द्राय नमः॥ ॥

भै·

घुमास्थेतिसूत्रेच घृतपावानः वसपावान इत्यत्र पाधातोः क्वनिपिसतीत्वम्प्राप्तमितितद्वारणार्थमीत्वेवकारप्रतिषेधोवक्तव्य इत्युक्त्वायदीत्वेवकारप्रति
षेधइत्युच्यतेकथंधीवरीपीवरीत्याशङ्क्यनैतदीत्वंकिन्तर्हिध्याप्योःसम्प्रसारणमेतदित्युक्तम्।एतस्मिन्वार्तिकेयदीत्वेवकारप्रतिषेधइतिएतस्यप्रसाख्या
नस्यतत्प्रयोजनस्यघृतपावानइत्यादेर्वनिपासाधनरूपस्यभाष्यस्यचफलैक्यायानभिधानङ्कल्पनीयम्।ईत्वेवकारप्रतिषेधइतिसामान्यतएवोक्तन्तत्स
त्वेवकारादिप्रत्ययसामान्येप्रतिषेधेक्विप्यपिप्रतिषेधःप्राप्नोति।वनिपातत्साध्यप्रयोजनेसाधनरूपप्रत्याख्यानपक्षेक्विपीत्वम्प्राप्नोतीतिफलभेदः

भ· वर्तनीयमितिक्विपीत्वंनैवप्राप्नोतिदधातेर्वृतितुएकदेशयुक्तिरेव·यत्तुदृशिग्रहणादपूर्वत्वाशयकत्वं·तस्यजीर्य्यतेप्युरित्यस्यैवेत्याहुरिति
तन्नसम्यकएवमपिजनसनेतिसूत्रेधियोधियइत्यत्रेइङित्वस्याभीयासिद्धत्वेनतुनभवतिक्विविस्वंविभक्तावियङितिव्याश्रयत्वादितिभाष्ये
क्तेरसंगत्यापत्तेरितितृतीयःईत्वविषयेक्विवेवनेतिचतुर्थःतस्यायंभावःएवंसतिवार्तिककारस्यप्रसाख्यानयोःफलैक्यंसंपद्यतेअनल्वि
धावितिस्यस्वरितत्वप्रतिज्ञामएकानुवृत्तिर्विनेवप्रसपलक्षणसूत्रेनियमार्थत्वंचसंस्थाशब्देचक्विंपमङ्गीकृत्यवार्त्तिकारंभावश्यकत्व
कल्पनाभाष्यकारप्रयोगादीत्वाभावकल्पनांचापेक्ष्यस्थःकचेतिसूत्रेलृस्वरितत्वप्रतिज्ञाकंविचपरमेषानुवर्त्तनेनालृस्वरितत्वप्रति
ज्ञाकंक्विप्यपीदमेवकल्पनायुक्ता।तत्रभाष्येक्विप्यपीदंतुवार्तिकानुसारिणइति·युक्तश्चायंक्विविधायकेदृशिग्रहणेनकित्वप्रयुक्तकार्य्यादर्
शनेसनदृश्यतेइत्यस्यैवयुक्तत्वादितिबोध्यम्·स्पष्टञ्चेदंसर्वंघुमेतिसूत्रेभाष्यप्रदीपोद्योतेषुइतिदिक्पर्य्यालोचनयासिद्धादिति·इदंक्वनि
वर्थपाधात्वर्थञ्चोक्तंशेषंतुवार्तिकंशेषेउपलभ्यतएवेतिबोध्यम्।ह्रस्वइतिकपचेतिशेषः॥ ९स्यादिति।नन्वेवंरीत्याधीवर्यादीनामप्यनभिधा

नम्प्राप्नोतीत्यतआह· धीवरीपीवरीत्यादीति·आदिनाधीरित्यादिसङ्ग्रहः। अतएवक्विप्वक्निपूचनेतिसङ्गच्छते।पर्यालोचनयासिद्धाद्वार्तिकात्सिद्ध २३७
मिति।अत्रपर्यालोचनयासिद्धादित्यनेनेनादृष्टानुपूर्वीकानुपलम्भेपिनक्षतिः।जनसनेतिसूत्रेधियोधिपइत्यत्रेयङादेशेकर्त्तव्येधाधातोःक्विपिपदी

भे॰ त्वनन्तस्यासिद्धत्वम्प्राप्नोतीत्याशङ्क्यनैतदीत्वङ्कि नर्हि ध्याप्योः सम्प्रसारणमेतदित्युक्तम्। एवं घुमास्थेतिसूत्रे पावानइत्यत्रेत्वव्यावृत्त्यर्थमवकारादा।
वितिवार्तिकस्वीकारे कथं धीवरी पीवरीतिप्रश्ने नैतदीत्वमित्युक्त्वा ध्याप्योः सम्प्रसारणमेतदित्युक्तम्। सूत्रभाष्ये इत्यस्य सूत्रयोर्भाष्य इत्यर्थः। वार्तिकादिति
ध्याप्योः सम्प्रसारणञ्चेत्यतः। ननु धीध्यायतेरीधातेरितिभाष्यविरोध इत्यत आह धीर्ध्यायतेरित्यादि ननु संस्याशब्दे स्थः केचेतिसूत्रस्थचकारेणक्वि
पिरुतेरीत्वमवकारादावितिवार्तिकप्रत्याख्यानपक्षे इत्वापत्तिरित्यत आह संस्याइत्यत्रेति एवञ्च तत्र संक्विप्यदं क्विविधाचरतीति क्विपाविजित्यर्थकम
भ॰ यूस्त्याख्यौनदी तदवयवेलक्षणेति अत्रनत्स्याङ्ग संज्ञायानिमित्तभूतेनघवयवेइत्यर्थः तेननतु दनगौरीत्यत्रनदोषः नचैवमपिअत्रनत्ताननु
पिचनुदहतीत्यत्र दोषएवमतुपसदङ्ग संज्ञानिमित्तत्वान्नघवयवत्वाच्च नचेष्टापत्तिः वर्णसज्ञापक्षे माभिरितिचेन्नश्रीसाहचर्येणलेकारप्रश्लेषे
यूस्त्या दीर्घयोरेवग्रहणम् व्याख्यानात् वाछन्दसीतिपूर्वसवर्णदीर्घः। यूकिंमात्रेइति आयनद्यइतिनास्त्रियमाचक्षाते
स्त्र्याख्यौमूलविभुजादित्वात्कः। स्त्र्याख्याविलुपस्थितस्त्रीवाचकशब्दस्यविशेष्यत्वात्तदन्तविधिरित्याह ईदूदन्तावितिस्त्रा
ख्यौनद्यौरित्यादौनदीशब्दस्यतदवयवेलक्षणावोध्या आख्याग्रहणान्नित्यस्त्रीत्वलाभस्तदाह नित्यस्त्रीलिङ्गावितिः॥
णवाईकारस्तेनघवयवेइत्यर्थाङ्गीकारात् नचैवमपितुदतेहितंतुदतीयं तमतनितुदतीयानमाचष्टेइतिणिचिक्विपिटिलोपेयलोपेतुदतीःत
नोमतुपिङीपितुदतीमतीत्यत्रदोषएवेतिचेन्नवर्णसंज्ञायक्षेपितत्प्राप्त्याइष्टापत्तेः अतएवश्रीग्रामिरितिनासूत्रियदित्यत्रनुमोनिष्टत्वेमान
एतिमाकः। सव्येष्टाइत्यत्राप्येवं॥
मः॥ यदिवानप्रमीशब्दोपिप्रामाणिकस्तर्हिसोऽन्यथासाधनीयइतिमनसिनिधायाह मीरुमानइति व्याख्यानादिति किंपुनरिदन्दीर्घयोर्ग्रहणमा
होस्विद्ध्रस्वयोरितिविकल्प्यदीर्घग्रहणपक्षेयूइत्यत्रपूर्वसवर्णदीर्घस्यङितिह्रस्वश्चेतिसूत्रेसामानाधिकरण्यस्यचानुपपत्तिमुद्भाव्यह्रस्वग्रहणेशकटिवन्धु

शा·श्री· भै· रित्यत्रनदीवन्धुनीतिपूर्वपदान्तोदात्तस्यवहुशकदिरित्यत्रनद्युत श्चेतिकप्· प्राप्तिस्त्वोत्कारीर्घयोर्ग्रहणमितिसिद्धान्तितम्।पूर्वसवर्णदीर्घस्तुदीर्घाज्जसिचे
टी·भै· त्यत्रवाच्छन्दसीत्यनुवृत्त्यासाधितः।ङि·तिहूस्व श्चेतिसूत्रेतुय्वौयौहूस्वाविर्त्येवंवैयधिकरण्यान्वयेनसाधितइत्येवंस्यादित्यर्थः।मात्रइति· जननीवाचकोय
टी·भ· म्।कर्मण्यणशङ्कावारणायाह·।मूलविभुजादित्वात्वात्कइति· तन्मादिघटकेकारादेरवाचकत्वाद्दोर्यादिघटकस्यापिद्योतकतयातस्याप्यवाचकतयावर्ण
२३८ सङ्घातपक्षोनयुक्तइत्यपिवोध्यम्।तदन्तसङ्घायामाच्छीनद्योरित्यत्रप्राप्तामनुपपत्तिम्परिहरति।आच्छीन घोरित्यादावितिः॥ ॥ग्रामण्यादेर्वृत्तिरिति· एतत्प्र
वृत्तिनिमित्तस्यग्रामकर्मकनयनकर्तृत्वस्यपुंसाधारणत्वेनलिङ्गान्तरविशिष्टार्थानभिधायकत्वाभावान्नप्रवृत्तिनिमित्तैकोसत्तीति· इदन्त्वलिङ्गान्तरविशि

भ· मुपलभ्यतेतदाचरमावयवेलक्षणेतिवोध्यम्· आख्याग्रहणादिति· विचप्रक्षेइ दकप्रक्षेतुख्यग्रहणेतियुक्तम्·॥ ॥ अनभिधायकत्वेति·।

तत्फलन्तुग्रामण्यादेर्या वृत्तिः।नित्यस्त्रीत्वञ्च प्रवृत्तिनिमित्तैकोलिङ्गान्तरविशिष्टार्थानभिधायकत्वम्· ध्वनकुमार्य्यादी
नांकचि [illegible] निर्वृत्तेनत्रिलिङ्गेनसमानाकारतयानित्यस्त्रीत्वाभाववारणायप्रवृत्तिनिमित्तैकाइति·॥ ॥ येनप्रवृत्तिनिमित्तेन
लिङ्गान्तरवैशिष्ट्येनस्वेनार्थोभिधीयतेयत्प्रकारकवोधजनने स्वयोग्यरितंतत्वंप्रदास्यत्यत्नदानित्यस्त्रीत्वमितियावत्· यस्यनदीसंज्ञाचिकीर्षिता
सस्वपदार्थइतिवोध्यम्·त्रिलिङ्गेनेति· नपुंसके हूस्वान्त्याकसमानाकारत्वमितिवोध्यम्·॥ ॥ ष्टार्थानभिधायकत्वपदार्थेकुक्षिप्रवृत्तिप्रतियोगि·

विशेषणम्।तथाचलिङ्गान्तरविशिष्टार्थयेनरूपेणाभिधायकत्तेनैवरूपेणस्त्र्यभिधायकोयत्तस्यननित्यस्त्रीलिङ्ग·त्वव्यवहारः।स्वजन्यवोधीयलिङ्गा
न्तरविशिष्टार्थेनिष्ठविशेष्यतावच्छेदकावच्छिन्नस्त्रीनिष्ठविशेष्यताशालिशाब्दवोधजनकंयत्तद्भिन्नशब्दत्वन्नित्यस्त्रीलिङ्ग·त्वमितिफलितम्।कचि
निर्वृत्तेनेतियदाकेनचित्पुरुषेणस्त्रीमात्रविषयकवोधेच्छयाखलपूशब्दःप्रयुक्तस्तेनचसामग्रीविशेषात्तन्मात्रविषयकएववोधोजनितस्तस्यच
लिङ्गान्तरविशिष्टार्थानभिधायकत्वान्नदीत्ववारणायलिङ्गान्तरविशिष्टार्थाभिधायकतावच्छेदकधर्मशून्यत्वंवक्तव्यम्।एवञ्चध्वनकुमार्य्यादीनां

भे॰ अभ्युच्चयायेति॰ सम्भावितदोषाणान्नानारूपत्वसूचनायातेनभवानित्यस्यद्विपर्यन्तानामितिनियमास्वीकारेपिव्यक्तिपक्षेऽत्वसनेतिसूत्रेभवच्छब्दोप
स्थितिसामर्थ्यान्नौत्पदाद्यवत्वाप्रवृत्तिकल्पनेनसिद्धिसम्भवेपिनग्रन्थासङ्गतिः। अतएवास्वरसादाह भवन्ताविति॰ भाष्यप्रामाण्येनेति॰ तत्रापिसरसीयदो
भ॰ इत्वमवकारेति अस्यतथेत्यादिः आरावितिफलितार्थकथनंभाष्येवकारप्रतिषेधइत्येवत्रिरुक्तेः आवश्यकमितीति॰ इदमपिसंभावनामात्रे
णइतिशेषः अत्रपक्षचतुष्टयमुपलभ्यते॰ तत्रावकारेप्रतिषेधइतिकार्त्तिकारम्भएवज्यायान अन्यथासंस्थाशब्देप्रत्ययलक्षणेनअतृणेदृश्म
भवान्॰ भवन्ताविसम्भुच्चयायाञ्जेतुसवर्णइति इदंसम्भावनामात्रेण॰ एषांडेनई दृतौचससम्पर्थेइतिसूत्रस्यभाष्यप्रामाण्ये
नानभिधानात्क्विवनवातेति इत्वमवकारादावितिवार्त्तिकस्ययावान इत्यादीनांवनिपासाधनरूपस्वतेत्यत्यास्यानभाष्य
स्यचफलैक्यायेदृशेभ्यः क्विपोनभिधानमावश्यकमिति धीवरीपीवरीत्यादि ध्याप्योः सम्प्रसारणञ्चक्विपञ्चनिपच्चचेनेत्य
र्थकाजनसनखनांसनझलोघुमास्यागापेतिसूत्रभाष्यपर्यालोचनयासिद्धाद्वार्तिकात्सिद्धम् धीध्यायतेईधातेर्वाः क्विप्
वचीतिवार्तिकस्यभाष्येदधातेर्वत्युक्तिरेकदेशिनः संस्थाइत्यत्रविजेवतिनदोषः मीडूमानेइतीकारान्तात्क्विविस्तके॰ वातप्र
मीर्निः शृङ्गमृगाकृतिर्जन्तुविशेषः। वहुश्रेयसीति॰ इयमेवहुव्रीहेर्नेतिनिषेधान्नोपसर्जनहूस्वः। एत्रैवेत्वापतेरित्येकःप्रत्याख्यान
मेकदेश्युक्तिरितिप्रत्ययलक्षणसूत्रंचवार्तिकानारम्भेप्रकृतेःनिष्ठत्वसिद्ध्यर्थमेवस्याद्यथोत्तरंमुनीनांप्रामाण्याच्चक्विपीत्वंभवत्येव॰ हलीत्य
स्यानचीत्सर्थकत्वात्संस्थाशब्देविजेवभाष्यप्रयोगाद्दृत्वाभावइतिद्वितीयः वार्तिकानारम्भणीयमनत्विधावितिप्रत्ययलक्षणसूत्रेऽनु
पनेनकथनेनाईदृशेभ्यः। आदनेभ्यः। क्विपोऽनभिधानमिति॰ अयम्भावः जनसनखनामितिसूत्रेधियोधियःपियोपियइत्यादिविग्रहदर्शनाकर्त्तव्येई
त्वस्यासिद्धत्वम्प्राप्नोतीत्याशङ्क्यनैतदीत्वञ्छि॰ नाहिध्याप्योःसम्प्रसारणमेतदित्युक्तम्। अभ्युपेत्यापीत्वंव्याश्रयत्वादसिद्धत्वन्नभविष्यतीतितुपरत्रोक्तम्

भै॰ अत्रारुचिबीजन्तु नतेनग्रन्थेननदीसञ्ज्ञाविधायकशास्त्रस्यतत्तत्कार्यविधायकशास्त्रैकवाक्यताभिप्रेता किन्तु नदीत्वप्रयुक्तकार्यप्रवृत्तिश्चिकी
र्षिता तस्मिन्कालेनदीसञ्ज्ञां कृत्वासाकल्पनीया नतु भविष्यति किञ्चिदिति न्यायेन पूर्वं नदीत्वप्रवृत्तिरेवनापि न च न कार्यस्य प्रवृत्तिर्भविष्यतीतिनानु
पपत्तिरिति। यत्तु केचिदिति प्रतीकमुपादाय सञ्ज्ञयोः कार्यार्थमन्यदेशगमनेऽपि नस्वदेशीयत्वत्यागो व्यवहारार्थं नतत्तद्देशगतानां व्यवहर्तॄणामिवेत्यस्य
रसइति। तन्न· अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयतीति भाष्यफक्किका व्याख्यावसरे कश्चित्परिभाषारूप इति

हे वहु श्रेयसीति· ह्रस्वैकृते गुणस्तु न प्रक्रियालाघवायाम्बार्थानां ह्रस्वः। ह्रस्वनद्योर्गुण इत्येव वाच्ये ह्रस्वविधानसामर्थ्या
त·जसि चेत्यत्रैकदेशस्वरितत्वप्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टम् अम्बार्थानामपि गुणस्तु वक्तुमशक्यः। अनः
लीवं जलेशो केमातस्यन्दनयोरपीति रभसा युक्ता नः शब्दस्याम्बार्थत्वेन गुणापत्तेर्ह्रस्वग्रहणे त्व च इत्युपस्थित्याऽजन्ताम्बार्थ

कैयटव्याख्यानेन परिभाषाविषय एव स्वदेशत्यागेन कार्यसम्पादनमिति कल्पना। सञ्ज्ञाविषये तु कार्यकालपक्षः ९९ नाग्रहणं न दोषः॥
यादिभ्यः परैव प्रगृह्यसञ्ज्ञेति प्रगृह्यसञ्ज्ञायाः परत्वस्यादसोमादिति सूत्रभाष्ये उक्तत्वेन सञ्ज्ञाविषये देशत्यागेन व्यवस्थाया भाष्यसम्मतत्वात्ताय
तु वहु श्रेयसीत्यत्र ह्रस्वगुणः स्यादिति कश्चिदाह। तद्दूषयति। ह्रस्वैकृत इति·। ह्रस्वविधानसामर्थ्यादिति· एवञ्च ह्रस्वपदं श्रूयमाणपरम्भविष्यती
ति भावः। भाष्ये स्पष्टमिति· एकदेशस्यापि क्वचिदनुवृत्तिर्भवतीति भाष्ये स्पष्टम्। यथा दामहायनान्ताच्चेति सूत्रे सङ्ख्यादेरित्यनुवर्तते। अव्ययादेरिति

मे॰ ननुमातृवाचकस्याप्यनःशब्दस्यनपुंसकलिङ्गत्वात्स्वमोर्लुकालुप्तत्वेननगुणापत्तिरित्यतआह नपुंसकत्वेपीति· ननुह्रस्वपदस्यश्रूयमाणह्रस्व
परत्वेपर्जन्यवल्लक्षणन्यायेनमातृशब्देपितस्यप्रवृत्तिःस्यात्।तथाचहेमातरित्यत्रगुणोनापत्तिरतआह· अयमिति· अन्येतुनलुमतेतिनिषेधस्या
नित्यत्वेप्यनित्यवचनस्यौत्सर्गिकीप्रवृत्तिर्लक्ष्यानुसारादप्रवृत्तिरित्येवंव्यवस्थासर्वजनसम्मता साचलक्ष्यस्यसम्प्रतिपन्नत्वेभवति।प्रकृतेतुगुणा
दर्शनेनानित्यस्याप्यप्रवृत्तौनमानमितिचिन्त्यमेतत्।एवञ्चगुणश्रुत्येकपरिभाषाप्रवृत्तिरित्यपिचिन्त्यम्।अम्बार्थनद्योःक्रमात्सम्भवव्यभिचार
योरभावेनैकपरिभाषायाइहानुपस्थानादित्याहुः।अत्रेदंवक्तव्यम्·पक्षेगुणःस्यादेवेतियत्तदनित्यस्यसामान्यतःप्रवृत्तिमभ्युपेत्य।वस्तुतस्तुगुण
इत्यनुक्त्वाह्रस्वपदोपादानमिकूपरिभाषानुपस्थित्यर्थमेव।यत्तूक्तमम्बार्थनद्योःसम्भवव्यभिचाराभावइतितच्चिन्त्यम्।हेदेवीत्यत्राम्बार्थकेसम्भ

तस्यनपुंसकत्वेपिहेवारेइतिवत्पक्षेगुणःस्यादेवगुणश्रुत्येकपरिभाषोपस्थितौत्वेवंत्यादावप्यनापत्तिः।अयंह्रस्वोऽनन्तर
स्येतिन्यायाद्ध्रस्वस्यगुणइत्यस्यैवबाधकत्वेनमातरित्यत्रऋतोङीतिगुणोभवत्येवेतिदिक्· आटश्च· नमाङ्योगइतिसूत्रभा
ष्योक्तेःटश्चेतिन्यासेतुवृद्धिरेवेतिबोध्यम् अत्राट्तुवक्तुमशक्यः।अस्वपोहसन्नित्यत्रवृद्धिवारणायाटश्चेत्यत्रधातावित्यप

वस्यहेअम्बेत्यत्रव्यभिचारस्यसम्भवात्।एवंसत्यम्बेतिनसिध्यतीत्यनैवदूषणनिर्भरः।नान्विकूपरिभाषोपस्थित्या ऽकर्षेणह्रस्वापत्तेः॥
म्बार्थकस्यगनस्येवचेद्गुणःस्यात्तर्हिनदीपदोपादानमनर्थकंस्यादितिवाच्यम्।अम्बार्थभिन्ननद्यन्तस्यगुणविधायकत्वेनचारितार्थ्यात्।यद्यपिनदी
साहचर्यात्स्त्रीलिङ्गस्यैवाम्बार्थस्यग्रहणेनानःशब्देक्लीबेनदोषइतितद्यपिन·साहचर्यपरिभाषाप्रवृत्तिस्वीकारेइगन्तत्वेनापिनदीसाहचर्यसम्भवान्मा
तृशब्देम्बार्थकेएवसामान्यत्वम्बेत्यादावितिसाहचर्यपरिभाषायाअनित्यत्वात्प्रकृतेःप्रवृत्तिरित्यवाभिमतमितिदिक्।गुणोभवत्येवेति·इदन्तुह्रस्वविधान
स्यसामान्यापेक्षत्वापकत्वाभिप्रायेण यदितुसम्बुद्धिनिमित्तकगुणस्यैवाप्रवृत्तिकल्पनन्तदानुनदोषइतिदिगित्यनेनसूचितम्।अस्वपोहसन्नित्यत्रेति·

मे॰ स्वपेर्लङ्सिप। अड्गार्ग्यगालवयोरित्यट्। शब्लुक्। सस्य रुत्वम्। हशि चेत्युत्वम्। अत्राडुत्वं बाधित्वा टश्चेति वृद्धिः प्राप्नोति। न चान्तरङ्गयोर्यण्डोवहिरङ्गस्यो त्वस्यासिद्धत्वं शङ्क्यम्। नाजानन्तर्यपरिभाषया निषेधात्॥ ❀ ॥ पररूपमिति। अतो गुण इत्यनेन॰ न चाड्विधानसामर्थ्यान्न पररूपमिति वाच्यम्। ङेराम्नद्याम्नीभ्य इति कृते नुड्बाधकतयाऽऽट्श्चरितार्थत्वात्। यत्तु ह्रस्वनद्यापइति सूत्रानन्तरं ङेर्नेत्येव वदेदिति चिन्त्यमेतदिति। तदेव चिन्त्यम्। एवं सति षड्भ्यो लुगित्यत्रापि नकारे सन्ध्यापत्तौ विधिनिषेधोभयसामर्थ्याद्विकल्पापत्तेः। विधिप्रकरणानन्तरं तथा पाठे श्रीग्रामण्योरित्यस्यापि निषेधसम्भावनास्यात्। व्याख्यानादिति व्य वस्थायामित्यादिति दृशमूलकात्। नद्याम आडुपवादत्वेन तस्मिन्कृते कथमाडिति कस्य चिच्छङ्का यां व्यवस्थार्थमाह॰ यद्यपीत्यादि॰ सर्वथानवकाशत्वा

वृद्धिरेचीत्यस्य तु पररूपं बाधकमिति बोध्यम् ङेरिति सप्तम्येकवचनं व्याख्यानात् इड्वत्सरत्वादिति॰ सकृद्गतिन्यायाश्रयणादिति भावः। स्पष्टञ्चे दं ह्रस्वनद्यापइत्यत्र भाष्ये॰ यद्यपीहाडुपवादो नद्याम्। सर्वथानवकाशत्वात् अपवादो नुट् दीर्घत्वस्येति दीर्घोऽकित इति सूत्रभाष्ये उक्तत्वेना गमादेशयोरपि तत्त्वसत्त्वात् तथाप्यनवकाशत्वेन बाधेऽपवादप्रवृत्त्यनन्तरमुत्सर्गप्रवृत्तेर्न दोषः अत एव न गणेरीत्वमपवादत्वाद्ध लादिशेषं बाधते किन्तर्ह्यनवकाशत्वादिति गुणो यङ्लुकोरिति सूत्रभाष्ये उक्तम्॥ ९ दिति॰ आदिकृतेनिर्दिश्यमानस्याटाव्यवधानादिति भावः। आगमादेशयोरपि बाध्यबाधकभावे दृष्टान्तमाह॰ अपवाद इति॰ अत एव॰ येन नाप्राप्तिन्यायेन बाधस्य लौकिकव्यवस्थाविलक्षणव्यवस्थास्वीका राद्व॰ गुणो यङ्लुकोरिति सूत्रभाष्य इति॰। तत्र हि डोढौक्यते। तोत्रौक्यते इत्यत्राभ्यासह्रस्वत्वस्य दीर्घोऽकित इति दीर्घत्वस्य च प्राप्तौ परत्वाद्दीर्घत्वं स्यादि ति शङ्कायामभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इति परिभाषा उक्ता। यया विन्यत्र ह्रस्वत्वस्यावकाशः। दीर्घत्वस्य तु कृते ह्रस्वत्वेऽवकाशं पूर्वेप्सी मन्यते। नस्याः परिभाषायाः प्रयोजननिरूपणावसरे गणेरीत्वं हलादिःशेषस्य। गणेरीत्वमपवादत्वाद्धलादिःशेषन्न बाधत इत्युक्तम्। ततोऽग्रे भाष्ये न गणेरीत्वमपवादत्वाद्धलादिःशेषम्बाधते किन्तर्ह्यनवकाशत्वादित्युक्तम्। अत्र गणेरूपाभ्यासान्त्यस्येत्वमित्यर्थे हलादिःशेषे कृते तादृशाभ्यासाभावेनेत्वेन्नस्या

भे· क्वजनसमानानुपूर्वीकत्वान्नदीत्वन्नस्यादतः प्रवृत्तिनिमित्तैक्यरूपत्वमितिभावः॥ ॐ ॥ नन्वेवमिति· एतस्यलिङ्गान्तरविशिष्टानभिधायकत्वाभावा
त्·।तस्य· श्रेयसीशब्दस्य। यथोद्देशइति· भविष्यतिकिञ्चिदनेनप्रयोजनमित्यभिसन्धिमात्रेसञ्ज्ञाप्रवृत्तेस्तस्मिन्पक्षेस्त्रीकारान्ताकुमारीत्यादौकुमारीमि
च्छन्कुमारीवाचरन्नित्येवंसिद्धकुमारीशब्दे। अवयवस्त्रीविषयत्वादिति। अत्रावयवशब्दोवृत्तिप्रकृतिशब्दपरः।तेनक्वजन्तेनदोषः।केचित्तुएवंसत्यम्मा
दिशब्दानामाचारक्विप्प्रकृतिककर्तृक्विबन्तानांस्त्रियांवृत्तौतस्माच्छसोनइतिनत्वापत्तिस्तथाशकट्यादिस्त्रीलिङ्गशब्दानामुक्तरीत्यापुंवृत्तावाङोना
नन्वेवमप्यह श्रेयसीशब्दस्यनदीत्वनस्यादत आह· प्रथमेति· अर्थान्तरसङ्क्रमात्पूर्वेविद्यमानंनित्यस्त्रीत्वमादायतस्यार्थान्तरसं
क्रमेपिनदीत्वंवक्तव्यमित्यर्थः। यथोद्देशपूर्वंप्रवृत्तसञ्ज्ञामादायैवकार्यम्। कार्यकालपक्षेपिकुमारीत्यादौप्रकृतिभूतकुमारीश
ब्दस्यनित्यस्त्रीत्वेनवृत्तावपिविशेषणतयानित्यस्त्रीलिङ्गस्यार्थबोधकत्वेननदीसञ्ज्ञा समासेतुस्पष्टैवतदवयवस्येतन्त्यास्तिः
तन्मात्रबोधकत्वनिवेशबाधान्नेननहि बोधकत्वनिवेशेवानमानम्· तदुक्तम्भाष्ये अवयवस्त्रीविषयत्वात्सिद्धमवयवोः स्त्रीविष
यत्वदा श्रयानदीसञ्ज्ञाभविष्यतीति· आकडारस्यसञ्ज्ञानांकार्यकालत्वाभावादन्यथातत्तद्विध्येकवाक्यत्वापन्नयोः कथंबाध्यबा
धकभावःस्यादितिबोध्यमित्यपिकेचित्॥ ॥ ९ भावस्याः स्त्रियामितिनिषेधापत्तिरितिचिंत्यमेतदित्याहुः। तन्न· तस्माच्छसइतिसूत्र
स्यपुमर्थप्रतिपादकशब्दस्यशस्प्रकृतित्वेशसोनस्यपूर्वसवर्णदीर्घात्परस्यनत्वमित्यर्थात्रनाभावप्राप्तेरभावात् एवमाङोनेत्यस्यापिआङोयतोवि
धानन्तदादेरस्त्रियांविद्यमानात्परस्यनाभावइत्यर्थःस्यात्तथाचोक्तरीत्याशकटीशब्दस्यपुंवृत्तौनाभावोपीष्टएवेतिदिक्। यदुक्तंकार्यकालपक्षेपीतित
द्दूषयति आकडारस्यसञ्ज्ञानामिति· कथंबाध्यबाधकभावइति· तत्पक्षेविधिप्रदेशस्थैकदेशगतत्वेनसञ्ज्ञानाम्पौर्वापर्याभावेनबाध्यबाधकभावो

नस्यादितिभावः। केचिदिति॥

शु·प्रो·
टी·भै·
टी·भ·
२४१

भे· अत्रप्रकरणइति।स्वियोरीयौरितिनिर्देशेनसामान्यापेक्षज्ञापकमाश्रीयतेइतिभावः।पर्युदासपरतयाव्याख्यानेफलमाह· उदियाविसादाविति· ईङ्गताविति धात्वोः क्विवन्तस्यरूपम्· नचैवंलिडियाविसादौदोषएवेतिवाच्यम्।प्रसासत्त्यायद्धात्वन्तस्यकार्यंतानद्धात्ववयवपूर्वत्वस्यविवक्षितत्वात्।स्पष्टार्थमिति पूर्वोक्तप्रसासत्तेःस्पष्टप्रतिपत्त्यर्थमित्यर्थः।अत्रधातुग्रहणन्त्वचिश्नुधातुभ्रुवामितिसूत्रादेकदेशस्वरितत्वादनुवर्ततेननुसूत्रेपूर्वशब्दसत्त्वेधात्ववयवसंयोगपूर्वत्वावच्छिन्नप्रतियोगिताकभेदस्यलाभेनसुश्रियाविसादाविकारेतादृशभेदाभावादतिप्रसङ्गोवारयितुंशक्यते।धात्ववयवसंयोगभिन्नादित्यर्थेतुरेफसंयोगभेदसत्वेननततःपरत्वाद्यणादेशोदुर्वारइतिपूर्वग्रहणस्यावश्यकतयापूर्वग्रहणस्यस्पष्टार्थत्वकथनासङ्गतिरितिचेन्न· असंयोगादित्येतदुपादानसामर्थ्या

इतीयङिति· सुधीशब्देयणोनिषेधारम्भेणात्रप्रकरणेधातोःस्वरूपग्रहणेइतिपरिभाषाया अप्रवृत्तिरितिभावः।एरनेकाचो धात्ववयवसंयोगपूर्वोनभवतीति· धात्ववयवसंयोगपूर्वभिन्नइत्यर्थः तद्भिन्नश्चधात्ववयवपूर्वएवेति उदियाविसादौनदोषः।असंयोगादित्येवधात्ववयवसंयोगभिन्नात्परस्येत्यर्थेनसिद्धेपूर्वग्रहणंस्पष्टार्थम् ए·किम् असंयोगग्रहणमिवर्णविशेषणंयथास्यादङ्गविशेषणम्माभूदिति· तेनयवक्रियाविसादौनातिप्रसङ्गः।लुलुवतुरित्यादौतुनातिप्रसङ्गः ओःसुपीतिनियमात्विपरीतनियमस्तुनसुधीशब्दः।चिसुपियणोनिषेधारम्भात्· कुमार्याविति· अन्तर्वर्तिविभक्त्यापरत्वाच्छाकलन्तुअत्रननकोइतिनिषेधात्॥ ८८ ॥

त्संयोगपदस्यसंयोगघटकाविषयकप्रतीत्यविषयपरतयातत्वस्यसंयोगावयवसंयोगोभयसाधारणत्वात्।यथास्यादिति· श्रुतत्वात्तस्यैवविशेषणंयथास्यादित्यर्थः।नन्वलूधात्ववयवोकारेऽतिप्रसङ्गवारणायएरुरित्युपात्तमितिकुतोनोक्तमित्यत आह· लुलुवतुरित्यादाविति· नियमादिति· उवर्णान्तस्यचेत्सुप्येवेतिनियमादित्यर्थः।सुपिचेदुवर्णान्तस्यैवेतिनियमवारणायाह· विपरीतेति·॥ ॥ ८८ ॥ रामः ॥ रामः ॥ ८४ ॥ रामः
२४१

मे॰ नरीत्वम्· अवयवस्य धीशब्दस्येति शेषः प्रवृत्त इति· एतेन प्रकृष्टं ध्यायतीत्यर्थे नित्यस्त्रीत्वाभावात्प्रध्येरस्यनुपपन्नमिति निरस्तम्। दुर्ध्यायतीति· अत्र दुरि
त्यस्य गतित्वम्। द्वितीये दुरित्यस्य सत्त्वभूतार्थविशेषणत्वशङ्काव्युदासायाह· धीर्ध्यानमिति· एतेन दुरिति धात्वर्थस्यैव विशेषणमिति सूचितम्। तदाह च क
प्रधीरिति· प्रकृष्टं ध्यायतीति विग्रहे नित्यस्त्रीत्वाभावान्न नदीत्वम् प्रकृष्टा धीर्यस्येति विग्रहे तु नदीत्वम् ग्रामणीरिति· अग्रग्रामा
भ्यां नयतेरिति णत्वम् गतिकारकपूर्वस्यैवेति भाष्ये पठ्यते स च नियमस्तेन गतिकारकपूर्वभिन्नस्य नेति फलति तद्भिन्नश्चात्र
स्वरूपं सपूर्वपदमेव· तेन निन्युतुरित्यादौ पणं तदाह गतिकारकेतरेति· यत्त्वत्र गतिसमासो नित्यः साधिकारस्य एव प्रतिपदोक्त
त्वात् गृह्यत इति तन्न· भाष्ये पूर्वपदग्रहणाभावेन समासोपस्थितेरभावेन विशिष्टरूपोपादानविषयप्रतिपदोक्तपरिभाषाया
अप्रवृत्तेः। अत एव नदीसञ्ज्ञासूत्रस्थः प्रकृष्टा धीर्यस्या इति विग्रहाभिप्रायेण प्रवृत्तः प्रध्यै ब्राह्मण्यै इति भाष्यप्रयोगः सङ्गच्छते· शु
द्धधियाविति· शुद्धा धीर्यस्येति विग्रहः· शुद्धं ध्यायतीति विग्रहे यणेव· आद्ये सत्त्वभूतार्थकधीशब्दार्थविशेषणत्वात् शुद्धत्वस्य।
कथमपि न कारकत्वमिति भावः। कथन्न हीति· दुर्ध्यायतीति दुष्टा धीर्ध्यानं येषामिति वृश्चिकादेरिति विग्रहाभिप्रायेण प्रश्नः। दु
स्थितेति· दुः शब्दोपात्तदुष्टत्वस्य स्थितिक्रियाविशेषणत्वमिति भावः प्रकृष्टा धीरित्यादौ प्रकर्षः प्रशब्दार्थो धीशब्दोपात्तधात्वर्थे
विशेषणमिति यणभवत्येवायं क्रियेति· या चासौ क्रियेत्यर्थलाभ्प्रति तदाह च कं प्रति यदाश्रयस्य धातोर्वाच्यया क्रियया युक्ता इत्यर्थः
नेहेति· तत्र श्च सम्बन्धसामान्यषष्ठ्यैव समासः। भी त्रार्थानामिति तु हेतुत्वप्रकारकबोधतीया बाधनार्थे विभक्तिप्रकरणे तु न कृत
मिति· तच्छब्दस्य तदाह च केवलस्य णा एतद्र्या देवाहयस्य धातोरिति· एवञ्च यत्क्रियेत्यत्र षष्ठीतत्पुरुषः। ननु भीत्रेति सूत्रं षष्ठीबाधनार्थमेवास्त्वित्यत
आह· भीत्रार्थेति· अन्योक्तिं खण्डयति। विभक्तिप्रकरण इति॥

भै॰ भीत्रार्थानामितिसूत्रस्थवृद्धिकृतापायमाश्रित्यप्रत्याख्यानभाष्यकारमतेनवृश्चिकभियइत्यत्रसमाधानमभिधायसूत्ररीत्यासमाधानमाह॰ किन्त्विति॰ इत्यपिबोध्यम्
एवञ्चप्रकृतेएवमेवविवक्षितमितिभावः॥सुप्युपास्यइत्यत्रापियण्निषेधमाशङ्क्याह॰ अनन्तरस्येतीति॰ प्रकारान्तरमाह॰ सुपीतिवेति॰ अनित्यत्वादिति॰ एतेननाजान

किन्त्वहेतुताविवक्षायांसम्बन्धत्वेनविवक्षायाषष्ठीसूत्रारम्भेपीत्यपिबोध्यम् अभ्युच्चयेनाह॰ वृश्चिकसम्बन्धिनीति॰ अत्रपूर्वपदान्तर्गतोन्तरपदलोपः शाकपार्थिवादित्वात्॰ नभू॰ अनन्तरस्येतिन्यायेनेरनेकाचओःसुपीत्यनयोरेवनिषेधःसुपीतिचानुवर्त्ततेतदाह॰ सुपीति॰ लोपावित्ति॰ अतोलोपः लोपोव्योरित्याभ्यामितिभावः॰ यलोपेनिषेधादल्लोपोनस्थानिवत् वेरपृक्तलोपात्पूर्वंवलिलोपइष्यते॰ स्थानिवत्त्वादिति॰ एवञ्चयणादेशेयलोपेसत्यइतिस्यादितिभावः॥अनर्वत्तेविभक्त्यापरत्वान्नपदान्तेतिनिषेधस्तुनस्थानिवत्त्वस्यनःकोइतिसामान्यायेत्वनियमेनास्यापदान्तत्वात्तु परपदस्थाजादेशस्यैवतेनस्थानिवत्त्वस्यनिषेधाच्चक्विपमपेक्ष्यकाचसम्बन्धियलोपस्यप्रणिबर्हिरङ्गासिद्धत्वन्तुनानित्यत्वात्॥कौलुममिति॰ भावेक्तः॰ लोपइत्यर्थः॥गोमत्यतेरप्रत्ययेगोमानितिभाष्योक्तेरस्याप्यर्थस्यक्वचिदङ्गीकारः॥क्वौविधिम्प्रतिनेत्यवतुसार्वत्रिकमित्यन्यत्रविस्तरः॥अनङिति॰ अभिव्यक्तपदार्थायेइतिन्यायस्तुगौणमुख्यन्यायवत् पदकार्यविषयएवेतिभावः॥ दीर्घस्यापीति॰ प्रयोगस्थयकारान्तानुकरणंसूत्रेऽकारश्चोच्चारणार्थइतिभावः॥लूनोरित्यादि॰ ल्वादिभ्यः स्त्यायोमःप्रस्त्योऽन्यतरस्यामितिनत्वमत्वेशुषःकःपचोवइतिकत्ववत्वे॰॥ ९ नर्थपरिभाषाविषयेऽनित्यत्वमेवस्वीकार्यं
सापरिभाषाचनकर्त्तव्यापरिभाषासत्त्वेयत्रतयाऽन्तरङ्गेऽजानन्तर्यसत्त्वेऽसिद्धत्वनिषेधस्तत्रानित्यत्वाद्बहिरङ्गपरिभाषाया अप्रवृत्तिरितिभावः॥गौण
॥ ॥ मुख्यन्यायेनैवतदपिगतार्थम्॰॥ ॥ ॥ ॥ ॥

मे॰ दीर्घोऽकित इति सूत्रस्याकिद्ग्रहणेनाभ्यासविकारेषु बाधका न बाधन्त इत्येव परिभाषा ज्ञापिता। तथाऽजीगणदित्यत्र हलादिः शेषेण णकारनिवृत्तावपि स्थाद् ङकारस्येत्वम्। अनवकाशत्वेन बाधस्थले बाधकत्वेनाभिमतस्य पूर्वं प्रवृत्तिरित्येव तत्र कृते यद्युत्सर्गस्य प्राप्तिस्तर्हि भवत्येव। येन नाप्राप्तन्यायेन बाधस्थले तु यत्रोत्सर्गप्रवृत्त्युत्तरमप्यपवादस्य प्राप्तिस्तत्रापवादत्वादिमतस्य प्रवृत्तावुत्सर्गस्य प्राप्तिसत्त्वेऽपि न प्रवृत्तिरित्येव व्यवस्था। यथा सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र दधिदानोत्तरं तक्रदानस्य प्राप्तिसत्त्वेऽपि तक्रदानेन दधिदानस्य बाध एव। अनवकाशस्थले तु यथा सर्वे ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिविषातामित्यत्र भोजनपरिवेषणयोर्विरोधे परिवेषणानन्तरं माठरकौण्डिन्ययोर्भोजनं भवत्येवेति। यत्तु हयवरट्सूत्रभाष्ये न्यायोपन्यासानन्तरं नेदानीं नौ

पादः पदितिसूत्रस्थं शब्दान्तरप्राप्त्यानित्ययोराडामोः परत्वादामिति भाष्यं त्वेकदेश्युक्तिरिति बोध्यम्॥ अङ्गान्तत्वादिति। लक्षेर्मुट्च इत्यौणादिकप्रत्ययान्तत्वादिति भावः। कुमारीति। ह्रस्वविधायके शास्त्रीयोपसर्जनग्रहणात् गोस्त्रियोरिति ह्रस्वो न। अचि श्नु। भ्रूशब्दोऽप्युत्पन्नप्रातिपदिकम् भ्रमेर्डूप्रत्ययो वा। इह य्वोरिति धातोः समानाधिकरणं विशेषणमित्याह। इवर्णोवर्णान्तधातोरिति। इत्यस्येति। इत्यन्तस्येत्यर्थः। तेन सुभ्रुवाविति सिद्धम्। आन्तरतम्येति। स्थानत इति भावः। य्वोरिति किम्। चक्र्या। अचि किम्। भूयात्॥ ० ॥

भुञ्जाते इत्युक्तं तत्तु कालविशेषेण विरोधसम्पादनपरमिति न तद्विरोधः। शब्दान्तरप्राप्त्याऽनित्ययोरिति। शब्दान्तरप्राप्त्याऽदोऽनित्यत्वमादिकृतेऽमाडागमस्य तु भिर्दिश्यमानपरिभाषयाऽप्राप्तिरित्यर्थः। एकदेश्युक्तिरिति। आमो निरवकाशत्वेनाड्बाधकतयाऽतुल्यबलत्वेन परत्वादित्यनुचितमिति सा एकदेश्युक्तिः। ननूङ्गमादीनामिति निष्पन्नस्य क्विबन्तभ्रूशब्दस्य धातुत्वादेव सिद्धे भ्रूशब्दोपादानमनर्थकमत आह। भ्रूशब्द इति। समानाधिकरणमिति। वैयधिकरण्ये स्त्रियतीत्यादौ जातेर्यायति लोपो व्योरिति लोपेन यद्यपि सिध्यति तथापि तुल्यन्यायादुत्तरसूत्रेऽपि तथात्वापत्तौ धिरिवतुरित्यत्र यणापत्तिः इत्यङ्डोङि त्वस्यैवयर्थ्यं स्यादिति भावः। इत्यन्तस्येति। आङ्गत्वात्तदन्तविधिर्न्याय्यः। भ्रूशब्दे तदन्तविधेर्ग्रहणवतेत्यनेन निषेधः स्यादिति तु न शङ्क्यम्। तस्याः परिभाषायाः

प्रत्ययविधिविषयत्वात्।

शा॰शे॰ भै॰ रिभिन्नरूद्युम्नानानुयौगिकत्वमनुभवसिद्धमितिकथमेतदित्यतआह॰ पङ्कजादिवदिति॰ प्राचीनसम्मतरीत्याव्याख्यायभाष्यरीत्याह॰ एवञ्च तृचावि
टी॰भै॰ तीति॥ ॥ तृद्रस्येवेति॰ अप्तृन्निति सूत्रेपितृद्रस्येववक्तव्यमितिभावः। इत्युक्तमिति॰ एवञ्चायन्नियमोयोनिसम्बन्धवाचिविषयकइत्युद्गातृशब्देदीर्घः स्वतएव
टी॰भ॰ सुलभइतिभाष्यप्रयोगाद्दीर्घइतिकथनन्निष्फलमेव। भाष्यान्तरमप्याह॰ नेष्टृत्वष्टृइति॰ भाष्यवार्तिकयोरिति॰ तृन्विधौऋत्विक्षुचानुपसर्गस्य। ऋत्विक्षुचानुप
२७३ सर्गस्येतिवक्तव्यम्। होता पोता। अनुपसर्गस्येतिकिमर्थम्। प्रशास्ता। प्रतिहर्ता। एतस्यप्रत्युदाहरणपरतयाप्रदर्शनेननप्तृ॰ त्वष्टृ॰ क्षत्तृ॰ होतृ॰ पोतृ॰ प्रशास्तृशब्दानां चानि

नचाप्तृन्तृजित्यादौविशेषणार्थः तृद्रस्येवसिद्धेः। नचतृद्रत्युच्यमानेमातरौपितरावित्यादौप्राप्नोति नत्वहितृप्रत्ययोनिरनुबन्धकइ
तिवाच्यम् नप्तृग्रहणस्ययोनिसम्बन्धवाचिनांस्वदस्यैवनान्येषांयोनिसम्बन्धवाचिनामितिनियमादित्युक्तम् नेष्टृत्वष्टृहोतृपोतृ
णांतृन्नन्तत्वस्यप्रशास्तृजन्तत्वस्यचतृन्नितिसूत्रभाष्यवार्तिकयोरुक्तत्वेनतेषांग्रहणंप्रपञ्चार्थमेव। एवञ्चयथान्यासेनियमफ
लंचिन्त्यम् क्रोष्टेति॰ अनङ्॰ सर्वनामस्थानेचेतिदीर्घः। प्रथमोपस्थितत्वात् क्रोष्टारावित्याद्यर्थन्तुतल्लेखः। यद्वाविशेषविहित
त्वाच्छीघ्रोपस्थितिकत्वेनसएवन्याय्यः। विभाषात् अयमपिनियमएवतृतीयादावच्येवोभयमिति तेनभ्यामादौशसिक्रोष्टु
त्रेइत्यादौचनदोषः। सर्वत्रविशिष्टाभावस्यसुलभत्वात्॥ ९ दावित्यनेनतृजितिकल्प्यम्। नयतेः षुक्च। चात्तृन्॰ नेष्टा। त्विषेर्देवतायामका
रश्चोपधायाअनिट्त्वञ्चात्तृन्नितिहितत्राभिहितम्। नियमफलंचिन्त्यमिति॰ मूलेयन्नियमव्यावर्त्यत्वेनोक्तन्तेनपितृमातृप्रभृतीनान्नेतितद्न्यथासि
द्धम्। तेषान्निरनुबन्धकतृप्रत्ययान्ततयातृजन्तत्वाभावेनदीर्घप्राप्तेरितिभावः। प्रथमोपस्थितत्वात्। अष्टाध्याय्यांप्रथमोपस्थितत्वात्। तल्लेखः। अ
प्तृन्नित्यस्योल्लेखः। विशेषविहितत्वात्। तृन्तृचोःसाक्षादुपादानेनप्रतिपदोक्तत्वात्। सएव। अप्तृन्नित्येव। तृतीयादावच्येवोभयमिति। एवञ्चसामानाधि २५१
करण्यसम्बन्धेनतृतीयादित्वविशिष्टेयत्इजादित्वन्तदवच्छिन्नस्योभयोःप्रयोगेनिमित्तता। तयोर्मध्येतुन्नन्तस्यप्रयोगःप्राप्तएवतृजन्तस्यप्रयोगः॥

भे॰ शास्त्रबोध्यइतितत्रैवविशिष्टधर्मावच्छिन्नस्यप्रयोजकत्वम्।पत्रतुतादृशधर्मावच्छिन्नाभावस्तत्रतृजन्तप्रयोगाभावः।शसितृतीयादित्वाभावान्न्या।
मादावजादित्वाभावात्क्रोष्टुपत्रइत्यत्रतुविशेष्याभावादेवविशिष्टाभावःसुलभः॥ ॥ प्रयोगनियमार्थमिति॰ तृज्वदेवसर्वनामस्थानेस्त्रियाञ्चनतुतुन्नन्त
इत्येवंविधोत्यत्रनियमः।फलतीति॰ विधेयत्वेनप्रधानीभूतस्यतृज्वद्भावसंकोचकल्पनापेक्षयानिमित्ततेनाभिमतस्यसर्वनामस्थानतुन्नन्तनिरूपितप
रत्वंयथानभवतितथाकल्पनमुचितमितिभावः।एतेन॰ सर्वनामस्थानेस्त्रियाञ्चक्रोष्टुशब्दएवेतिनियमेन।अपास्तमिति॰ उक्तनियमेतृतीयादावच्युभयोः

तृज्वत्क्रोष्टुःस्त्रियाञ्चेत्याभ्यांसर्वनामस्थानेस्त्रियाञ्चतृजन्तरूपविधानेतयोःप्रयोगनियमार्थत्वम्फलतिएतेनतृज्वत्सर्वनामस्थानए
वेतिनियमादिदम्विध्यर्थमित्यपास्तम्॰ नचैवमपिक्रोष्टुनित्यासङ्गतमन्यत्रतृजन्तस्यैवप्रयोगेणाप्युक्तनियमस्यचारितार्थ्यादितिवाच्य
म्॰ तृज्वत्क्रोष्टुरितियोगविभागस्यैवंसतिवैयर्थ्यापत्तेः।नचतद्धितेष्वचामादेरिक्कोगुणवृद्धीइतिसूत्रयोःक्रौष्टुःक्रोष्टीयाइतिभाष्यप्रयो
गासङ्गतिरितिवाच्यम्॰ ऋकारान्तस्यैवऋषिवाचकत्वेनादोषात्‌ इदंसूत्रत्रयंतुशृगालवाचिक्रोष्टुक्रोष्टृशब्दयोर्व्यवस्थार्थमित्य
वधेयम्‌ तदुक्तम्भाष्ये तृज्वद्भावविषयेएततृजन्तम्मृगवाचीतितृतीयाद्यजादिविभक्तिषुतृजन्ततुन्नन्तञ्चमृगवाचीतिच।अ
नेनहिअन्यत्रतुन्नन्तमेवेत्यपिसूचितमितिदिक्॰।ऋतउत॰ तपरत्वम्भाव्यमानस्यापिक्वचित्सवर्णग्राहकत्वज्ञापनद्वारान्तर्यतो
ह्मात्रनिवृत्त्यर्थम्‌ तेनामूइत्यादिसिद्धिरितिक्ष्वैारितिसूत्रेकैयटः॥ ((प्रयोगस्यसिद्धत्वादेतदपिनियमार्थमेवेतिनियमस्यवर्णितत्वा
दितिभावः।एवमपि॰ विभाषेत्यस्यापिनियामकत्वेन।अन्यत्रतृजन्तस्यैवेतिनियमफलकल्पनेनक्रोष्टुनित्यसङ्गतमितिभावः।योगविभागेति॰ तृ
तीयादावच्येवोभयमन्यत्रतृजन्तस्यैत्येवकल्पनायांसर्वनामस्थानेतृजन्तप्रयोगसिध्यातृज्वत्क्रोष्टुस्त्रियामित्येववदेत्।एवञ्चान्यत्रतुन्नन्तमेवेति
सिद्धम्।तत्रशङ्कते।नचेति॰ मृगवाचीति॰ मृगशब्दोऽत्रपशुजातीयपरः।एतेनअत्रैवादाविदंसूत्रत्रयन्तुशृगालवाचिक्रोष्टुशब्दयोर्व्यवस्थार्थमित्य

मे·क्तमिहतुमृगवाचीत्युक्तमितिपूर्वापरविरोधइत्यपास्तम्।तथाचोक्तंविश्वकोशे।मृगःपशौकुरङ्गेपिकरिनक्षत्रभेदयोः।याञ्चायांमृगयायाञ्चमृगीतु
वनितान्तरेइति।तेन·भाव्यमानस्यापिक्वचित्सवर्णग्राहकत्वज्ञापनेन॥ ៖ ॥कौस्तुभोक्तिं·खण्डयति।यत्त्विति·तपरत्वेनप्रयोगेश्रूयमाणैकमात्रि
यत्तुतपरत्वंढ्लोपइतिदीर्घबाधनार्थमितितन्न·सुपत्त्रवाजिनावाणाज्वलिताइवपन्नगाः।नैर्ऋतोरस्यभासन्तसवितूरश्मयो
यथेतिरामायणप्रयोगविरोधात् उरण्रपरइतिसूत्रेऽण्ग्रहणाभावेउरपरइतिभाष्यप्रयोगविरोधाच्च·सस्यैवेति·सैय्योगा
न्तलोपेनसिद्धेनियमार्थम्।तेनोर्गिसादौनेतिभावः।विपरीतनियमस्तुनापुमान्स्त्रियेतिनिर्देशात् एरनेकाचइतिसूत्रमेरितिप
दरहितंसानुवृत्ताद्वृत्तविशेषणंसवार्तिकञ्चानुवर्त्ततइत्याह·धात्ववयवेसादि·गतीतिच·सकृल्लावित्यत्रक्रियाविशेषणत्वेन
कर्मत्वाद्यण्।नभूसुधियोरितिनिषेधेप्राप्तेआह·वर्षाभ्वश्चेति·वर्षाभूर्दर्दुरेपुमान्स्वार्थिकइति·स्वस्याःप्रकृतेरर्थःस्वार्थस्त
त्रभवइत्यर्थेऽध्यात्मादित्वाट्ठञ्।द्वारादिषुस्वग्रामस्वाध्याययोःपाठेनस्वशब्दादेश्चेदेतयोरेवेतिनियमार्थकेनैजागमोनापुन
र्भूशब्दस्यरूढस्यनित्यस्त्रीत्वादाह·यौगिकइति·॥ ៖ ॥ इत्यूदन्ताः॥ ៖ ॥वर्णैकदेशानांवर्णग्रहणेनाग्रहणेरेफाभावादाह·ऋ
वर्णादिति·व्युत्पत्तिपक्षइति·अव्युत्पत्तिपक्षेत्ववादिषुपाठाद्दीर्घशङ्कैवनेतिभावः।व्युत्पत्तिपक्षेनिरनुबन्धकत्प्रत्ययान्ताएवेतिक्लु
लतृचावितिभाष्यस्वरसः॥ इत्यृदन्ताः ॥वैकल्पिकेति·यत्तदेतेभ्यइत्यत्रत्यदाद्यत्वकरणादतिदेशस्यापिइत्यादौधात्वनुकरणे
विभक्तिकरणेनवैकल्पिकत्वस्यज्ञापनादितिभावः।अनुकरणस्यानुकार्यशब्दस्वरूपमात्रमर्थइतिप्रातिपदिकत्वम् अनुकार्येञ्चा 
कएवादेशःस्यादित्यर्थकस्यनेनेतिभावः।रादेवसंयोगान्तस्यसस्यलोपइत्याकारकन्नियमन्निरस्यति।विपरीतेति·क्रियाविशेषणत्वादिति·लुनात्यर्थेफ
लांशविशेषणत्वादित्यर्थः।द्वारादिषुस्वशब्दपाठेनतदादिग्रहणस्यतत्रचोदितत्वात्।स्वादेरितीतिज्ञापकेनवातदादेरेवैजागमस्येष्टत्वात्स्वार्थिकइत्यनुप

भे· व्याख्यानादिति· यद्यपिनिमित्तादिभेदेनातिदेशस्यषड्विधत्वम्प्रसिद्धन्तथापिप्रकृतेरूपातिदेशस्यैवसर्वकार्यसाधकतानिमित्तातिदेशोव्यपदेशातिदेशोवा तृजन्तत्वप्रयुक्तकार्यलाभेपितुन्नन्तत्वप्रयुक्तंकार्यन्नस्यात्। अर्थातिदेशस्यतुसम्भवएवन। उभयोरप्येकार्थत्वात्। तादात्म्यातिदेशस्तूभयोःसहप्रयोगएवय थापरशुनावृश्चन्नित्यत्रसहप्रयोगेसुबामन्त्रितइतिवर्त्ततेनतथाप्रकृतेसम्भवस्तेकार्थत्वादेवसहप्रयोगस्यासम्भवात्। शास्त्रातिदेशेकार्यातिदेशेवात्तु न्नन्तस्यरेफात्मकयणादेशलाभेपितस्योदात्तस्थानिकत्वाभावादुदात्तयणोहल्पूर्वादितिस्वरोनस्यादितिपरिशेषाद्रूपातिदेशएवोचितइत्येवंरूपादित्यर्थः।

व्याख्यानात्। प्राधान्याच्चरूपातिदेशोयमित्याह· क्रोष्टुशब्दइति· तच्चोदात्तऋकारविशिष्टमतिदिश्यते तृज्वदिति चकारोच्चारणेन क्रोष्ट्रादावुदात्तयणइतिस्वरसिद्धिर्बोध्या· पञ्चादेस्तुनातिदेशः। अर्थतआनन्तर्य्याभावात् इदंसूत्रंस्त्रियाञ्चेतिचप्रयोगनियमफ लकमितिबोध्यम्· अप्तृन्· ननुव्युत्पत्तिपक्षेतृन्नन्तत्वात्तृजन्तत्वाद्वादीर्घसिद्धेनप्त्रादिग्रहणंव्यर्थमतआह·नियमार्थमिति· अ न्येषामुणादिव्युत्पन्नानांसञ्ज्ञाशब्दानान्नेति नेष्ट्रादयोप्युणादयएवेतिभावः। तेषान्तृन्नितिसूत्रस्थवार्त्तिकेनव्युत्पादनान्नप्त्रा दीत्यादिग्रहणेनप्रशास्तृशब्दस्यैवग्रहणमित्यन्ये· अव्युत्पत्तिपक्षेतुविध्यर्थमेवबोध्यम्· भाष्यप्रयोगादिति· एवञ्चौणादिकस्य व्युत्पादनमप्रामाणिकमितिभावः· पङ्कजादिवत् योगरूढोयम् येत्वौणादिकत्वमेवास्यस्वीकृत्यभाष्यप्रयोगादेवदीर्घत्वमिच्छ न्ति तेमान्याः। भाष्यकृतान्यप्रयोगस्योदाहरणत्वेनदानेप्यस्यभाष्यप्रयोगत्वाभावात् ण्वुल्तृचावितिभाष्येतुतृचश्चकारोव्यर्थः

प्राधान्यादिति· प्राधान्यञ्चात्रसर्वेष्टसाधकत्वरूपम् यस्यकस्यचिद्रूपस्यनातिदेशइत्याह· पञ्चादेरिति· प्रयोगनियमार्थमिति· असम्बुद्धौसर्वनामस्था नेस्त्रियाञ्चतृजन्तस्यैवप्रयोगइत्येवंरूपप्रयोगनियमइत्यर्थः। व्युत्पत्तिपक्षइति· उणादिनाव्युत्पन्नानांसञ्ज्ञाशब्दानाञ्चेदेतेषामेवएतेनयत्फलितं न्तदाह· अन्येषामिति· तेषामिति· नेष्ट्रादीनामित्यर्थः। अप्रामाणिकमितीति· एवञ्चनाप्तृन्नियमव्यावर्त्यइतिभावः। ननूद्गातृशब्दस्यरूढत्वमस्तिउणा

 मै॰ इत्थं हि तत्र भाष्यम्। उरण्परसूत्राणंशे सन्देहः। अण्प्रत्याहारः पूर्वेण णकारेण परेण वा। असन्दिग्धं पूर्वेण न परेण। कुत एतत्। परभावात्। नन्वुः स्थाने परे
 णः सन्तिा ननु चापमस्ति कश्चिदर्थम्। आह चैवार्थमिति॰ यदि परेण स्यात्तर्हि यणो रपरत्वापत्तौ रेफद्वयश्रवणप्रसङ्गः। रो रीति लोपेन सिद्धम्। एवं न हि सामर्थ्यात्पूर्वेण
 न परेण। यदि परेण स्यात् णग्रहणमनर्थकं स्यादुरजिसेवब्रूयादिति॰ तत्र॰ गाम्लादौ। ऋकारस्य णि रपरत्वे यद्यपि लोपेन सिद्धिस्तथाप्यत्र लपरत्वे लद्वयं
 श्रूयेतेति सामर्थ्यवर्णनमयुक्तमिति भावः। फलाभावेनाप्रवृत्त्या। उरण्रपरस्याप्रवृत्त्या आशयादिति॰ भाष्यकारस्येत्यादिः। आशय इत्यनेन सूचिता
मरुचिं सूचयन्नाह॰ वस्तुत इति॰ ईदृशानामॢकारस्थानिकलादेशघटितानामनार्षप्रयोगाणामचिन्त्यमिति॰ यत्तु सूत्रकारमते ऋकारॢकारयोः

ॢकारस्य यणि हि तत्र लपरत्वार्थं परेण णग्रहणं स्यादिति सामर्थ्योक्तिरसङ्गता। ऋकारस्य णि तु रो रीति लोपेन न विशेष इति त
न्न॰ ऋकारांशे हलरूपाणि रो रीति प्रवृत्त्या फलाभावेनाप्रवृत्त्या तत्साहचर्यात् ॢकारांशेपि हलरूपाण्यप्रवृत्तिरित्याशयात् वस्तुत ईदृ
शानामभिधाने दृढमानं चिन्त्यम् सेरिति॰ इना सहेत्यर्थः। वोपसर्जनस्येति सत्वम् एकादेशस्य पूर्वान्तवत्त्वेपि लिङ्गाद्यन्वय्यर्थप्रति
पादकत्वादव्ययमिति महासंज्ञायाः स्यानव्ययत्वान्न विभक्तिलुक् सादेशान्पूर्वमाङ्गुणस्तु नानेन्द्रस्येति ज्ञापकेन पूर्वोत्तरपदनिमि

सवर्णसंज्ञासत्वादुःस्थाने जातस्य लकारस्य लपरत्वार्थम्परेण णकारेण प्रत्याहारो भविष्यतीत्यपि न। ((न कार्यान्पूर्वमेकादेशप्रवृत्तेः॥
नाज्झलाविति सूत्रे परशब्दानानीसत्रदोषवारणाय। अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झत्वादिति वार्तिककारमतेन तन्मते लोपस्य झरो झरीति हलोपमामिति
सूत्रविहितस्य वा नित्यतया गम्लेत्यत्र लकारस्य लपरत्वेपि लेपि न विशेषाभावादिति तन्न॰ भाष्यकारैर्लोपस्य शरोऽचीति ज्ञापकेन वैकल्पिकत्वस्य वर्णना २४५
न्नमते प्रकृते परेण णकारेण णग्रहणे लद्वयश्रूयेनाज्ग्रहणे तु नेति वैषम्यस्य दुरपन्हवतया णग्रहणस्य ज्ञापकत्ववर्णनासङ्गतिरिति यथोत्तरमु
नीनां प्रामाण्यात् ईदृशानामनभिधानस्यावश्यकत्वादिति दिक्। ननु एवमन्तरङ्गत्वादाद्गुणे ततः सादेशेऽदन्तरूपापत्तिरत आह॰ सादेशान्पूर्वमिति॰ ॥

भे॰ भाष्येणविरोधादिति॰ तत्सूत्रभाष्येकस्यायम्प्रतिषेधइतिशङ्कायांसर्वप्रतिषेधइतिसमाधानेकृतेयद्येवमन्त्वग्निरुषसामग्रमख्यत्। प्रत्यग्निरुषसामग्रम
ख्यदित्यत्रयणादेशस्यप्रतिषेधःप्राप्नोतीत्युक्त्वाएङ्प्रकरणात्सिद्धम्। एङः। अतीतिवर्त्ततेयद्येवमप्यपठितेः तोरोरप्लुतादप्लुतइत्यत्राप्येङ्॰ ग्रहण
म॰ सयइति॰ अनुवर्त्ततेइति॰ सुप्तिङितिसूत्रादितिशेषः अयचीति॰ प्रत्यज्येति॰ इदन्त्वासर्वनामस्थानेइत्यत्रत्यनञसम्बन्धमभिप्रेत्य॰ नेति॰ इ
दमपिनिषेधार्थकोऽ शब्दमभिप्रेत्यस्वादिषुपूर्वपदंभवति ततोयजादावसर्वनामस्थानेपरेमध्येचेत्सुवन्तंतत्पदंभवतीतिवाक्यद्वयेनसुवाचे
त्यादिसिद्धौवाक्यत्रयकल्पनाविन्याएवंचसौपरेफलभेदोनेत्यपरमनूकूलंसमवतीत्यादौशमुपयदपूर्वंसुवन्तम्भूशब्दादावारक्विव
न्त्वनान्तः पादमितिसूत्रस्थेननचेङः परान्नासरोरुरस्तीतिभाष्येणविरोधात्सावीदक्षानांप्रयोगोऽनुचितः सावपिपदत्व
मत्वादितिवाच्यम् योगविभागसिद्धस्यसोपदत्वस्यक्काचित्कत्वेनादोषात्॰ सावप्रयोगएवेत्यन्येसयइति॰ नचास्यानवे
र्तिविभक्त्यापदत्वादेङः पदान्तादित्यादिदुर्वारमितिवाच्यम्॰ भाष्यस्वादिष्वितियोगंविभज्यस्वादिषुपूर्वंपदमित्यर्थः।
ततोऽसर्वनामस्थानेः यचि॰ सुवन्तमित्यनुवर्त्तते अयचीतिप्रसज्यप्रतिषेधः तेनयजादौसर्वनामस्थानेपूर्वंपदन्नम
ध्येचेत्सुवन्तंतदपिपदन्नेतिव्याख्यानेनादोषात्॰॥ ९९ नाल्टितिपिप्रापिगुणेपूर्वंरूपमपिनयजादौत्यादिशब्दस्यप्रकारवाचित्वेनशायो
पियजादित्वादितिएवंसजनन्तीत्यादिबोध्यम्॥ ॥ ९९ सम्बन्धः स्यात्तथाचाग्रेत्रवायोरत्रेत्यत्रैङः परस्यात्वम्प्राप्नोतीत्याशङ्क्यपदान्ताभिसम्बद्धमेङ्
ग्रहणमनुवर्त्ततेनचेङः पदान्तात्यरोरुरस्तीतितत्रोक्तत्वेनविरोधादित्यर्थः। योगविभागसिद्धस्य॰ उत्तरपदत्वेचापदादिविधाविनिवार्त्तिकमप्रत्याख्यानसम
॥ येस्वादिष्वितिसूत्रेस्वादिषुपूर्वस्यपदत्वंयोगवि- भागेनसाधितन्तस्य॰॥ ॥

शु·शे· भै· ननूत्तरपदस्योक्तरीत्यानिषेधेपिपूर्वपदस्यपदत्वात्पूर्वान्तवद्भावेनसेइत्यस्यपदत्वंस्यादित्निपूर्वस्यन्दुर्वारमित्यतआह· आतिदेशिकस्यापीति·यदितु
टी·भै· प्रत्याख्यानप्रकारस्यगुरुतयालाघवार्थमुत्तरपदत्वेचापदादिविधाविति वचनमारभ्यते।तदाप्याह· उत्तरपदत्वइति· तद्घटितइति·उत्तरपदघटितइत्य
टी·भ· र्थः।णित्कार्यस्यासम्भवादिति·प्राधान्यात्कार्यातिदेशइतिभावः।ननुशसस्तद्धितस्यापिसम्भवादेत्साह चर्यात्सुवेवेत्यनुपपन्नमतआह·अचीत्यधिका
२५६ भ· गोतोणित्-विपरिणम्यतेइति·णित्कार्य्यमिति·एवंचणिच्छब्दस्यणिद्धूति लक्षणेत्यर्थः वस्तुतःसप्तम्यन्तमेवानुगोतइतितुषष्ठ्यन्तंणिच्छब्द

आतिदेशिकस्याप्ययनिषेधइतिस्पष्टमेव।उत्तरपदत्वेचापदादिविधावितिप्रतिषेधाच्च उत्तरपदस्यतद्घटितस्यवापद
त्वेकर्त्तव्येऽन्तर्वर्त्तिविभक्तेः प्रत्ययलक्षणन्नेति तदर्थोतोनयोगविभागमूलकप्रत्याख्यानेनफलभेदइतिकेचित् इतोऽदि
त्यतोऽनुवृत्तंसर्वनामस्थानेइतिप्रथमयाविपरिणम्यते।णिदित्यनेनसामानाधिकरण्यादित्याह·सर्वनामस्थानमिति·न
त्रणितःकार्यस्यासम्भवात् णितियत्कार्य्यन्तदतिदिश्यते शसेति· अचीत्यधिकारात्तद्धितशसोनग्रहणमितिभावः।गामि
ति·परत्वादत्रवृद्धिस्तुन· अनवकाशत्वेनात्वस्यापवादत्वात् तदाह ओतोणिदिति·सूत्रेतपाकरणेनगस्याविवक्षितत्वमिति

नितितिचितिहुँ कुतिचितिमि

स्यणिन्निमित्तककार्य्यलक्षणएवंचसर्वनामस्थानेपरेगोशब्दस्यणिन्निमित्तककार्य्यंभवतीत्यर्थइतीदंचिन्त्यम् नदोषइति हेचित्रगोइत्यत्रन
दोषःविहितविशेषणस्यवक्ष्यमाणत्वात्॥ एरादिति·यदुक्तमपवादत्वादात्वेनवृद्धिबाधइतितत्सोपपत्तिमाह·।सूत्रेतपरकरणेनेतिचित्रगुशब्दे २५६
तिप्रसङ्गनिवारणायकृतमातपरसूत्रेचाण्ग्रहणानुवृत्त्यासमुदायस्यानण्त्वान्नपरसूत्रापत्तेस्तपरत्वंव्यर्थमिति तद्कारस्याविवक्षायान्नास्यर्थग्राह
कमितिभावः।मूलोक्तन्दूषयन्सिद्धान्तमाह· परेत्विति· नन्वेवंचित्रगुरित्यादौदोषइत्यतआह·चित्रगुरित्यादाविति·अत्रस्थानिवद्भावेनणत्वस्यप्रतिषेधः

मे· पन्नमतआह·द्वारादिष्विति· अग्रहणइति· इतिपदस्यइतिशेषः।नन्वनुकार्यानुकरणयोरभेदइतिपक्षेऽर्थवत्वाभावात्कथंविभक्तिरतआह। अनुकार्यञ्चेति॥
॥ःॐः॥ नन्वनुकरणेकिञ्चिद्विकारेकथमर्थोपस्थितिरतआह। ईषदिति· वाचकेति· अनुकरणेस्यर्थः।अर्थः। अनुकार्यम्।तत्रदृष्टान्तमाह· क्रिरइति·ननुसूत्रस्थ
ईषदानुपूर्वीव्यत्ययेपिवाचकसादृश्यादर्थोपस्थापकत्वमित्यत्रकैयटेप्रासदीव्यतोऽणित्यत्रभाष्येचस्पष्टम् अतएवकिरइत्यादितःकृधा
तुरितिबोधः।भूसत्तायामित्यादौत्वितएवनिर्देशात्कदाचिदनुकरणेद्विभक्त्याभावोपिसचसूत्रेष्वेवेतिप्रामाणिकाः।गविस्ययमाहेतितुवा
नस्यैवानुकरणेमनुकार्यस्वरूपभङ्गभियाचनत्वलोपः।फलांजधिन्यादौजश्त्वाभाववदित्याहुः। इत्वेइति·किरश्चपञ्चभ्यइतिनिर्देशा
दधातुप्रत्ययेपितत्प्रवृत्तिरितिभावः।कीरिति· कृधातुरित्यर्थः।गुणेनेति· ऋतउदित्युत्वमप्यतएवन· अतएवग्रापऊीतिसूत्रनिर्देश स
ङ्गच्छते॥ःॐः॥इत्यृदन्ताः॥ःॐः॥ अनडिति· ऋलुवर्णयोःसावर्ण्यादितिभावः॥गमॄनिति· लृवर्णस्यदीर्घाभावादवर्णएवेतिभावः।
ननुतुल्यास्यसूत्रेभाष्यकृतात्रऋतिऋवेत्यादिविधेययोरेफद्वयगर्भलद्वयगर्भयोरत्वदीर्घत्वाङ्गीकारेणत्रद्विलकारईषत्स्पृष्टोदुर्वारः।अमि
चतथाधातूलमित्यत्ररेफद्वयगर्भोपीतिचेन्न· अकःसवर्णेइतिसूत्रेउक्तोत्तरत्वात्गम्लेति·यत्तुलणसूत्रेउरणरपरइत्यत्राजितिवक्तव्येऽ
णग्रहणसामर्थ्येनाणपूर्वलोवेत्युक्तमभाष्ये॥ ॥ ॥वविभक्त्यभावस्यैवंरीत्याकल्पनेगविस्ययमाहेत्यत्रपदान्तत्वाल्लोपःस्यादतआह·।
गविस्ययमाहेतीति· आहुरिति·सिद्धान्तानुसारिणः।अतएव।ऋतइतितपरत्वादेव। अतएव·उत्वाप्रवृत्तेरेव।उक्तोत्तरत्वात। ह्रस्वऋकारद्वयैका
देशेप्रथमस्यऋकारलृकारस्थानिकैकादेशेद्वितीयस्यसाधुत्वमितिप्रतिपादितत्वात। केचितलणसूत्रस्थभाष्यप्रामाण्येनलृकारस्यणादेशो
दुर्लभइतिगम्लृत्यसङ्गतमितियत्तद्दूषयितुनन्मतमाह।यत्त्विति·भाष्येति।

शा·शे· भैः स्थानिवत्त्वप्रतिषेधात् प्रतिषिध्यते स्थानिवद्भावः। गोः पूर्वणित्वात्स्वरेषु स्थानिवद्भावो न भवतीति स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा
टी·भै· हि सम्बुद्धिजसोः प्रतिषेधः। यो हि मन्यते परकारणसामर्थ्यादत्र न भविष्यतीति सम्बुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात्। हे चित्रगो। हे चित्रगव इति। अथेदानीं सत्य
टी·भ· पि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। ननु चेदानीं सत्यपि स्थानिवद्भावप्रतिषेध एतया परि
२८७ भाषया शक्यमुपस्थातुम्। नेत्याह। न हीदानीं कश्चिदपि स्थानिवत्त्वादिमुक्तम्। एतद्भाष्येयत्तत्परकरणप्रयोजनमुक्तं चित्रगुरिति तद्व्याख्यानावसरे तप
रस्तत्कालस्येत्यत्राणितिनानुवर्त्तत इत्यनणोपि तत्कालस्य ग्रहणम्। इतरथा हीति· यदि स्थानिवत्त्वनिषेधो नाश्रीयते तदा सत्यपि तपरकरणे सम्बुद्धौ जसि गु

स्वरितो वेति सूत्रस्थभाष्यविरोधः। प्रकृते पूर्वपदप्रकृतिस्वरेण सम्भूतस्यानोदात्तत्वे शेषनिघातेन उशब्दस्यानुदात्तत्वात्तदेकादेशस्यै
कादेश उदात्तेनेत्युदात्तत्वे सम्भवत्येवादौ तदुदाहरणसम्भवादिति तन्न· तृतीयादिष्वनभिधानेपि अन्यत्र तत्सत्त्वबाधकाभावात् न च गो
त इति सूत्रे घोश्च वृद्धिर्वक्तव्येति वार्त्तिके घोशब्दस्यैवोपादानादन्योकारान्ताभाव इति वाच्यम् उपलक्षणतया व्याख्यानेनादोषात् प
रैत्वीदृशानामनभिधानेपि न क्षतिरित्याहुः। रायो हलि· अष्टन आ इत्यत आ विभक्ताविस्यनुवर्त्तते॥ ॥ इत्यजन्ताः पुल्लिङ्गाः॥ ॥

णे कृते स्थानिवत्त्वात्तत्कालत्वाच्च णित्वं स्यात्। प्रतिषिद्धे तु स्थानिवत्त्वे गुणे कृते गोरूपस्य लाक्षणिकणित्वाप्रसङ्ग इत्युक्तं कैयटेन। एतेन स्थानिवत्त्वप्रति
षेध एव भाष्यकारस्य निर्भर इति कैयटस्यापि सम्मतम्। ओकारोपलक्षणत्वेन व्याख्यानन्त्वेकदेशयुक्तित्वसूचनायेति विभावनीयम्। उदात्त इति· आङ्
त्वात्तदन्तेपि प्रवृत्तिः। सिद्धान्तेपि गोत इति तपरकरणादोकारमात्रं विवक्षितमिति मते हे भानो इत्यत्र प्रसक्तामतिव्याप्तिं वारयितुं यद्धि हितविशेषणेन तथाव्या २८७
ख्यानं तत्प्रतिपदोक्तपरिभाषयापि सिद्धमित्याह· यदि त्विति· अत्र यदीति न याप्यिकत्वसूचनाय किन्तु शास्त्राणि चेत्प्रमाणानीतिवत् सन्दिग्धे सन्दि
ग्धवचनम्। विधेयस्यार्थस्य प्रदार्ढ्यसूचकमेव। वर्णग्रहणे प्रवृत्तिसूचकं यदादेच उपदेशे शितीति सूत्रस्थमुपदेश इति पदन्तदनिसत्त्व एव।

मे॰ ज्ञापकमिति भावः॥ उरिति॰ शम्भुरित्यर्थः। केचित्तु स्मृतो शब्दस्वीकारे तृतीयैकवचनाद्यावप्यस्य प्रयोगः स्यात् तथा च स्वरितो वेति सूत्रस्थभाष्यविरोधः स्या
दतो ऽस्यानभिधानमेव युक्तमित्याहुस्तन्मतं खण्डयितुमाह॰ यत्त्विति॰॥ ॥स्वरितो वेति सूत्रस्थभाष्यविरोध इति। एवं हि तत्र सभाष्यम्। एकादेशस्वरोऽन्त
रङ्गः। एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः। किम्प्रयोजनम्। अथवा यावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम्। अयम्भावः। उदात्तानुदात्तयोर्य आदेश
स्तस्योभयान्तर्यात्स्वरितत्वे प्राप्ते एकादेश उदात्तेनोदात्त इत्यनेनोदात्तत्वं विधीयते। अयश्चोदात्त एचोऽयवायाव इत्येतद्दृष्ट्या ऽसिद्ध इत्यादेशस्थानिस्वरेण स्वरि
र्जनादित्यस्यसम्वन्धोदुर्घटः अतएववहुदामानिपुराण्यतिक्रान्तानगरीत्यत्रङीमेत्युक्तत्वेनास्यविरोधइतितन्न· मनोरमाव्याख्यानपरशव्द
रत्नग्रन्थस्यस्त्रियामितिप्रातिपदिकविशेषणमितिपक्षेऽनुपसर्जनादित्यस्यारम्भइतिपक्षाभिप्रायकत्वात्। विध्यर्थमिदमिति· अनउपधेतिसू
त्रमित्यर्थः। नन्वत्रापिविधानसामर्थ्यान्ङीन्निषेधडापांपर्यायसिद्धावन्यतरस्यामितिव्यर्थमतआह· अन्यतरस्यांग्रहणन्त्विति· केचित्तुडाबु
भाभ्यामन्यतरस्याम्। अनुपसर्जनात्। उपधालोपिनोवाइतिडाप्सूत्रेचयोगविभागेनोक्तरीत्याऽनोवहुव्रीहेरित्यनुवर्त्यान्नाद्बहुव्रीहेर्डाप्वाऽनेन

श·शे· भे· इदं केत्यस्यसाधुत्वमुपपादयति देवदत्तशब्दादिति· मतभेदेनेत्वविकल्पः शकुनावेवेत्यत आह· अत्रापीति· अन्यत्र· शकुनिभिन्ने। ननु वृ
टी·भै· न्दारकाश्चैव तानीति कोशाद्वृन्दारकशब्दो नित्यपुल्लिङ्ग इत्यत आह· मुख्यवाचीति· अतएवभाष्ये वृन्दारका वृन्दारिके तु दात्ततम। मुख्यवाचक
टी·भ· स्यत्रिलिङ्गत्वे तु त्रिसूत्र इत्युपक्रम्य वृन्दारकौ रूपिमुख्यौ विसमरसिंहोक्तिः प्रमाणम्। उदीचामातः स्थाने। अत्रार्थगतस्त्रीत्वमाकारे आरोप्य

३५३ आशिषि· आशिषि विहितस्य वुनोऽस्येत्वन्नेत्यर्थः। जीवतादित्यर्थे आशिषि चेति वुन्· देवदत्तशब्दादनुकम्पायाङ्न्यनजा
दौ च विभाषा लोपो वक्तव्य इति दत्तशब्दस्य लोपः। देवदत्तिके त्युपन्यासस्तु दत्तलोपमभिव्यक्तुम्। ध्रुवकेति· ध्रुस्थैर्ये पचाद्यच्चि
कुटादित्वात् गुणाभावे उवङ्। ततष्टाप्यज्ञातादर्थे कः। केण इति ह्रस्वः पुनष्टाप्। चटेः सञ्ज्ञायां क्वुन्· वार्तिकोक्ता गणा आ
कृतिगणः। तेन कन्यका ध्रुवका अलका इष्टकादयः साधवः। उदीचान्त्विति· अत्रापि शकुनावितिसम्बध्यते· तेनान्यत्र
नित्यमेवेत्वम्· सूतकापुत्रिपुत्रके सकारसहितः पाठोऽपपाठः कैयटाद्यसम्मतेः सूतशब्दात्स्वार्थे कन्· वृन्दशब्दाच्छृङ्ग
वृन्दाभ्यामारकन्निति मत्वर्थीय आरकन्· वृन्दारकशब्दो मुख्यवाची त्रिलिङ्ग इति भावः। ङीन इति· शार्ङ्गरवादित्वान्ङीन्ज्ञा
तस्येति भावः। अन्यत्र· सूतकादौ· उदीचा· यकपूर्वत्वञ्चाव्यवहितमेव· एवमग्रे यस्यात् दिति सूत्रे कापूर्वत्वमपि·उ
दात्तस्वरितयोरित्यादाविवात्र वादेऽपि निर्दिष्टपरिभाषाप्रवृत्तेरेतेन क्रशशशब्दात्के ह्रस्वे इत्वविकल्पो न॥ ॥
यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः। यकपूर्वस्य यकौ पूर्वौ यस्या इत्यर्थः निर्दिष्टपरिभाषेति· तस्मादितिपरिभाषेत्यर्थः। इयञ्चाव्यवधानांश
मात्र प्रापिका उत्तरस्येसंशरहितो पतिष्ठते। पञ्चमी निर्देशश्च यकौ पूर्वौ यस्या इति विग्रहे इष्टव्यः। तत्र पूर्वशब्दसत्त्वात्तेन विरोधादुत्तरांशस्य नोपस्थितिः। एतत्फलमाह· तेन क्रशशाशब्देति·

भे॰ नेत्यनुवृत्तावपीति· अनुवृत्तेः फलमित्वविधायकपूर्वसूत्रेणसमाननिमित्तकत्वलाभः। अन्यथापूर्वसूत्रस्यसम्पूर्णस्यानुवृत्तिं कृत्वाव्याख्यान-
स्यावश्यकतयागौरवापत्तेः। स्त्रीवोधकाकारस्येति· स्त्रीवोधकश्चासावाकारश्चेत्यर्थः। अवयवषष्ठीति· स्त्रीवोधकस्याकारस्येत्यत्रावयवषष्ठ्य-
वस्यादित्यर्थः। अत्रवहुलत्वसंस्कारश्चसांकाश्यकेत्यस्यासिद्धिरूपः। तदनुपपादानादि· साक्षादुच्चारितत्वनत्वच्छब्दानुवादेनविहितत्वंवाप्र-
तिपदोक्तत्वन्तदुभयमप्यत्रनास्तीतिभावः। ननुस्त्रीप्रत्ययशब्दस्यमूलेऽभावात्स्त्रीप्रत्ययः किमितिमूलोक्तमयुक्तमतस्तद्योजयति। यकपूर्वेति·
नेत्यनुवृत्तावपिनिषेधविकल्पेविधिविकल्पस्यफलितत्वादाह· इहेति· आतः किमिति· उदीचांयकपूर्वायाइत्येवास्तुय
कपूर्वस्त्रीवोधकाकारस्येत्यर्थः। साङ्काश्यकेचनातिप्रसङ्गः। प्रत्ययावयवत्वेनाकारस्यस्त्रीवोधकत्वाभावादितिप्रश्नः व
हुलत्वसंस्कारानुरोधादवयवषष्ठ्येवस्यात्· नचप्रतिपदोक्तस्त्रीप्रत्ययस्यैवात्रग्रहणं विशिष्यतदनुपादानादित्युत्तरम्
स्त्रीप्रत्ययस्यकिमिति· यकपूर्वायाइतिस्त्रीलिङ्गनिर्देशः किमर्थमितिप्रश्नः। धात्वन्तेति· धात्वन्तयकारककारपूर्वयोरका
रयोरित्यर्थः। इत्वमितिशेषः। भस्त्रैषा· अयमपिनिषेधविकल्पइत्यत आह· अतइति· अत्राप्यातः स्थानइत्यनुवर्त्तते· नद
न्तेति· येनविधिरितिसूत्रेसदादिविधिभस्त्रादिग्रहणञ्चप्रयोजनमितिभाष्यात्· अपिनानञ्भिन्नपूर्वाणामपूर्वाणाञ्चस
ङ्ग्रहः। नञ्पूर्वाणामपीतिस्पष्टार्थम्· पदाङ्गाधिकारेतस्यचेतिसिद्धेः। उपसर्जनार्थमिति· एवञ्चानुपसर्जनेआदाचार्या
णामित्वात्वम्भवत्येवोपसर्जनेस्यचारितार्थ्येनवाधेमानाभावात्॥ ९ पूर्वोक्ताभिप्रायेणाह· अयमपीति· भस्त्रैषेतियोगइ
त्यर्थः। यत्वनञ्पूर्वाणामपीतिज्ञापकादिहेत्वविधौतदन्तविधिर्नेतितद्दूषयितुमाह· येनवि धीति· भस्त्रादिग्रहणमिति· एतेनप्राकृतेतदन्तवि-
धिर्भाष्यसम्मतएवेतिध्वनितम्। उपसर्जनेऽस्यचारितार्थ्येनेति· निर्भस्त्रिकेत्यादौगोस्त्रियोरितिह्रस्वत्वेपुनष्टापिकृतेऽस्यापोभाषितपुंस्कादि
धानेनाभाषितपुंस्केत्यस्याप्राप्तिरिति भावः॥

श॰शे॰ भे। अकचित्कृतइति· अवयवगतकुत्साविवक्षायामिदम्।समुदायगतकुत्साविवक्षायामाह·अकृतेवेति· ततोऽकचीति· समुदायार्थगतकुत्साविवक्षायामित्यादिः।समासादिति· प्रत्ययलक्षणेनेत्यादिः।नञ्तत्पुरुषस्योत्तरपदार्थप्रधानतया सर्वनामत्वन्तद्विषये प्रक्रियामुक्त्वा बहुव्रीहौ

टी॰भे॰ विशेषं वक्तुमाह·बहुव्रीहावविति· प्रियैतकेनि·नबहुव्रीहाविति सूत्रारम्भवादिमतेन· मन्याख्यानरीत्याह· प्रियैतकत्कावेति· ह्नएषाइत्येतद्विष

टी॰भ॰ अन्यस्य·अनुपसर्जनस्य·उत्तरसूत्रमभाषितपुंस्काच्चेति· अन्तर्वर्तिनीमिति· नएतदस्विति स्थितेअकचिकृतेऽकृतेवा

३५४ नञ्तत्पुरुषेऽनाऽज्ञानयीति न्यायेन त्यदाद्यत्वान्याक्सुपोलुकि ततोऽकचिवापुनर्विशिष्टात्सुपित्यदाद्यत्वेदादिसमासात्पूर्वो

त्पन्नसुपःपरएवदावितिभावः।बहुव्रीहौतुप्रियैतत्काप्रियैतकत्कावाकवभावेप्रियैतकादिसेवसर्वथानेत्वप्राप्तिः।अनेष

केति· अज्ञातैषकानएषकेतिविग्रहः।पूर्ववन्नञ्समासेऽज्ञातानेषेति।असम्भवादिति· एषाहूतिनिर्देशात्सञ्ज्ञोपसर्ज

नयोरप्राप्तेरितिभावः।अकजर्हइति· एवञ्चतदकारस्यातःस्थानिकत्वाभावइतिभावः।अर्थान्तरेत्विति· आत्मज्ञाति

धनेष्वित्यर्थः।स्वाज्ञातावात्मनिस्वंत्रिष्वात्मीयेऽस्त्रियान्धनइतिकोशादितिभावः।कप्रत्ययान्तत्वादिति· तत्रवचनान्तर्व

र्तिविभक्त्याःसुपःपरत्वेकेनव्यवधानादितिभावः।सञ्ज्ञापूरण्योश्चेतिनिषेधेनसञ्ज्ञायाअपिभाषितपुंस्कत्वबोधनेनस

ञ्ज्ञाभूतेनाऽभाषितपुंस्काच्चेत्यनेनसिद्धिः॥ ए येऽसम्भवमुपपादयति· एषाहूतीति·अप्राप्तेरितिभावइति· ——— ए ३५४

वञ्चानुपसर्जनएवानेनभवितव्यन्तत्राकचिकृतेआतःस्थानिकत्वासम्भवइतिसूचितम्।ननुसञ्ज्ञाभूतस्यैतत्सूत्रोदाहरणत्वकथनमयु

क्तम्।उत्तरसूत्रेणतत्रेत्वसिद्धेरतआह·सञ्ज्ञापूरण्योरिति·

न

भिः इत्वभूतेति· इत्वम्प्राप्तो यो निर्देशः। इत्वघटित इति यावत्। ज्ञापकेनेति· तकारादेः प्रत्ययस्यावयवो यः ककारस्तस्मात्परस्य चेदस्यैवेति नियमे नेत्यर्थः। ननु यत्र टापो लुक् कृते त्वस्य श्रवणार्थमिकारनिर्देशोऽस्त्विति कथमेतन्नियामकमित्याशङ्कानिवारणायाह· पञ्चभिरिति· तदाशयः भाष्यकाराशयः। न चाचः परस्मिन्निति स्थानिवत्वेन पञ्चमृत्तिके त्वस्य श्रवणं सुवचम्। लुका लुप्तत्वस्थानिवद्विनिषेधात्· न चान्तरङ्ग इत्वे बहिर्भूततद्धितलुङ्निमित्तत्वेन टाब्लुको बहिरङ्गस्यासिद्धत्वेनेत्वम्भविष्यतीति वाच्यम् अन्तरङ्गानपीति परिभाषया बहिरङ्गपरिभाषा

त्मकनश्चेति· मृदस्तिकन्निति इत्वभूतनिर्देशेन ज्ञापकेनास्येत्वं वारयितुं शक्यमिति भाष्यकृतः पञ्चभिर्मृत्तिका भिः क्रीत इत्यर्थे पञ्चमृत्तिक इत्यस्यानभिधानमिति तदाशयः। अत्र तिकनि कर्तव्ये ऽकारोच्चारणादित्व नेति न वक्तुं शक्यम्· पञ्चोपत्सकोऽयामइत्यादावकारश्रवणानापत्तेः। टापो लुकि प्रत्ययलक्षणं स्थानिवत्व ञ्चेन· उभयोरपि न लुमतेत्यनेन निषेधात्· अतएव कतीत्यादौ वार्तिकमतेऽपि न गुण इत्यन्यत्र विस्तरः ॥

पवादत्वात्। अत्र मृदस्तिकन्निति वदुपाधिभ्यां त्यकन्निति सूत्रे तिकनि कर्तव्ये ऽकारोच्चारणादित्वन्न भविष्यतीति प्राचोक्तं दूषयति· अत्र तिकनीति· उभयोः। प्रत्ययलक्षणस्थानिवद्भावयोः। अतएव प्रत्ययलोपसूत्रस्य नियमार्थत्वपरभाष्यसङ्गतिरन्यथैतादृशे विषये न लुमतेति निषेधात्प्रत्ययलक्षणाप्रवृत्तावपि स्थानिवद्भावेन तत्प्रयोज्यकार्यं स्यादिति नियमार्थत्ववर्णनमसङ्गतं स्यात्· अतएव· उभयनिषेधादेव· वार्तिकमतेऽपीति· तन्मते न लुमतेति सूत्रेण प्रत्ययलोप इति सूत्रस्य विधायकस्य निषेधेऽपि स्थानिवत्वेन गुणः स्यादेवेति भावः। न गुण इति· एवञ्च नियामकत्वस्वीकर्तृभाष्यकारवचनप्रामाण्याल्लुमताऽऽच्छन्नेन लोपे सति कथमपि प्राप्तं तन्निमित्तककार्यं न भवतीति कल्प्यत इति भावः॥ ॥

भे॰ आचारेति॰ कर्त्रन्तक्विबन्तानामिति॰ इदमनड्वाह्यौ गौरादिषु पठ्यते तस्मादाचारक्विबन्तप्रकृतिककर्त्रन्तक्विबन्तेऽनुपसर्जनाधिकारचारितार्थ्यश
ङ्कायां न दृष्टव्यम्। एतेनादन्तत्वाभावात् क्विबन्ते कथम्प्राप्तिरित्यपास्तम्। यद्यपि दृश्वन्धात इति सूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारे क्विप्प्राली
ति। आचारक्विबन्तेऽनुपसर्जनाधिकारचारितार्थ्यशङ्कैवायुक्ता। तथापि हलन्तात्क्विपस्तादृशस्य सत्त्वमभ्युपेत्य समाधानमाह॰ एतज्ज्ञाप्ये॰ ।। उ
क्तार्थज्ञापकतापरेत्यर्थः। स्त्रीगोप्यक्तय इति॰ इदमुत्तरकाले स्त्रीत्वसत्त्वात् स्त्रीप्रत्ययापादनाय गृह्यमाणेति॰ स्त्रियामण्योऽकार इत्यादिरित्यर्थस्य

अयमेवेति॰ आचारक्विबन्तप्रकृतिककर्त्रन्तक्विबन्तानामनभिधानमेव स्त्रियाम्॰ एतद्भाष्यप्रामाण्यात्॰ पञ्चस्त्रीगोप्यक्त
योधनं यस्य स पञ्चगवधन इत्यत्रार्थवत्सूत्रोक्तार्थवत्त्वाभावादजन्तस्य प्रातिपदिकत्वाभावेन न ङीप्॰ आपिशलिना प्रोक्त
मधीते आपिशला ब्राह्मणीत्यत्र तु न ङीप्॰ प्रोक्ताणः स्त्रियामवर्तनात्॰ अध्येत्रण्णन्तु लुप्तः अण्योऽकार इति व्याख्यानेन वर्ण
श्रये प्रत्ययलक्षणाभावात्॰ अध्येत्रर्थगतस्त्रीत्वमादाय तदण्णिमित्तकस्य न प्राप्तिः। स्त्रियामित्यस्य गृह्यमाणविशेष
त्वात्तदण्णन्तस्त्रीत्वे वर्तनात्। अत एव काशकृत्स्निना प्रोक्तां मीमांसामधीते काशकृत्स्ना ब्राह्मणीत्यत्रापि न ङीप्॰ ।।

सम्मतत्वेन गृह्यमाणाण्विशेषणत्वात्॰ अत्र स्त्रियामण्योऽकार इत्यनेन पदेन तन्नान्ते स्त्रियां प्रत्ययविधानं तस्याणोऽपि स्त्रीत्वविशिष्टे उत्पत्तिस्तदेव स्त्रीत्वम
त्यासत्त्या विवक्षितम्। अत एव॰ निरुक्तस्त्रीत्वस्याविवक्षितत्वादेव॰ काशकृत्स्नि नेति॰ अत्र काशकृत्स्निना प्रोक्ता मीमांसेत्यर्थे काशकृत्स्निशब्दादणि कृते
तदन्तात् स्त्रियां ङी ङीपि पुनरध्येत्रामणि तस्याणो लिङ्गविशिष्टपरिभाषया प्रोक्तार्थकप्रत्ययान्तं यन्ङीबन्तं तन्नान्तः परत्वेन लुकि लुक्तद्धितेति ङीपो लुकि ३५५
श्रूयमाणस्याणोऽध्येत्र्यामवर्तनादित्यर्थः। अणन्तसमुदायस्य तु यः शिष्यत इति न्यायेनाध्येत्र्यां वृत्तेष्टापभवत्येवेति भावः।। ।।

मे· तद्व्यावर्त्यमिति· अनुपसर्जनाधिकारव्यावर्त्यमित्यर्थः। प्रातिपदिकाधिकारसत्त्वेनाणमात्रस्य प्रातिपदिकत्वादणन्तादित्यर्थसम्भवेपि। अणन्तान्ता
दित्यर्थो न स्यात्। एवं सति बहुकुरुचरेति समुदायस्य नदित्त्वमतो नास्मान्ङीपः प्राप्तिरिति भावः। ननु स्त्रियामित्यस्य गृह्यमाणविशेषणतापूर्वमुक्ता
एवञ्च तदन्तविधौ ज्ञापितेपि कथं बहुकुरुचरेत्यत्राधिकारव्यावर्त्यतेत्यत आह· ज्ञापिते त्विति· प्राधान्यात्। विशेष्यत्वात्। एतेन नन्वसुपाधेरुपाधिर्भव
ति विशेषणस्य वा विशेषणमिति न्यायावसरः सूचितः। एतदारम्भात्। अनुपसर्जनादिति सूत्रारम्भात्। ङीप्प्रकृतीति· प्रातिपदिकमित्यर्थः। अत एव
योक्तार्थगतस्त्रीत्वमादाय तु पुनर्न ङीप्· लक्ष्ये लक्षणस्येति न्यायात्· तस्माद् बहुकुरुचरेत्येव तद्व्यावर्त्यम्। तत्र च तदन्तविधिं
विना प्रवृत्तिरेव न· ज्ञापिते तु तदन्तविधौ प्राधान्यादेतदारम्भाच्च स्त्रियामिति ङीप्प्रकृतिविशेषणमेव· अत एव धीवानम
तिक्रान्तातिधीवरीति सिद्धम्· एवञ्चापि शालेत्याद्यस्यैव व्यावर्त्यम्। अनुपसर्जनादिति च सामर्थ्याद् गृह्यमाणविशेषणमे
वेति भावः। तदन्तविधिमिति· अणणन्तादेः प्रातिपदिकविशेषणत्वेनाणन्तान्तादित्येवं रूपमित्यर्थः। अन्यथा प्रत्ययविधौ प्र
स्त्रियामित्यस्य प्रातिपदिकविशेषणत्वादेव· एवञ्च· अनुपसर्जनादिति सूत्रे कृते च। अनुपसर्जनादि॥ ९ निषेधात्स दुर्लभः स्यात्· ॥
त्यस्यापि प्रातिपदिकविशेषणत्वमस्त्विति पिलश्नेनेन शान्तो व्याधिरिति न्यायेनाधिकारसूत्रवैयर्थ्यमेव स्यादतस्तस्य — गृह्यमाणविशेषणत्व
मेव· गुणः कृतात्मसंस्कार इति न्यायादिति भावः। प्रत्ययविधौ प्रतिषेधादिति· ॥ ॥ ॥ ॥ ॥ ॥

श·शे· भै·ननुयेनविधिरितिसूत्रव्याख्यानावसरेसमासप्रत्ययविधावितिप्रतिषेधवाक्यमुपक्रम्योगिद्वर्णग्रहणेतिनिषेधवाक्यैकवाक्यतयाऽयन्निषेधःप्र
टी·भै· त्ययांशेगृह्यमाणप्रातिपदिकविषय।प्रत्ययविधिविषयेणगृह्यमाणप्रातिपदिकेनतदन्तविधिर्नास्तीत्यनेनैकवाक्यत्वलाभात्।उगिद्वर्णेतित्वेकदेश
टी·भ· नुवादः अतएववनोरचेत्यादौप्रत्ययग्रहणेतदन्तग्रहणमित्यस्यनायन्निषेधइत्युक्तन्तेनास्यग्रन्थस्याविरोधः।टिकृतिसूत्रेविशेषरूपेणप्रातिपदिकग्रह
३५६ णाभावादितिचेन्न·अस्यग्रन्थस्यानुपसर्जनादितिसूत्रस्थभाष्यीयोपक्रमानुसारित्वात्।तथाहि।अनुपसर्जनादितिकिमर्थम्।वहुकुरुचरा।वहवःकुरु
चरायस्यामितिवहुव्रीहिः।कुरुचरशब्दउपसर्जनमितिङीन्नभवति।नैतदस्तिप्रयोजनम्।कुरुचरशब्दात्प्रत्ययोविधीयतेतत्रकःप्रसङ्गोयद्वहुकुरु
चरशब्दात्स्यान्नैवप्राप्नोतिनार्थःप्रतिषेधेन।तदन्तविधिनाप्राप्नोतीत्यन्तग्रन्थेनवहुकुरुचरेत्येतदनुपसर्जनादित्यस्यप्रयोजनमुक्तम्।अत्रटिदन्त।

प्रत्ययग्रहणपरिभाषालभ्यस्यतुनायन्निषेधः।प्रातिपदिकादित्यनेनसहानन्वयापत्तेः॥ ॥छ॥ ॥

श्चरशब्दोनतुकुरुचरशब्दइतिकुरुचरशब्दादित्यनुपपन्नमित्या शङ्कानिवारणायाहकैयटः।टिड्ढाणञित्यत्रटित्प्रातिपदिकङ्गृह्यते।तच्चकिञ्चि
त्साक्षाट्टिद्भवतियथानदट्चोरडिति।किञ्चित्त्ववयवटित्वद्वारेण।अवयवेहियत्रटित्वमकिञ्चित्करन्तत्रसमुदायार्थन्तद्विज्ञायते।सचावयवःक्व
चिद्धातुष्टिद्भवतियथास्तनन्धयीति।क्वचित्ल्युट्ल्युलादिस्थितः।क्वचित्कनलुडादिः।तत्रयंसमुदायंयोऽवयवोनव्यभिचरतितदर्थमवयवस्यटित्व
मित्यभिप्रायेणोक्तंकुरुचरशब्दादिति·अत्रयंसमुदायमित्यनेनटप्रत्ययस्यटित्वेनकुरुचरशब्दएवटिन्नतुवहुकुरुचरशब्दइतिदर्शितम्भवति।अ
तउत्तरम्पठति।प्रातिपदिकेनतदन्तविधिप्रतिषेधात्।ग्रहणवताप्रातिपदिकेनतदन्तग्रहणम्प्रतिषिध्यतेसमासप्रत्ययविधौप्रतिषेधइत्यनेनाग्र ३५६
हणवतेत्यपिवर्णग्रहणवर्जमित्येतदन्तार्थानुवादएवेतिभावः।ज्ञापकन्तुपूर्वत्रतदन्ताप्रतिषेधस्य।एवमुक्तौततः।किमेतस्यज्ञापनेप्रयोजन।

भे· पुरुषसाधारणम्प्रवृत्तिनिमित्तमुपपादयति· आत्मीयत्वपुरस्कार इति· कान्तेपीति· तेषाम्प्रातिपदिकत्वमात्रापेक्षत्वेन स्त्रीप्रत्ययादपि प्रागुत्पत्तेः

आत्मीयत्वपुरस्कारेणैव सञ्ज्ञाकरणादिति बोध्यम्· नित्यमेवेति· तत्र स्वक विकृते आतःस्थानिकत्वाभाव इति भावः। ए
वमन्यत्र स्वार्थिककान्ते नित्यमेवेत्वम्· अकचोऽत्यन्तस्वार्थिकापवादत्वाभावात्· निःस्वकेति· स्वस्या निष्क्रान्तेति विग्रहः
उपसर्जनह्रस्वः टाप् अत्तानादौ कः। अभाषित· स्त्रीविषयाच्चेति नोक्तम्· स्त्रीनपुंसकदामशब्दाडाप्यत्तानादामादामिका दामका
दामकेत्यसिद्ध्यापत्तेः। विहितस्येति व्याख्याने फलमाह· बहुव्रीहेरिति· अविद्यमाना खट्वा यस्या इति विग्रहे पाक्षिककवभा
वे गोस्त्रियोरित्युपसर्जनह्रस्वे अखट्वशब्दाट्टापि सुप्यत्तानादौके सुपल्लुकि केण इति ह्रस्वे पुनष्टाप्यभाषितपुंस्काद्विहिता-
कारस्थानिकाकाराभावेनैतद्विकल्पाप्राप्तावुत्सर्गेण नित्यमेवेत्वम् पाविशेषणत्वे तु तादृशाखट्वाशब्दाप्रत्वेन दोषः स्यादे-
ति भावः। शेषिके कपीति· न खट्वासु इत्यस्यां याङ्कपि सुपल्लुकि प्रत्ययलक्षणेन भागद्वयस्य सुबन्तत्वात्समाससञ्ज्ञायां
समासान्ता इति शास्त्रबलात्कवन्तस्यैव समासत्वेनोपसर्जनस्त्रीप्रत्ययान्तसमासस्य प्रातिपदिकाभावान्न गोस्त्रियोरिति
ह्रस्वाभावे केण इति ह्रस्वेन कपीति निषिद्धे आपोऽन्यतरस्यामिति ह्रस्वविकल्पः प्राग्वर्तिनः खट्वशब्दात्परस्यापोऽभाषितपुं-
स्काद्विहितत्वेन तत्स्थानिकाकारस्यायं विकल्पः। ह्रस्वाभावे तु अखट्वाकेति भावः॥ ए परलाघवमूलिकामाशङ्कान्निराकरोति

विषयाच्चेति· मूलोक्तम्बहुव्रीहेरित्युपलक्षणन्निःस्वकेति तत्पुरुषेपि नित्यमेवेत्वमिति बोध्यम्· ननु मूलोक्तमनुपसर्जनादिति सूत्रमेव स्त्रीप्रत्ययेषु तदन्ता-
धिज्ञापयतीति तस्युक्तमन्यत्रापि प्रयोजनसम्भवादिति तद्दूषयितुमुपक्रमते

भै॰ अपरे तु। गृह्यमाणप्रातिपदिकविषयइत्यस्ययदानुपूर्व्यवच्छिन्नस्यप्रातिपदिकसञ्ज्ञातदानुपूर्वीरूपेणयत्रोपादानन्तत्रेत्यर्थः। एवञ्चगुटि
ष्ठतिसूत्रे तादृशरूपेणोपादानाभावान्नतदन्तविधिनिषेधप्राप्तिरितिनानुपसर्जनादित्यस्यटिड्ढेतिसूत्रेफलम्। किन्तुकौरव्यमण्डूकाभ्याञ्चे॰
त्यादिसूत्रेणविधीयमानःस्त्रीप्रत्ययःप्रियकौरव्याप्रियमाण्डूकेत्यादावुपसर्जनेनभवतीतिबोध्यम्। प्रियकुरुचरेत्यादिभाष्यन्तूपलक्षणमित्या
हुः। तत्फलमिति॰ तदन्तविधिफलमित्यर्थः। अन्यथातदन्तविध्यभावाइत्यापद्येतइत्यथापद्येत। प्रत्ययग्रहणपरिभाषयाकुम्भकारशब्द
स्यानर्थकत्वेनावयवात्कारशब्दात्स्त्रीप्रत्यये॰ वयवात्कारीशब्दादुक्तिनिरूपिताङ्गत्वस्यविशिष्टे॰ भावेनककारोकारस्यवृद्धिर्नस्यात्। ङीपि अच

तत्फलन्तुकौम्भकारेयसिद्धिः। अन्यथाकुम्भकोरेयइत्याद्यापद्येतः कुम्भेनसमासेङीपिकुम्भविशिष्टस्यापसेनयोगेका
यर्थेतद्योगस्यवक्तुमशक्यत्वात् कदाचित्ततोपिढकिकुम्भशब्दोकारेवृद्ध्यभावस्याप्यापत्तेः। निष्कृष्यैकार्थीभावएव
वृत्तिनिमित्तमितितुवक्तुमशक्यम्॰ तद्धितार्थेत्युत्तरपदेसमासविधानात्समुदायेनैकार्थीभावे॰ वयवेनापितस्यैवसत्वात्
कृद्ग्रहणपरिभाषायाः कृन्मात्रग्रहणेप्रवृत्त्यानतयाविशिष्टादेवङीवुत्पत्तिप्रत्याशा॰ नचतदन्तग्रहणेपिकारशब्दस्य॰
व्यपदेशिवद्भावेनार्थवत्त्वात्ततोपिकदाचिन्ङीपिकुम्भकारेयोदुर्वारः। किञ्चसमुदायान्ङीप्यपिस्त्रीप्रत्ययेतदादिनियमा
भावेनकेवलादपिकदाचिदकिसदुर्वारइतिवाच्यम्॰॥ ११ यवान्ङीपि॰ कुम्भविशिष्टस्याकुम्भकारीशब्दार्थस्य॰ तदेतदुपपादयति॰ क
दाचिदिति॰ एतेनयदासमुदायादुत्पत्तिस्तदाकौम्भकारेयसिद्धिःसूचिता॰ निष्कृष्य॰ अर्थद्वारकशब्दान्तरसम्बन्धाभावंसम्पाद्य॰ एकार्थीभावः। ३५७
ननुकृद्ग्रहणपरिभाषयाबहुकुरुचरेत्यादौसमुदायात्प्राप्नोतीत्यतआह॰ कृद्ग्रहणपरिभाषेति॰ ननुकुम्भकारेयनिवृत्त्यर्थञ्चेत्तदन्तविधिःस्वी
क्रियतेतदाज्ञापितेपितस्यदुर्वारतयाज्ञापनमयुक्तमित्याशयेनशङ्कते॰ नचेति॰ व्यपदेशिवद्भावेनेति॰ लौकिकेनेत्यर्थः। लोकेयथाप्रधानी

मे· दिश्यते लोके तथा समुदायार्थं प्रति गुणीभूतोऽप्युत्तरपदार्थः पूर्वपदार्थनिरूपितप्राधान्यविशिष्ट इति तदर्थप्रतिपादकस्य तदन्तत्वव्यवहारो भविष्यतीत्यभिमानः
॥ परोक्तं प्रथमदूषणमभ्युपेत्य समाधत्ते। एतदधीति· असहाय एवेति· लौकिको व्यपदेशिवद्भावोऽसहाय एवेष्यते न तु सहायो बहुषु पुत्रेषु सत्सु
नैकस्मिन्नयमेव ज्येष्ठो मध्यमः कनीयानिति व्यवहारः किन्त्वेकस्यैव सत्त्वे तस्मिन्नयमेव ज्येष्ठो मध्यमः कनीयानिति व्यवहारः। अस्मिन्नेवार्थेऽधि
कारोऽपि ज्ञापक इति भावः। भाष्येऽपि व्यपदेशिवदेकस्मिन्कार्यम्भवतीति वक्तव्यमित्युक्तम्· सिद्धान्तानुसारेणाह· अर्थवत्सूत्रेति· इदमेतत्संज्ञाफ
लभूतेत्यस्य यथाश्रुतार्थानुसारेण। एतत्संज्ञाफलभूतटिभक्तिभिन्नस्योपपदस्यापेक्षासत्त्वेऽपि न पूर्वोक्तरीत्यानुपपत्तिरित्यत आह· तदादिनियम
माभावेनेति· न तु न्यूनेति· अयम्भावः। यथा प्रत्ययग्रहणपरिभाषयाऽधिकस्य प्रत्ययान्तत्वं व्यावर्त्यते न तु न्यूनस्य। अत एव इरियानित्यादौ

एतदधिकारादेव ज्ञापकादसहाय एव व्यपदेशिवद्भावप्रवृत्तेः। अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वा
च्च· तदादिनियमाभावेनाधिकस्य कार्यं बोध्यते न तून्यूनस्येत्यदोषश्च· अन्यथा तदन्तग्रहणे फलाभावेन तद्वैयर्थ्यं स्पष्टमे
व· एतदेवाभिप्रेत्यात्र भाष्य उक्तम् समासे च कृतेऽवयवादुत्पत्तावप्यवयवस्य वृद्धिः स्यादिति· येन विधिरिति सूत्रे च तदा
दितदन्तविधेः प्रयोजनं गार्ग्यायणः परमगार्ग्यायण इत्युक्तम्भाष्ये॥ ९ तद्धितान्तत्वनिबन्धनप्रातिपदिकत्वसिद्धिस्तथा प्रत्ययग्र

हणपरिभाषया वाऽऽद्भूतस्त्रीप्रत्यये चानुपसर्जनेनेति परिभाषणापि प्रत्ययग्रहणपरिभाषाव्यावर्त्यस्याधिकस्य स्त्रीप्रत्ययान्तत्वं बोध्यते न तु न्यू
नस्य स्त्रीप्रत्ययान्तत्वं बोध्यत इत्यर्थः। किञ्च न तु न्यूनस्येति यदुक्तं तत्रैतदधिकारस्यापि ज्ञापकत्वं बोध्यम्। अन्यथा· उक्तप्रकारत्रयानङ्गी
कारे। अवयवस्य कुम्भकारेत्यत्र कारेत्यस्य। यत्तु तदुक्तं निष्कृष्यैकार्थीभावबृत्तिनिमित्तमित्ययुक्तमिति तमेवार्थं दृढीकर्त्तुमाह· येन विधिरिति

मे॰ उक्तन्यायादिति॰ प्रत्ययग्रहणेयस्मादितिन्यायादित्यर्थः। अत्रत्यर्थः। अत्रत्यभाष्येऽनुपसर्जनाधिकारस्यतदन्तविधिज्ञापकतोक्ता सर्वादिसूत्रभाष्येतुप्रत्याख्यायतइत्युक्तमितिविरोधशङ्कानिवारणायाह॰ यत्तुसर्वादीति॰ वार्तिककृतेति॰ इत्थंहिवार्तिकग्रन्थः। अनुपसर्जनग्रहणमनर्थकम्। प्रातिपदिकेनतदन्तविधिप्रतिषेधात्। आपिशलमधीतेआपिशलाब्राह्मणीत्येतदर्थमपिन॰ स्त्रियांयोऽणविहितमित्येवंरीत्यागृह्यमाणविशेषणंस्त्रीत्वम्। पूर्वत्रतदन्तस्यग्रहणंयथास्यादित्यर्थमपिन॰ अमहत्पूर्वग्रहणेनतत्रतस्यज्ञापनादिति॰ कुम्भकारीत्यादौतुकारशब्दादेवाऽणीपाठकृतुस्त्रीप्र

तत्रैकदेशान्वत्ययाभावेपरमश्चासौगार्ग्यायणइतितदर्थोवाच्यस्तथासतिनैवपरमगार्ग्यात्प्रसक्तिरितितत्प्रयोजनत्वोक्तिरसङ्गतास्यात्॰ ममतुपरमगार्ग्यस्यापत्यमित्यर्थेप्युक्तन्यायाद्गार्ग्यशब्दादेवप्रत्ययोनतुपरमगार्ग्यात्तथासतिपारमगार्ग्यायणइतिस्यादितितत्प्रयोजनत्वोक्तिसङ्गतिः। कैयटोपितदादिनियमावश्यकत्वप्रदर्शनायपरमगार्ग्यायणइत्युपन्यासइत्युक्तवान्॰ यत्तुसर्वादिसूत्रेभाष्येऽनुपसर्जनादित्ययोगःप्रत्याख्यायतइत्युक्तन्तत्रवार्तिककृतातस्यप्रत्याख्यानात्तदभिप्रायकमितिभाष्यप्रदीपोद्योतेविस्तरः। टिड्ढा॰ ठेप्येवसिद्धे ठक्ठञोरुपादानं ठ ञिठञो व्यावृत्त्यर्थम्॰॥ ९. नयेनतदादिनियमाभावात्समुदायादेवानावपवादनभिधानादितितदाशयः। वस्तुतस्तुसर्वादिसूत्रस्यप्रत्याख्यायतइत्युक्तिरत्रत्यवार्तिकग्रन्थममभिप्रेत्य॰ अतएवभाष्यकृताअतउत्तरम्पठतीत्यनेनतस्यवार्तिककृत्सिद्धान्तत्वंसूचितम्। उक्तवाक्यन्त्वाचार्यदेशीयस्य। पूर्वत्रतदन्तप्रतिषेधेप्युत्तरत्रचारितार्थ्यानुपपादनान्नासञ्ज्ञोपसर्जनप्रतिषेधइत्यस्यप्रत्याख्यानायहितत्रेदंसूत्रमन्यथाव्याख्यातम्। सञ्ज्ञोपसर्जनव्यावृत्तिरन्यथातत्रसाधितेतितदर्थमपिनेतिप्रकृतसूत्रस्याद्यवार्तिकतात्पर्यम्। इदन्तर्हिप्रयोजनमित्यारभ्यसिद्धान्त्युक्तिर्वार्तिकप्रत्याख्यानाभिप्रायेणेतिविभावनीयम् ॥

मे॰ मितिप्रश्नेबहुधीवरीबहुपावरीअतिधीवरीअतिपीवरीतिप्रयोजनमुक्तम्। अत्रकैयटः। वनोरचेस्तत्रवन्नन्तस्यप्रातिपदिकस्यग्रहणात्तदन्तवि
धिर्नस्यादितिभावः। ननुप्रातिपदिकस्यविशेषणरूपेणप्रकृतसूत्रेग्रहणाभावाद्ग्रहणवत्त्वेनेनतदन्तविधिप्रतिषेधकथनमयुक्तमेवेतिचेन्न॰ ग्रह
णवतेत्यस्यप्रातिपदिकत्वव्याप्यधर्मविशिष्टंयत्रोपादीयतेतदन्तस्यग्रहणन्नेत्यर्थस्यविवक्षितत्वात्। अस्तिचटित्पदम्प्रातिपदिकत्वव्याप्यध
र्मविशिष्टबोधकमितिस्यादत्रनिषेधइत्याशयात् तथाहि॰ टिदितिनप्रत्ययग्रहणपरिभाषयातदन्तपरमाटित्वस्यनदटदेवटचोरडितिसमुदायेद
र्शनेनतस्यप्रत्ययाप्रत्ययसाधारणतयाप्रत्ययमात्रग्रहणाभावात्। नचटितोः कारस्तदन्तादित्यर्थोऽस्त्वितिवाच्यम्॰ नदीदेवीचोरीस्तनन्धयीतिरूपा
णामसिद्ध्यापत्तेः। एतेषुहिसमुदायस्यटित्वन्नतुअकारस्येति। नचाधिकारप्राप्तप्रातिपदिकादित्यस्यटित्पदंविशेषणमितियेनविधिरित्यनेनतद
न्तग्रहणमस्तुनदीदेवीत्यादौ व्यपदेशिवद्भावेनसिद्धम्मुख्यव्यवहारस्यचिरन्तनीत्यत्रसत्वादितिवाच्यम्॰ स्तनन्धयीत्यस्यासिद्ध्यापत्तेः। अ
त्रहिधातोष्टित्वन्नचैतत्तदन्तमतोऽत्रटित्पदम्पारिभाषिकम्। इदङ्कारविषयताप्रयोज्यापाप्रातिपदिकत्वसमानाधिकरणटिद्व्यवहारत्वंप
नातदाश्रयत्वञ्चप्रवृत्तिनिमित्तम्। प्रयोज्यप्रयोजकभावस्स्वरूपसम्बन्धरूपः साक्षात्परम्परासाधारणः साक्षादिदङ्कारविषयताप्रयोज्यो
टिद्व्यवहारेनदीत्यादौ। स्तनन्धयीचिरन्तनीत्यादिसमुदायेपरम्परया। तदेतद्ध्वन्यादितङ्क्षि॰ पदग्रन्थसम्वादेटिड्ढाणञित्यत्रेत्यादिना। एवञ्चेदङ्कारवि
षयताप्रयोज्यप्रातिपदिकत्वसामानाधिकरण्यविशिष्टविषयताश्रयत्वम्प्रातिपदिकव्याप्योधर्मस्तद्विशिष्टबोधकस्यटित्पदस्यसूत्रेउपा
दानाद्वक्ष्यमाणप्रातिपदिकविषयतासत्वात्तदन्तविधिनिषेधाद्बहुकुरुचरेत्यत्रनप्राप्नोतीत्यनुपसर्जनाधिकारज्ञापकतासङ्गच्छते। कु
रुचरीत्यत्रतुटित्वाद्वङीप्। तदुक्तम्भाष्ये॰ कुरुचरशब्दात्प्रात्ययोविधीयतेतत्रकः प्रसङ्गोयद्बहुकुरुचरशब्दात्स्यादिति॰ पूर्वोक्तभाष्येयदुक्तम्

श॰शे॰ भै॰ हलःश्न इतिसूत्रभाष्येशानजादेशस्यशकारोङित्वार्थः।तेनकुषाणपुषाणेतिसिद्धम्।एतच्चस्थानिवद्भावेनसिद्धमित्युक्त्वासार्वधातुकादेशेऽनु
टी॰भै॰ वन्धानांस्थानिवत्त्वेतज्ज्ञापकमित्युक्तम् तत्प्रयोजनंहेरपित्वन्नप्रतिषेध्यम्।तथानातङित्ङकारोनोच्चार्यइतिच। यद्येतज्ज्ञाप्यतेऽचिनवमसु
३५९ नवमकरवमित्यत्रादेशस्यस्थानिवद्भावेनपित्वन्नस्यात् तथासतिङित्वाद्गुणोनस्यादितिदूषणमभिधाय तस्मान्नार्थोऽनेनज्ञापकेनायानि
प्रयोजनानिक्रियन्तेन्यासएव।एवमपिभवेत्पित्करणसामर्थ्यात्पिन्त्कृतंस्यात्।ङित्करणसामर्थ्यान्ङिन्त्कृतमपिप्राप्नोतीतिशङ्कितमाए

परेतुयासुटोङित्वन्नज्ञापकम्पिदर्थोङित्वमितिभाष्यात्· सार्वधातुकमितिसूत्रेऽपिदित्यावर्त्यप्रसज्यप्रतिषेध
सिद्धेनङिच्चपिन्नपिच्चङिन्नेत्यनेनहलःश्न इतिसूत्रभाष्योक्तेनपित्सुङित्वाप्रसक्तेः।शानचःशित्वमपितत्सूत्रएव
भाष्येप्रत्याख्यातम्· हेरपित्वस्यनातङोङित्वस्यवैयर्थ्यापत्तिश्चज्ञापकत्वेदूषणमप्युक्तम्भाष्ये· तस्माद्दूष्यमाणे। हृदि
न्यादेशस्याभिधानेऽजादित्वाद्गुणः यत्तुक्ङितिचेतिसूत्रभाष्येयासुटोङिद्वचनस्यनङिदादेशानोङित्वमित्यर्थज्ञापकता

वमपिब्रूतादित्यत्रस्थानिवद्भावेनपित्वादनुदात्तत्वमाब्रुवईडितीडागमश्चायन्तुखलुपितिङित्कृतन्नप्राप्नोतिङितिचपित्कृतन्द्भू·नतन्न
स्यात्।तस्माद्वक्तव्यम्पिन्नङिद्भवतिङिच्चपिन्नभवतीति।नवक्तव्यम्।एवम्वस्यामिसार्वधातुकङिद्भवतिपिन्न।एवन्तावत्पितोङित्वम्प्रति
सिद्धम्।ततोङिच्चपिन्नभवतीति।एवंङितःपित्वम्प्रतिषिद्धम्।तेनततातङःस्थानिवद्भावप्राप्तम्पित्वम्प्रतिषिद्धमितिरीत्योक्तन्नदनुसारे
णाह·परेत्विति·वक्ष्यमाणेत्यादौगुणनिमाह· तस्मादिति· ननुयासुटोङित्वस्यङिदादेशानाङित्वाभवज्ञापकतोक्तासानसङ्गच्छतेतिष्वि
प्मिसुचारितार्थ्यादतआह·यत्त्विति·॥

भे॰ ननु शानचः शित्वस्य प्रत्याख्यानमयुक्तम् गाङ्लिटीति सूत्रे गाङो ङित्त्वं सानुबन्धकादेशोऽनुबन्धानां स्थानिवत्त्वे ज्ञापकमिति गाङ्लिटीति सू-
त्रभाष्यविरोधादत आह॰ यद्यपीति॰ ननु निरनुबन्धकस्य शिलायाढः सभायायः। ढश्छन्दसीत्यस्य पुरस्कृतिकत्वात्सानुबन्धकङ्क॰ मिस्तु
दास्तमत आह॰ निरनुबन्धकस्येति॰ पूर्वोक्तयोः स्वभावतो नपुंसकत्वपुंस्त्वयोः सत्वादिति भावः। स्पष्टञ्चेदमिति॰ ननु चायमस्ति। शिलाया

तत्तु वार्तिकमतम्। ङित्त्वपिन्नेत्यादेस्तेनानुक्तेः। यद्यपि गाङ्लिटीति सूत्रे गाङो ङित्त्वं सानुबन्धकादेशोऽनुबन्धानां स्था-
निवत्त्वस्य ज्ञापकमुक्तं वार्त्तिककृता तदपि प्रयोजनाभावादित्यादिना भाष्ये दूषितमित्याहुः। निरनुबन्धकस्य स्त्रियां
वृत्तेरसम्भवात्सानुबन्धकस्य ढको ग्रहणमित्याह॰ सौपर्णेयीति॰ सुपर्णी शब्दो दयन्येस्त्रीभ्यो ढगिति ढक् स्पष्टञ्चेद
म्भाष्ये॰ ऐन्द्रीति॰ सास्य देवतेत्यण्॰ ऊरुदघ्नीत्यादि॰ प्रमाणे द्वयसज्दघ्नञ्मात्रचः। सङ्ख्याया अवयवे तयप्। मात्रजि
तिमात्रशब्दादारभ्याऽयच्श्चकारेण प्रत्याहारः उभयीति सिद्धिः। तत्र त्वयच् प्रत्ययान्तरम्॰ अतएवोभयशब्दस्य
जसि सर्वनामत्वविकल्पो नेतिन वेतीत्यत्र भाष्ये स्पष्टम्॰ आक्षिकीति॰ तेन दीव्यतीति ठक् तदस्य पण्यमित्यधिकारे
लवणाट्ठञ् यादृश्यां त्यदादिषु दृश इति कञ्॰ इत्वरीति॰ इण्नशजीति क्वरप्॰ अनुबन्धद्वयोपादानं स्पष्टार्थम्॥

ढ इति नैष स्त्रियां वर्त्तते। अत्र कैयटः। शिलेव शिलेयमिति नपुंसकलिङ्ग एव शिलेयशब्दः स्वभावात्। अयन्तर्हि सभायायः ढश्छन्दसीति
एषोऽपि न स्त्रियां वर्त्तते। कथं स्त्री नाम सभायां साध्वी स्यात्। यत्तु सभायां विदुषामेव पुरुषाणां साधुत्वाधिकारात्। ननु सभायां साधुरियं
ब्राह्मणपङ्क्तिः परिषदेति सम्भवति स्त्रियाः साधुत्वम्। एतेन छन्दसि सभेयशब्दस्यैवंविधायां स्त्रियाम्प्रयोगाभाव इति विज्ञायते॰॥ ॥

श॰शे॰ टी॰भै॰ ३६

मै॰ एतेनस्वभावतः पुंस्त्वन्निदर्शितम्। अतएवेति॰ अग्रचः प्रत्ययान्तत्वादेव। अनुबन्धद्वयोपादानमिति॰ अस्य प्रकृतसूत्र इति शेषः॥ ॥ क्रजव्यावृत्तेरिति॰ अतएव तमीश्वरा साधुचचारससादरेति सिद्धमस्येशमासेतिवरचा ईश्वरीतितु पुंयोगे सिद्धम्। ईश धातोर्वनिपि क्वि रचेति वा इत्यर्थ इति॰ यद्यप्यत्रच्छत्रादिभ्यो ण इति णस्तथापि नाच्छीलिके णे पीति परिभाषया ङीप्। वयस्य चरम इति॰ प्रथमवयोवा चित्वाभावाद्द्वयसि प्रथम इति यथा श्रुतसूत्रेणतु न सिद्धिः। पुनरत्र ग्रहणम्। वार्तिके ग्रहणमित्यर्थः। तयोः। अवन्त ङीषन्तयोः। यत्तुत

वरज्या वृत्तेरन्यतरेणापि सिद्धेः। चौरीति॰ चुराशीलमस्या इत्यर्थः। नञ्स्नञ्॰ तरुणतलुनयोर्वयस्य चरमे इति ङीपि सिद्धेपि गौरादिपाठात्परत्वात्प्रातिपदिकेन ङीषा वाधाभावाय पुनरत्र ग्रहणं तयोश्च स्वरे विशेषः। एतौ हित्रोर श्वलोवेसुनननत्वाराद्युदात्तौ॰ स्त्रीपुंसाभ्यान्नञ्स्नञौ॰ प्रहरणमित्यधिकारे शक्तियष्ट्योरीकक्॰ आढ्यसुभगेति स्युन्॰ यञश्च॰ प्राचां ष्फ इत्यत्र यञ एवानुवृत्तये योगविभागः। हलस्त॰ हल इति पञ्चमी॰ यस्येति सूत्रादितीत्यनुवर्त्तते॰ सूर्यतिष्येत्यनोय उपधाया इति च॰ यलोपेऽस्योपस्याभीयासिद्धत्वाद्यस्येकारपरत्वाभावाद्वचनसार्थक्यायोपधाग्रहणानुवृत्तिः॥

११ रुणतलुनयोर्वार्तिके ग्रहणङ्गौरादिपाठोप्यनयोर्मास्तु किन्तु बाह्वादौ पाठोऽनयोः कार्यस्तेन बह्वादिभ्यश्चेति पक्षे ङीष्। तदभावे वयस्य चरम इति ङीप् भविष्यतीति स्वरस्यापि सिद्धिरिति। नञ्॰ नञ्स्नञीति प्रतीकमुपादाय तरुणतलुनशब्दयोरव्ययवयोः पर्युद्ग्रहणम्। तरुणी सुरेति॰ प्राणिधर्मो हि वय इति कैयटेन समाधानस्य सूचनात्। वार्तिकेऽवयसिद्धावन्तप्रयोगनिवृत्त्यर्थमनयोरुपादानमावश्यकम्। नचैतावता नान्तोदात्तस्य सिद्धिस्तदर्थं गौरादिषु बह्वादिषु वा पाठ इत्यत्र फलतो नवि ३६

मे·यथाश्रुतार्थेपञ्चाश्वेत्यस्यवारणासम्भवादाह·प्रत्यासत्त्येति·प्रत्ययलक्षणेनठगन्तत्वेपिवर्णाश्रयेप्रत्ययलक्षणाभावान्नतदवयवादन्तत्व
मानन्तुस्थानिवद्भावेनशास्त्रीयस्यैवातिदेशोभविष्यत्यतआह·नत्वपीतिलिङ्गादित्यादि·ननुवैयर्थ्येसतिज्ञापकत्वन्नदेवतुनेत्याशयेनशङ्क
ते·नचेति·वृद्धिरिति·उतोवृद्धिरितिसूत्रविहितेत्यर्थः।विनिगमनाविरहादिति·नत्वपीत्यस्यचारितार्थ्यंवाच्यन्तदुक्तार्थज्ञापकतयावानि

अर्हन्तमिति·प्रत्यासत्त्यादिरादवयवाकारान्तमित्यर्थः।तेनपञ्चाश्वेत्यादौठग्निमित्तोपिनङीप्·कुरुचरीति·कुरुषुचरतीत्य।
धिकरणेउपपदेचरेष्टः।टितःप्रत्ययस्यापिसत्वात्प्रत्ययग्रहणपरिभाषायाअप्रवृत्त्याऽचटिदन्तत्वंकुरुचरशब्दस्येतिबोध्य
म्·वक्ष्यमाणेति·वचेर्लृटःशानच्·टित्वादिति·स्थानिवत्त्वेनेत्यादिः।नत्वपीतिलिङ्गाद्दित्वादेरशास्त्रीयस्याप्यतिदेशोऽनु
बन्धकार्येऽनल्विधावितिनिषेधाप्रवृत्तेश्चेतिभाव·ङित्वेनेति·लिङादेशानांस्थानिवत्त्वेनैवसिद्धौतद्वैयर्थ्यंस्पष्टमेव·त
द्धिअवयवेचरितार्थतयासमुदायोपकारकम्·नचेदंङित्वंसूयादित्यादावनिग्लक्षणवृद्धिनिषेधार्थमितिवाच्यम्·वि
निगमनाविरहात्·उतऔदितिवक्तव्येवृद्धिग्रहणेनस्थानिनिर्देशेपीक्परिभाषोपस्थित्यातस्याअपीग्लक्षणत्वाच्च·
नन्वेवंब्रूतादित्यत्रब्रुवईट्प्राप्नोतिलाश्रयानुबन्धकार्यस्यतदादेशेष्वभावेपितिपःपित्वस्यतदादेशेनातङ्यभावक।
ल्पनेमानाभावादतआह·अतइति·क्वचिदिति·लक्ष्यानुरोधेनचाव्यवस्थाः॥ ((ग्लक्षणवृद्धिनिषेधार्थत्वेनवासम्भवति एकत्रैव
तुसाधकन्नास्तीतिभावः। शङ्कोक्तंनत्वपीतिसूत्रप्रयोजनमन्यथासिद्धमपीत्याह·उतऔदितिवक्तव्यइति·।नन्वेवमालाश्रयानुबन्धकार्ये
स्यैवाभावकल्पने।अव्यवस्थांवारयति·लक्ष्यानुरोधेनेति·॥

भि॰ अत्रेदमवधेयम्॰ प्रकृतसूत्रे तद्धितग्रहणस्य फलं प्रातिपदिकसंज्ञाद्वारा ङीष्सिद्धिः। षित्वादेव सिद्धेः। नापि यस्येति चेति लोपः। सवर्णदी
र्घेण सिद्धेः। किन्त्वन्यतोऽप्ययमिति ज्ञापनद्वारा यस्येति चेति लोपार्थं तेनासुरिशब्दादपीति। वस्तुतस्त्वेतदपि न ष्फ ङितिन्यासेन सिद्धेः। यत्तु गो
कक्ष्यशब्दाद्गर्गादित्वाद्यञि ततः क्रौड्यादित्वेन ष्यङि चापि प्रकृतसूत्रेण ष्फप्रसक्ते चिकीर्षते भस्याढे इति पुंवद्भावे गोकक्ष्यशब्दाद्यञ
न्तात् ष्फे गोकक्ष्यायणी सिध्यति। तद्धितसंज्ञाभावे तु पुंवद्भावाप्रात्यायञन्तत्वाभावेन ष्फो न स्यादिति तदपि न॰ क्रौड्यादिषु गोकक्ष्या
शब्दस्य पाठाभावेऽपि ष्यङ्सम्भवात्। चापत्तुं प्राग्यञ्श्चाप्रवृत्ते व्यङ्न्येव सिद्धे उदीचामते प्राचामते तु चापो बाधकस्यापि विषये सर्वत्र

अत्र हि वतण्ड्याच्चेति यञो लुक् स्त्रियामिति लुक् वर्णाश्रयत्वाच्च न प्रत्ययलक्षणम्। षः प्र॰। आदिर्ञिटुडव इति
सूत्रादादिरित्यनुवर्तते॰ प्रत्ययस्येति किम्॰ षोडश षण्ढः षडुत्वमित्यत्र षष्शब्दस्य निपातनादुपदेशस्यायं ष
कारः। वस्तुत उपदेश इत्यस्य स्वरितत्वमेव नेति पूर्वं निरूपितम्॰ आदिरिति तु तत्रत्यावश्यकम्॰॥ ॥

ग्रहणापकर्षात् ष्फः। तेन गोकक्ष्यायणीत्यस्य सिद्धिरिति। ननूपदेशग्रहणानुवृत्त्या षोडशशब्देनातिप्रसङ्ग इत्यत आह॰ षषुत्वमि
त्यत्रेति॰ इदम्प्राचामनुरोधेन। स्वसिद्धान्तरीत्याह॰ वस्तुत इति॰ ननु प्रत्ययान्यस्य षकारस्येत्संज्ञा हलन्त्यमिति सूत्रेणेष्टैवेति किमत्रा
दिग्रहणानुवृत्त्या। न चेष्टेनोः पयवस्य मध्यस्थस्यापि स्यादिति वाच्यम् तस्य न स्वाभाविकत्वम्। तस्य सकारमध्यगत्वमेव कल्प्यते। तस्य सकारस्या ३६१
देशप्रत्यययोरिति सूत्रेण षकार इति स्वीक्रियते। षलस्य च षः प्रत्ययस्येति सूत्रदृष्ट्याऽसिद्धत्वान्नेत्त्वप्राप्तिरित्याशयेनाह॰ आदिरितीति॰॥ ॥

मे· उपरञ्जकत्वेति· यद्यपि मध्यान्तस्य षकारयोरुक्तरीत्यानेन सूत्रेणान्तस्थास्त्रिपरिशेषादाद्येरेव भविष्यति। तथापि परिशेषान्नादृशार्थकल्प
नापेक्षया आदिग्रहणसम्बन्धस्य स्वरूपानुवादकस्य स्वीकारेणैवेष्टसिद्धिरित्याशयः। अविषीमहिषीत्यादौ तु टित्वादेव सिद्धम्। टिषच्प्रत्ययस्य
चित्त्वेनाविषमहिषशब्दयोरन्तोदात्तयोरुदात्तनिवृत्तिस्वरेणान्तोदात्तत्वमपि भविष्यति। ननु प्रत्ययग्रहणे कृतेऽपि स्वजादावतिप्रसङ्गं वारयति।

उपरञ्जकतयात्रापि सम्बन्धितम्· आयने· आयनो नस्य नेत्वम् फिनो नित्करणात् तत्साहचर्यादीनोऽपि नस्य नेत्वम्। आ
दिग्रहणं किम्· उरुद्घ्नम्· प्रत्यये किम्· फक्कति खनति· खच् घञादौ घित्यतोः खिसनव्ययस्य स्यात्। शिलिङ्गादित्सञ्ज्ञैव नादेशाः
उणादीनां बहुलवचनान्नादेशाः। घच् चित्त्वसामर्थ्यादिते प्रत्ययसम्बन्ध्यादेशात् उपदेशसन्नियोगशिष्टकार्यादपि पूर्वमे
व· तेनान्तोदात्तत्वाय चित्त्वं सफलम्। अन्यथा घुदात्तत्वेनैव सिद्धौ तद्वैयर्थ्यं स्पष्टमेव· ननु स्त्रियामेव ष्फ विधानात् उक्तार्था
नामप्रयोग इति ङीषन्तस्यादन्तआह· षित्त्वसामर्थ्यादिति· ष्फेणोक्तेऽपीति द्योतितेऽपीत्यर्थः। द्विर्बद्धं सुबद्धं भवतीति न्यायेन
क्वचित्समुच्चयस्य दृष्टत्वात्· षित्त्वमपि तदाश्रयणे ज्ञापकम्· सर्वत्र· सर्वेषां मते इत्यर्थस्तदाह· नित्यमिति· प्राचामि
त्यस्य निवृत्त्या नित्यत्वे सिद्धेऽपि प्राचां ष्फ इत्यस्य सर्वत्र ग्रहणापकर्षणबाधकविषयेऽपि प्रवृत्त्यर्थं न तु० ॥ ॥

त्वचा घञादाविति· द्योतितेऽपीत्यर्थ इति· एतत्पक्षस्यैव सिद्धान्तित्वात्। घच् चित्त्वसामर्थ्यादिति· अग्रात्यत्। घ छौ चेति सूत्रविहितो घच्
वा चिदिति· द्वौ ग्रासलौ व्यतिलुनीत इत्यादौ। तदाश्रयणे· द्योतकसमुच्चयाश्रयणे। प्रकृतसूत्रे नित्यत्वार्थकं सर्वत्रग्रहणं न कार्यमित्याह· प्रा

मे· सर्वत्रग्रहणापकर्षेसतिपञ्चफलितन्तदाह· तद्बाधकत्वमेवेति· ङीपूर्वाधकत्वमेवा इदम्परिशेषसिद्धार्थकथनम्। एतेन चापउभयवाधकत्वंस्या
दनन्तस्येतिन्यायाश्रयणेतुष्फस्यैववाधकत्वंस्यादितिशङ्कानवकाशः। ननु चापिकृतेप्येकादेशस्यपूर्वान्तत्वेनष्फप्राप्त्यासर्वत्रग्रहणमव्य
र्थमेवेत्यतआह· चापिकृतेत्विति· एतत्सूत्रेसर्वत्रशब्दोपादानन्तुवैचित्र्यायाष्फाणाविति· तथाचशाकल्यायनी। शाकल्यस्यच्छात्राः।

तेनावट्यायनीत्यत्रावट्याच्चेतिचापंवाधित्वाप्राचाम्मतेष्फएव· अवटोगर्गादिः। चाप्तुउदीचाम्मतेप्राप्तङीपूर्वा
धनेन चरितार्थः। सर्वत्रग्रहणन्तद्बाधकत्वमेवचापोनत्वनन्तरष्फवाधकत्वम्· चापिकृतेतुनष्फप्राप्तिरितइत्यधि
कारात्· लोहितादिर्गर्गाद्यन्तर्गणः। यद्यपितत्रकतशकलकएवेतिपाठात् शकलस्यलोहितादिकण्वादिवहिर्भूतत्वा
ष्फाणौनततःप्राप्तुतस्तथापिकतन्तेभ्यःकण्वादिभ्यइत्युभयत्रापिषष्ठीतत्पुरुषवहुव्रीह्योरेकशेषेणनदोषःकेत
न्तशब्देशकन्ध्वादित्वात्पररूपम्· तेनशाकल्यायनी शाकल्यस्यच्छात्राःशाकलाइतिचसिद्धम्· टापङीपोरिति·
कौरव्यशब्देयोपधप्रतिषेधाट्टाप्· माण्डूकशब्देजातित्वान्ङीषितिभावः। टापङीयोरपवादइतिपाठस्तुप्रामादिकः

शाकलाइत्येवन्नस्यात्। षष्ठीतत्पुरुषइति· कतस्यान्तःकतन्तः। कण्वस्यादिःकण्वादिरिति· अन्तशब्दःपरसमीपस्यादिशब्दश्च
पूर्वसमीपस्यवाचकः। वहुव्रीहिश्चतद्गुणसंविज्ञानः। एकशेषेणास्वरभिन्नानामितिवचनेनवहुव्रीहेःशेष ३६२
णाजातित्वादिति· एतेनकौरव्यसाहचर्यान्माण्डूकशब्दोऽपत्यप्रत्ययान्तएवैतत्सूत्रेगृह्यते। तेनमण्डूकस्यपत्न्यार्यसर्थेतस्येदमित्यणन्त
स्यमाण्डूकशब्दस्यसत्वेपिनग्रहणन्तेनयद्यसौकूपमाण्डूकितवैतावतिकःस्मयइतिसिद्धमितिध्वनितम्·॥ ॥ ॥

भे॰ ननु यञापि टिड्ढेति सूत्र एवोपादानं कृतो न कृतमत आह॰ प्राचाष्फ इत्यत्रेति॰॥ ❀ ॥ नन्वनपत्याधिकाराप्रसिद्ध्यानपत्याधिकारस्थादि
त्यनुपपन्नमत आह॰ अपत्याधिकारस्थभिन्नादि॰ व्याख्यानादिति॰ अपत्यग्रहणं कर्तव्यमिति वार्तिकमूलाद्व्याख्यानादित्यर्थः। नन्वपत्यग्र
हणमिति वार्तिकस्यापत्ये भव इत्येवार्थः कर्तव्यः स चार्थो द्वैप्येपि सम्भवति। याद्वीपे भवा सा कस्यचिदपत्यम्भवत्येवेति चेन्न॰ एतद्वार्तिकप्रत्याख्या
नैकवाक्यतया प्रतिपदोक्तपरिभाषया ऽपत्यशब्दस्यापत्याधिकारपरतया ऽपत्यशब्दस्य तदधिकारभवपरत्वात्। तथा हि॰ तत्रार्हि वक्तव्यमानव
क्तव्यम्। नैवं विज्ञायते कस्य ञ्। कारपः यञश्चेति। कथन्तर्हि कस्य कारपोऽ यञश्चेति। अयमयञ्प्रत्ययो गर्गादिभ्यो विधीयते तत्राकारोऽनुनासिक इ

**अनपत्याधिकारस्थादिति॰ अपत्याधिकारस्थभिन्नादित्यर्थः। यञ्शब्देन व्याख्यानादपत्याधिकारस्थस्यैव ग्रहणमिति भावः। प्राचां ष्फः। यञ इति वर्तते अत इति च। यञो योऽकार इति वार्थः। तेन वतण्डी त्यत्रो दीचाम्मतेसावकाशं शार्ङ्गरवादिङीनं बाधित्वा आवट्यायनीत्यादावपि सर्वत्र ग्रहणात्प्राचाम्मते प्राप्तोपि ष्फो न॰**

त्सञ्ज्ञाकरहविशेषणार्थ इति यञो ग्रहणाभावाद्द्वैप्येनातिप्रसङ्गः। यस्कादिभ्यो गोत्रे यञञो श्चेत्यत्राप्यकारप्रश्लेषः। न च विच्छिद्य पाठे
ऽनुकरणे प्रकृते तत्र घटकेऽकारश्रवणापत्तिरिति वाच्यम्॰ आर्षः संहितापाठ एव। व्याख्यानात्कल्पितः पृथक्पाठः। अनुकरणादुपस्थि
तत्विसञ्ज्ञयाऽकारनिवृत्तिः। एतेन॰ यञो योऽकार इति व्याख्यानेन। उदीचाम्मतेसावकाशमिति॰ एतेन शार्ङ्गरवादौ वतण्डपाठवैयर्थ्यशङ्का परिहृता।
ननु यञो योऽकार इत्येवं व्याख्यानाभावेपि वतण्डीत्यत्र ष्फप्रसयस्य ङीनापरत्वाद्बाध एवस्यात्। ङीनश्चारितार्थ्यस्याधुनैव दर्शितत्वादत आह॰
सर्वत्र ग्रहणादिति॰ सर्वत्रग्रहणापकर्षणादित्यर्थः। एतदपकर्षे बीजन्तु तत्सूत्रव्याख्यानावसरे स्फुटी भविष्यति॥ ॥ ॥

श·शे· मे·उन्मानभिन्नस्यतुपारिभाषिकपरिमाणभिन्नत्वान्निषेधोभवत्येतदाह·द्वेवर्षेभूतेत्यादि·नत्वेवङ्काण्डस्याप्यपरिमाणत्वादनेनैवनिषेधसिद्धेःका
बी·भै· ण्डान्तादितिनिषेधसूत्रमनर्थकमतआह·काण्डान्तादितित्विति·अत्रभाष्येद्वौप्रतिषेधावुच्येते तत्रैकःशक्योऽवक्तुम्।परिमाणान्तद्धितलुकि।इ
३६३ दन्नियमार्थम्भविष्यतिपरिमाणान्तादेवतद्धितलुकिनचसमाहारेऽप्याहत्यार्थम्परिमाणान्तान्नतद्धितलुक्येवेतिनियमःकुतोनेतिवाच्यम्।ल
क्षणस्यलक्ष्यानुसारित्वात्।तेनसमाहारेद्व्याढकीतिभवतीतिकैयटः।ततोबिस्ताचितकम्बल्येभ्योनेति।तद्धितलुकीतिवर्त्तते।पूर्वनियमेनसिद्धे
इदमपिनियमार्थम्।उन्मानवाचकाच्चेन्नतर्ह्येतेभ्यएवेति।एवम्प्रकारेणैकस्यनञोऽनुपादानेनयद्यपिसिध्यतितथापियोगविभागनियमयो
र्विपरीतनियमशङ्कायाश्चवारणस्यक्लेशेनकल्पनयावारणेप्रयाससाधिक्यमितिमूलेतथानोक्तम्।केचित्त्वपरिमाणबिस्ताचितकम्बल्येभ्यो।

द्वेवर्षेभूताद्वाभ्यांशताभ्याङ्क्रीतेस्यर्थेद्विवर्षाद्विशतातिर्यङ्मानेद्विहस्ताभित्तिरित्या·॥
द्वौचनिषेधःसिद्धः।काण्डान्तादितितुक्षेत्रएवेतिनियमार्थम्।तेनद्विकाण्डीरज्जुरित्यत्रन·॥

नतद्धितइत्येवसूत्रमस्तुलुग्ग्रहणन्त्वमास्तुद्विगोरित्यनुवर्त्तते।तद्धितपरस्यतद्धितार्थपरतयातद्धितार्थयोःपरिमाणान्तोद्विगुस्तस्मा
न्नङीवित्यर्थोऽस्तु।तेनसमाहारेपञ्चाश्वीत्यादिद्विगौनिषेधोनभविष्यतीत्याहुः।तन्न·अपरिमाणद्यन्ताद्विगोर्यस्तद्धितस्तदन्तान्ङीप्र
स्यादित्यर्थोपिसम्भाव्येततनश्चाध्यर्द्धकार्षापणिकीअध्यर्द्धसाहस्त्रीवडवेत्यत्रापिनिषेधःप्रसज्येत।अत्रहिविभाषाकार्षापणेतिवि ३६३
कल्पेनलुग्विधानम्।यत्रतुतद्धितस्यलुक्तत्रापिप्रसङ्गलक्षणेनभविष्यतीतिलुग्ग्रहणस्यावश्यकत्वात्।पूर्वकालस्थितरूपरसादि
परावृत्तिलक्षणस्यपाकस्यद्वौविक्लोपचतीत्यत्रासम्भव·

भे सुवर्णनादश्रपाकासम्भवादाह यचेर्द्वीभावेति अन्यमतमाह आचितइति स्वमतमाह आचितोदशेति अतएव प्रमाणशब्द
स्यपरिच्छेदकमात्रपरत्वादेवात्रहीति पुरुषात्प्रमाणसूत्रेहीत्यर्थः। उत्तरसूत्रेति सङ्ख्यायाः सञ्ज्ञासङ्घेतिसूत्रेत्यर्थः। अतएवषष्टि
द्वौविलोपचत्तीति पचेर्द्वीभावानुकूलोव्यापारोर्थः। अत्रोन्मानत्वाद्द्वकोलुक्। आचितः शाकटोभार इत्युक्तेरा
चितः परिमाणमित्येके आचितोदशभाराः स्युरित्युक्तेरुन्मानमतद्दितिएतदपिनियमार्थमित्यन्येप्रमाणइति षोडश
हस्तप्रमाणदण्डवाचककाण्डशब्दस्यायाममात्रपरिच्छेदकत्वेनप्रमाणत्वमितिभावः। पुरुषात्प्रमाणे पुरुषस्योर्द्ध्वाधर
दिगवस्थितवस्तुमात्रपरिच्छेदकत्वेनोन्मानत्वादुन्मानस्यचेहिसादेरेवेतिनियमान्निषेधाप्राप्त्यानित्यङीपिप्राप्तेविकल्पा
र्थमिदम् अत्रप्रमाणशब्दः परिच्छेदकमात्रपरोनत्वायामपरिच्छेदकवाची अतएवतस्यपुरुषविशेषणतानासङ्गता
जातिवचनस्यापिपुरुषशब्दस्यपञ्चारत्निः पुरुषइति शुल्वसूत्रादत्रप्रमाणइतिविशेषणाल्लोकव्यवहाराच्चपरिच्छे
दकवाचित्वमपि द्विपुरुषीति द्वौपुरुषौप्रमाणमस्याइत्यर्थेतदस्यपरिमाणमितिप्रत्ययस्याध्यर्द्धेतिलुकिउदाहरणम् तत्र
हिपरिमाणशब्देनोत्तरसूत्रानुरोधात्परिच्छेदकमात्रस्यग्रहणमितिसिद्धान्तः। ऊधसो समासान्तोयम् तत्रस्त्रियामित्युपसङ्
ख्यानादाह स्त्रियामिति बहुव्रीहौसकथ्यक्ष्णोरित्यतोबहुव्रीहाविरयनुवर्तते ङ त्वाच्चास्यादेशत्वम्॥ ११ जीवितप्रमाणमस्येत्यर्थे
षाष्टिकइतिसिद्धम्। ऊधसइतिसूत्रस्यसमासान्तप्रकरणस्थत्वेप्यनङ्गेनप्रत्ययत्वम् ङकारोच्चारणसामर्थ्यात् किन्त्वादेशोयमाख्यानिद्धारणचायं
समासान्तः। अतएवकपन तत्र अनङ्घ धौ स्त्रियामित्युपेति ऊधसोनकारोलिङ्गाधिकारइतिहितत्रसंवार्तिकमाननुबहुव्रीहेरूधसइतिसूत्रमध्ये प्रवाहन्यायेन॥

भे· डाप्निषेधयोरेव बाधकं स्यान्न तु अनउपधालोपिन सूत्रविहितस्य ङीपस्तस्य परत्वादत आह· अनउपधेति· इत्यत्रेति· वाक्यभेदेन तत्र ङीषविधा
नमित्यपि ज्ञेयम्। एतेन· तत्रानुवर्त्तनेन। ङीषविधानं स्वरसिध्यर्थं नेनान्तोदात्तत्वं सिध्यतीति तदाह· ङीपिति· यथाश्रुतमूलानुरोधेन केशवाक्यस्य।

डाप्ङीम्निषेधेष्विति· समासान्तानामलौकिके वाक्ये एव प्रवृत्त्या पूर्वमनङोऽप्राप्तिः। अनउपधालोपिन इत्यत्रास्यानुवृत्त्या ङी
पापि बाधः। एतेन मध्येऽपवादन्यायाड्डाप्निषेधयोरिदं बाधकमित्यपास्तमिति भावः। ङीषिति· ङीपि तु कुण्डोधन शब्दे पूर्वप
दप्रकृतिस्वरेणोधकाराकारस्यानुदात्तत्वादुदात्तनिवृत्तिस्वराप्राप्त्या नोदात्तत्वं न सिध्येत· कुण्डमिवोधो यस्या इति विग्रहः। ब
हुव्रीहेः किम्· ऊधः प्राप्ता प्राप्तोधः प्राप्तायन्ने चेति समासः अव्ययग्रहणं ननु वृत्तेरिति· अस्वरितत्वादिति भावः। निषेधादपीति·
अपिना न उपधेति ङीप्· अनग्रहणेऽनर्थकस्यापि ग्रहणात्· द्विहायनी बालेति· द्विहायनी द्विवर्षा गौरिति प्रायो वा इत्येके।
बालेत्यस्य गौरित्यर्थ इत्यन्ये· नित्यं संज्ञा· ननु संज्ञाशब्दा नियतानुपूर्वीका अनादय श्छन्दसि च दृष्टस्यैव विधानमिति।
ङीवभावविशिष्टस्य तत्र प्रयोगासम्भवादन उपधेत्येव सिद्धे इदं व्यर्थमिति चेदुत्तरार्थत्वात् योगविभागस्तु व्यर्थ एव तच्छून
यन् लक्षणान्तरसिद्धमुदाहरति वेदेपञ्चदाम्नीति· क्वचित्तु शतमूर्ध्नीति पाठः। केवलमामक· अस्मच्छब्दाद्गणितवकममम
कावेकवचन इति ममकादेशः अभागशब्दात्पुंल्लिङ्गत्वात्स्वार्थे धेयः स्वार्थिकेषु लिङ्गातिवृत्तेरपि सत्त्वात् स्त्रीत्वम्·॥ ॥ 

न्यथानयनमत्र नोचितमित्याशयेनाह· बालेत्यस्येति· लक्षणान्तरसिद्धमिति· केवलमामकेति लक्षणेन सिद्धमित्यर्थः सत्त्वात्स्त्रीत्वमिति· स्वार्थिकाः
प्रत्ययाः क्वचित्प्रकृतितो लिङ्ग· वचनान्यतिवर्त्तन्ते इति न्यायात्·॥

मि० नायन्तद्वाचक इति· वयोरूपप्रवृत्तिनिमित्तवाचकः। तत्र हेतुमाह· यापि व्याध्यादीति· त्रीणि वयांसीति· तदुक्तमभियुक्तैः। पिता रक्षति कौमारे भर्त्ता रक्षति यौवने। पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हतीति। चत्वारि वेति· तदप्युक्तम्। आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्। तृतीये न तपस्तप्तं चतुर्थे किं करिष्यतीति। उभयथापि यौवनवचनस्य वधूटचिरण्टशब्दस्य प्रथमवयोवाचित्वाभावाद्वार्त्तिकमावश्यकमायं

वयसि· प्राणिनां कालकृतावस्थाविशेषो वयः। वयसीत्यस्य वयोरूपे प्रवृत्तिनिमित्ते इत्यर्थस्तदाह· प्रथमवयोवाचिन इति· तेनोत्तानशय्येत्यादौ न· प्रकरणादिना वयः प्रतीतावपि नायं तद्वाचकः। यापि व्याध्यादिवशाद्दन्तानाशे तेतस्या अपि प्रतीतेः। द्विवर्षेत्यादिरपि न वयोवाची शालादावपि प्रयोगात्· कौमारयौवनवृद्धत्वभेदात्त्रीणि वयांसि· आयुषश्चतुर्भागैश्चत्वारि वा· त्र्यनीका समाहारे तद्धितार्थेति द्विगुः। अकारान्तोत्तरपदत्वात्स्त्रीत्वम्· अपरिमाण· अत्र परिमाणशब्देन परिमाणन्तु सर्वत इति पारिभाषिकमेव गृह्यते· सुवर्णविस्तो हेम्नोऽक्षे कम्बल्यमूर्णापलशतमिति कोशबलेनोन्मानभूतविस्तकम्बल्यग्रहणन्तु उन्मानस्य चेद्विस्तकम्बल्ययोरेवेति नियमार्थम्· तेन द्विनिष्की सिद्धा·

त्र तु युवत्यां कुमारीधर्मोपलम्भेन प्रयोगस्तत्र तु कुमारीशब्दस्य लक्षणा। तत्र पुंसा सम्प्रयोगो हि प्रवृत्तिनिमित्तं न तु प्रथमं वयः। अत एव वृद्धकुमारीतिनमुन इति सूत्रभाष्ये प्रयोगस्तत्रापि सिध्यति· सर्वत इति· आरोहतः परिणाहश्च येन मीयते काष्ठादिनिर्मितेन प्रस्थादिना तदेव गृह्यते। तत्रैव शक्तिग्रहात्। नन्वेवं विस्तकम्बल्ययोरपरिमाणत्वादेव निषेधे सिद्धे सूत्रे पृथक् तयोरुपादानं व्यर्थमत आह· सुवर्णेत्यादि· उन्मानस्य चेदिति· अपरिमाणपदेन ग्रहणमिति शेषः। द्विनिष्कीति· अस्य निष्कोन्मानत्वेऽपि नात्र निषेधः॥

शु·शे· भै· अवयववाचीति· नतुदिक्कालान्यतरावच्छिन्नवाची। तथात्वेस्वघटितप्रातिपदिकावयवगतपूर्वत्वमादायवाकोऽतिप्रसङ्गः स्यात् एवंसति
टी·भै· विद्यमानःपूर्वावयवोयस्मिन्प्रातिपदिकेतस्यप्रातिपदिकस्यावयवोयः पतिशब्दस्तस्यनकारादेशइत्यर्थः। व्यपदेशिवद्भावेनसम्भवम्मत्वा।
३६५ ह· अव्यभिचारादिति· एवञ्चाधिकारप्राप्तस्यप्रातिपदिकस्यपत्युरितिविशेषणमितितदन्तविधिः। ननु श्रुतानुमितयोरितिन्यायेनतस्य
पतिशब्दविशेषणत्वमेवोचितमित्यतआह· सपूर्वस्येत्यनेनेति· एतच्चप्राचामनुरोधेन। वस्तुतइहार्थोप्यनुपसर्जनाधिकारस्तदाह· वह

पूर्वशब्दोऽवयववाचीव्याख्यानात्तत्रकेवलपतिशब्दस्यविद्यमानपूर्वावयवकत्वासम्भवादव्यभिचाराच्चप
तिशब्देनतदन्तंगृह्यतेइत्याह·पतिशब्दान्तस्येत्यादि·नपत्युरिति·सपूर्वस्येत्यनेनपत्यन्तस्यगृह्यमाणत्वादितिभावः। वहवोवृषलपत
योयस्याइतिकर्मधारयोत्तरपदबहुव्रीहौवारणायेहार्थोप्यनुपसर्जनपदसम्बन्धइत्यन्ये· वहुव्रीहावित्युपसर्जनोपलक्षणम्
तेनपतिमतिक्रान्ता अतिपत्नीत्यपि। व्यस्तइति· विभाषासपूर्वस्येत्यत्रयज्ञसंयोगइतिनसम्बध्यते· भाष्येकथनुषजकस्यपत्नी
तिव्यस्तएवप्रश्नात्· वृषलत्वेनयज्ञसंयोगाभावात्पूर्वणाप्राप्तेःसपूर्वत्वाभावाच्चैतदप्राप्तेरितिभावः। उपचारादिति·पाणिग्र

वइति· ननुविभाषासपूर्वेतिसूत्रस्यापियज्ञसंयोगएवप्रवृत्त्या वृषलपत्नीतिसमस्तेपिशङ्कासत्वाद्व्यस्तए (( हणाश्रयादितिभावः॥
वकिमितिशङ्क्यतआह·विभाषासपूर्वस्येत्यत्रेति· व्यस्तेकथमितिशङ्कायाबीजमाह· वृषलत्वेनेति· उपचारोलक्षणासाचस्त्रीप्रत्ययान्तस्यश
क्तिसम्बन्धेनप्रवृत्तिर्वोद्धव्यम्। अन्यत्रलक्षणायाःप्रवृत्तौनकिञ्चिद्बाधकम् लक्षणायानिमित्तमाह· पाणिग्रहणेति गृह्यतेयस्मिन्नद्ग्रहणम् पाणेर्ग्र
हणम्पाणिग्रहणमितिव्युत्पत्त्यापाणिग्रहणशब्दोविवाहपरःस्त्रीयविवाहवाचकपदप्रतिपाद्यविवाहसम्बन्धित्वमत्रशक्यसम्बन्धइत्युक्तम्· ॥

भे॰ ह्रस्वमानाभावादिति· प्रातिपदिकसामान्यादन्येभ्योपीत्यनेन धातुसामान्यात्तु क्विपो विधानेपि भाष्येकयन्तुषजकस्य पत्नीतिपूर्वपक्षसङ्गत्वा पत्नीव
पत्नीतिसमाधानस्यैवोक्तत्वादितिभावः। नन्वेवम्पत्युर्नेतिसूत्रे यज्ञसंयोग इति व्यर्थमत आह· पूर्वसूत्र इति· वृषलस्य पत्निरिति· अत्र पतिशब्दः
स्वामिनीपरः। तेन चेति· निपातनेन चेत्यर्थः। अत एव· स्त्रीविशेषे रूढिस्वीकारादेव। ननु समानः पतिर्यस्या इत्यर्थोऽत्रानुपपन्नः। समानत्वस्य भे
दघटितेति· इदम्प्रौढ्या तन्यकृतिककर्तृक्विपि ह्रस्वमानाभावात्· पूर्वसूत्रे यज्ञसंयोग इति तु वृषलस्य पतिः स्त्रीति प्रयोगसा
धनार्थम्· सपूर्वस्य किमिति· अवयववाची पूर्वशब्दः किमर्थ इति प्रश्नः। गवाम्पतिरिति· स्वामिनीत्यर्थः। निपात्यत इति· तेन
चोदाहृतसादृश्यस्यैव प्रवृत्त्या सपत्नीशब्दस्याद्युदात्तत्वमपि सिद्धम्। किञ्च समानस्वामिकस्त्रीविशेषस्यैव रूढ्या बोधनार्थं
ङीपनकारविशिष्टोच्चारणम्· अत एव समानस्वामिकदासीभूम्यादौ सपतिरित्येव· समानत्वञ्चैकस्यैव तत्तत्पत्नीसम्ब
न्धेन भेदमारोप्य बोध्यम्· मुख्यसादृश्यवत्यपि तिकासु तु न तथा प्रयोग इष्यते· त्रिसूत्रीति· व्याख्यानादिति भावः। सन्नियो
गशिष्ट इति· तेन तदभावे ङीवपि नेति भावः॥ भेदघटितत्वयास्वस्मिन्स्वभेदासम्भवादाह· समानत्वञ्चैकस्यैवेति भेदमारोप्ये
ति· पत्नीगतस्य परस्पर प्रतियोगिकभेदस्य तत्तत्सम्बन्धात्तत्रारोपः। व्याख्यानादिति· पूतक्रत्वादीनाम्पुंयोगप्रकरणे वचनमिति वार्तिकमूल
कात्। अस्मिन्वार्तिके बहुवचनोपादानेन कपिञ्जलाधिकरणन्यायेन त्रित्वस्य पुरस्फूर्तिकतया तत्रैव पर्यवसानमिति भावः। तदभाव इति·
॥ ॥ तयोरभाव इत्यर्थः॥ ॥

भै॰ सौत्र इति॰ स चात्र तकार एव न तु टकार इति स्पष्टमवगतीयत इति शेषः। तदन्विति॰ इति कारादित्या स्याना नुरोधेनेत्यर्थः। मूलादिदूषयन्स्वसिद्धान्तमाह॰ परेत्विति॰ अत्रापि वर्णादनुदात्तादिति सूत्रेपि तथैवोचितमिति॰ गृह्यमाणविशेषणत्वमेवोचितमित्यर्थः। तत्र साधकमाह॰ तत्र हीति॰ इतिपक्ष इति॰ अस्मिन्पक्षे शस्त्रीश्यामाइवायमिति। लौकिकविग्रहः। अस्मिन्पक्षे दूषणमुक्तम्। शस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वन्न सिध्य

निता न्ता नामित्यत्राकार उच्चारणार्थः नितन्तानामिति पाठे जश्त्वाभावः सौत्रः। त्रीण्येतानीति॰ अत्रैतशब्दस्योपसर्जनत्वेपि तदन्तमनुपसर्जनमेवानुपसर्जनादिति चात्र तदन्तविशेषणम्। अत एव गृह्यन्ते नितान्तानीत्युक्तानाराय्येनात्र बहुव्रीहित्वानेनङ्गीविस्तुक्तन्तदनुसारेणचेदम्॰ परेतु उपमानानीतिसूत्रस्थभाष्यस्वरसादिहाणिजिन्यादौ गृह्यमाणविशेषणत्वस्यक्लृप्तत्वाच्चात्रापि तथैवोचितम्॰ तत्र हि शस्त्रीश्यामेत्यादौ श्यामा शब्दः शस्त्रीमेवोपमेयन्तु समासवाच्यमिति पक्षे शस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वन्न सिध्यति॰ यद्युपसर्जनस्येति ह्रस्वत्वन्तदा कुम्भकपाललोहिनीत्यत्रानुपसर्जनलक्षणर्ईकारो न प्राप्नोतीत्युक्तम्॰ त्र्येण्येतस्य त्रिपुस्थाने एन्येत्यर्थो बोध्य इत्याहुः। आर्षमत्रणत्वम्। वर्णात्किम्। प्रकृता गतिर इत्याद्युदात्तः॥ १९ ति। शस्त्रीश्याम इति चेद्विग्रहस्तदा स्वतो ह्रस्वान्तस्यैव श्यामशब्दस्य प्रयोग इति तादृशप्रयोगनिर्वाहः सम्प्रति तु शस्त्रीश्यामा देवदत्त इति स्यादिति भावः। उपसर्जनह्रस्वत्वमिति॰ समासवाच्यमुपमेयम्प्रधानं शामा शब्दार्थस्याप्रधानत्वादुपसर्जनत्वमिति तत्त्ववः। ईकारो न प्राप्नोतीति॰ अत्रापि कुम्भकपालं लोहितमिवेति विग्रहः कार्यस्तथा सत्युपसर्जनत्वाद्वर्णादनुदात्तादिति ईकारो न प्राप्नोतीत्यर्थः त्रिपुस्थाने धिति॰ सुप्सुपेति समासः। आर्षमत्रणत्वमिति॰ समानपदत्वाभावादट्कुप्वाङ्नुम्

भे· घृतादिपाठेसाधकमाह· उतापरमित्यादि· प्राक्सुबुत्पत्तेरिति· स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपिबोध्यम्। तत्र· औषधेर्मूढ इतिशेषः। ननुसुमङ्गलीरियमि
त्यनुपपन्नमनेनसूत्रेणङीपिहल्ङ्याद्लिोपस्यदुर्वारत्वादतआह· सुमङ्गलीरियमिति· ईप्रत्ययेति· छन्दसीवनिपौचवक्तव्याविति वार्त्तिकेनविहि
तेईप्रत्ययइत्यर्थः। नन्वप्राप्तस्यमनुपोनिपातनेशालायांवाच्यायामपितादृशप्रयोगापत्तिरतआह· नुगिति· ननुयज्ञसंयोगइत्येतावन्मात्रेणपुं

पापशब्दोऽर्शआद्यचान्तइतिवर्त्तमानःस्त्रियाम्। अपरः पवर्गमध्यो घृतादित्वादन्तोदात्तः उतापरम्पश्चिदेवानित्यादौ उतापरी
भ्योमघवेत्यादौचान्तोदात्तपाठात्· पूर्वमनयन्नापरमित्यादौपठ्यमानमाद्युदात्तत्वमपिवृषादित्वात् एवाः पूर्वामभ्येनीत्यादाव
जादिपाठाद्द्वावपि· आर्येणकृतेति प्राक्सुबुत्पत्तेः समासेऽदन्तत्वम्· भेषजशब्दोऽव्युत्पन्नऔषधेरूढः। भिषजइदमित्यर्थेऽणि
भैषजशब्दोऽपि· तत्रसुमङ्गलीरियंवधूरितितुमत्वर्थीयईप्रत्ययेबोध्यम्· प्रकृतिभागाविति· नुक्सन्नियोगेनेतिभावः। मतुविति·
वत्वन्तुमादुपधायाइतिसिद्धम्· यज्ञेनसम्बन्धेइति· स्त्रियाइत्यर्थः। संयोगपदंसम्बन्धोपलक्षणम्। सम्बन्धश्चयज्ञफलप्रतियो
गिकैश्वर्यवत्त्वम्· तदाह· तत्कर्तृकेति· विभाषा· सहशब्दोविद्यमानवाची॥ ((सोयज्ञसंयोगइत्यपिप्रतीयेतेत्यत आह· स्त्रियाइत्यर्थइ

ति· पतिशब्दोयद्यपिपुंल्लिङ्गस्तथापिस्ववाच्यकर्तृकयज्ञफलनिरूपितविलक्षणसम्बन्धः स्त्रियांयदाविवक्षितस्तदापुंवाचकोऽपिनकारान्तरेकार॥
स्थानिकनकारघटितोऽयमेवस्वपूर्वत्वसम्बन्धेनङीपूर्विशिष्टः स्वभावात्तन्त्रियाम्वर्त्ततइतिभावः। अत्रयज्ञसंयोगइत्यनुपपन्नम्। यज्ञस्यक्रिया
रूपतयातत्प्रतियोगिकसंयोगाप्रसिद्धेरतआह· संयोगपदमिति· यज्ञेतियद्यत्कर्मणिदम्पत्योःसहाधिकारस्तस्यसर्वस्योपलक्षणम्· ॥

 भै· ताङ्गनामित्यर्थसूर्यधरीत्यत्रैवसौरीवलाकेत्यत्रासिद्धिः स्यादितिभावः॥ ः६ः ॥ननूपधाद्यदसत्वेसूर्यादीनामुपधाभूतोयकारएवसम्भवतीति
 यग्रहणम्व्यर्थमतआह· यग्रहणन्नुत्तरार्थमिति।हलस्तद्धितस्येतिसूत्रार्थमित्यर्थः।तेन· नक्षत्रवाचकादितिव्याख्यानेनानक्षत्रशब्दोच्चारणेन
 विहितइत्यर्थंतुसन्धिवेलेतिसूत्रविहितस्यैवग्रहणंस्यात्तथाचोक्तप्रयोगानुपपत्तिरितिभावः।इदमिति· पितृव्यमातुलेतिसूत्रविहितंवार्तिकमित्यर्थः।त्रि

यग्रहणमुत्तरार्थम्।ड्यामितिनिर्देशात्सप्तम्येकवचनाग्रहणम्· नक्षत्राणीति· नक्षत्रवाचकाद्योःएतत्रेत्यर्थस्तेन
तिष्येणयुक्तानैषमहस्तिष्यभवस्तैषइत्यादिसिद्धम्· मातरिषिच्चेति· पितामहीसिद्ध्यर्थमिदम्· दंष्ट्रेति· दंशेर्दाम्नीशसेति
करणेष्ट्रन्।अयमजादिषुपठ्यते गौरादिषुमातामहीशब्दपाठोऽनार्षइत्यन्ये· जानपदीति· जनपदेभवइत्यर्थः।उत्सादि
त्वादञ् औप्याद्युदात्तत्वेप्राप्तेःन्तोदात्तार्थंवचनम्· वृत्तिरत्रुच्छेद्याजीविका· अप्रत्ययइति· तथाचक्रियाशब्दोऽयमिति
भावः।अमत्रे· कमण्डलुरूपे· कुण्डीकमण्डलौजारासतिवत्नीसुतेपुमानितिमेदिनीकोशात्सतत्रनित्यस्त्रीलिङ्गइति
भावः।यदितुपिठरेतुननाकुण्डमितिविश्वकोशेतस्यनपुंसकत्वमप्युक्तंपिठरामत्रशब्दौचपर्यायौपिठरंस्थाल्युखाकु
ण्डमित्यमरेनपुंसकत्वमात्रोक्तिरवयुत्यानुवादइत्युच्यते तदानेकविधसंस्थानेषुअमत्रेषुकुण्डव्यवहारेणकुण्डत्व
जातित्वाभावादप्राप्तौङीषितिवोध्यम्· स्त्रीविषयत्वादित्युपलक्षणमितिवहवः॥ ((याशब्दोऽयमिति· क्रियाप्रवृत्तिनिमित्तक
इत्यर्थः।कुडिदाहे इत्यस्येदित्वेनतुमिगुरुमत्त्वम्।अन्तर्भावितण्यर्थात्कर्तर्यकारप्रत्ययः।एतेनजातिवाचकत्वाभावोध्वनितः।कुण्डशब्दस्य 
रूढत्वेप्याह· यदित्विति· अनेकविधसंस्थानेष्विति· एवञ्चानुगतसंस्थानव्यङ्ग्यात्वाभावान्नजातित्वमित्युक्तम्भवति·॥ ॥ ॥

मि॰ मतान्तरमाह॰ कमण्डलुसंस्थानेति॰ नियमार्थमेवेति। कुण्डशब्दाच्चेदमत्र एवेति नियमार्थम्॰ सूत्रन्त्वित्यस्यामत्र ग्रहणन्त्वित्यर्थः। विधित्वा
नुरोधादिति॰ ननु जातिवाचकस्य नागशब्दस्यात्र सूत्र उपादानन्नियमार्थम्। विधिनियमसम्भवे विधिरेव ज्यायानिति न्यात्॰ असञ्जातस्यादिति॰
अस्यस्त्रीत्वमित्यादिः। इदमिति॰ प्रत्युदाहरणभूतस्य नीलेत्यस्य कथनोत्तरन्नील्या रक्तेत्यर्थकथनमित्यर्थः एवमभिधानेनोदाहरणे नीलीत्यत्रा।

कमण्डलुसंस्थानस्यानुगतत्वात्तद्रूपामत्रवाचिनो जातित्वमप्यस्ति सूत्रन्तु नियमार्थमेव॰ अमृतेजारजायाकुण्डेत्येवम
परे॰ आवपने च नित्यस्त्रीत्वाद ——— ग्रामस्य ङीषो विधिः। आवपनमिति सामान्येन पुंसकम्॰ गुणयोगादिति। गोणत्वे।
प्यपरकार्यत्वात्प्रवृत्तिरिति भावः। विधित्वानुरोधाद्गौणे एवास्य प्रवृत्तिः। वर्णे चेति॰ नहि शिष्टश्चेदित्यर्थः। अन्यथा गु
णे शुक्ला दयः पुंसीत्युक्त्याः सङ्गतिः स्यादिति बोध्यम्॰ सूत्रे वर्णशब्दोऽर्श आद्यजन्तः। कालान्येति॰ कौर्यगुणयुक्तेत्यर्थः।
नील्या अनिति॰ वृत्त्यनुसारेणेदम्॰ प्रतिपदोक्तत्वादन्यकृतिर्ङीषन्तप्रविष्टनीलशब्दस्यैवात्र ग्रहणन्नतस्य लाक्षणिक
त्वात्॰ अनाच्छादने इति नीलवर्णवती शाटीत्यर्थे नीलीति वारणाय चरितार्थम्॰ नील्या रक्ता गौरित्यर्थे नीलेवोचित।
मित्यपरे॰ मैथुनेच्छा शब्द अर्शआद्यजन्तस्तदृतीत्यर्थः॥ ॥ ९ ॥ ॥ रामचंद्रायनमः॥ ॥

पिवार्तिकनिष्पन्नस्य प्रकृतित्वमिति प्रतीयतेतन्नयुक्तमित्याशयेनाह॰ प्रतिपदोक्तत्वादिति॰ नीलवर्णवती शाटीत्यर्थ इति॰ एवञ्चानेन गु
णेनाभेदोपचारो दर्शितः। ननु नील्या रक्ता गौर्नीलीति वृत्तिकारमते जायमानस्य भवन्मते सिद्धिरित्यत आह॰ नील्या रक्तेति॥ ॥

श·शे भै· मैथुनादन्यदिति·भूषणादिकमित्यर्थः। वोतइतिसूत्रे गुणशब्देन कृत्रिमाकृत्रिमन्यायेनादेङ्·बोधकः। उतइत्यस्य विशेषणस्योपादान
टी·भै नानापि संसर्गिभेदकं यद्यत्सव्यापारम्प्रतीयते गुणत्वम्परतन्त्रत्वात्तस्य शास्त्रे उदात्ततलक्षणलक्षितङ्·णशब्दबोध्यम्· विशेषणमात्रस्यार्थ
३६८ मलक्षणेन संसर्गिभेदकमित्यनेनोच्यते। सव्यापारमिति द्वितीयलक्षणन्तस्येतरव्यापाराधीनव्यापारकमित्यर्थः। आखुर्द्रव्यमित्यत्राखुशब्दस्यद्र
व्यात्मकसंसर्गिभेदकतयातिप्रसङ्गात्। क्रियायामतिप्रसङ्गाच्च। नापिनैयायिकपरिभाषाविषयः। मृद्वीयद्वीत्याद्यसिद्ध्यापत्तेरत आह। अत्रगु
णवचनेति· इत्यंहि तत्रभाष्यम्· अर्थवत्प्रातिपदिकम्· गुणवचनञ्च· समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गाजातिरिति। गुणवच

अन्येति· मैथुनादन्यदिच्छति· कमेर्लषपतेत्युकञ्· शोणशब्दो वर्णवाची वर्णानान्तणेत्याद्युदात्तः। अन्य
तइतिसिद्धे विकल्पार्थमिदम्· वोतो· अत्रगुणवचनशब्देन समासकृदन्ततद्धितान्तसर्वनामजातिसङ्ख्यास
ञ्ज्ञाशब्दातिरिक्तशब्दो गृह्यते· आकडारसूत्रभाष्यपर्यालोचनयातादृशानामेव तत्सञ्ज्ञालाभात्· तत्रहि प्राति
पदिकमात्रस्य गुणवचनसञ्ज्ञामुक्त्वाऽग्रे तद्बाधकत्वेनैताः क्रमेणपठिताः॥ ११ नन्वेवमत्रार्थवदित्यनुवर्त्तते। एवञ्च प्रा

तिपदिकसञ्ज्ञागुणवचनसञ्ज्ञयोरेकविषयत्वात्समावेशार्थञ्चकारस्यकरणाच्चोभयोः समावेशः। कृत्तद्धितपदञ्च तदन्तपरम्। उभय
त्र प्रातिपदिकमित्यनुवर्त्तते। एवञ्च प्रातिपदिकसञ्ज्ञापूर्विका कृदन्तसञ्ज्ञा तद्धितान्तसञ्ज्ञेति एताभ्याम्प्रातिपदिकसञ्ज्ञायाः समावेशः
प्रातिपदिकसञ्ज्ञासामानाधिकरण्योपपत्तये कृत्तद्धितपदन्तदन्तपरत्वेनस्वीकृतम्· गुणवचनसञ्ज्ञात्वेताभ्यांबाध्यते। तेन कर्त्रीत्व
न्द्वारावतीत्वमित्यत्र त्वतलोर्गुणवचनस्येतिनपुम्वत्वम्॥

मि· श्वेतशब्दस्य घृतादिपाठे मानमाह· श्वेतो वाजीति· क्रादेशस्यानेकाल्त्वात्सर्वादेशत्वशङ्कायामाह· नादेशापवाद इति· ङीप्सन्नियोगेति· ङीप्
विधायकसूत्र एव भाष्ये पाठात्। तत्प्रवृत्तिनिमित्तकः। विशुद्धिप्रवृत्तिनिमित्तकः। न चैवमवदातः सितो गौर इति कोशानुपपत्तिः। विशुद्धत्वसाध
र्म्यात्तत्राप्यवदातशब्दप्रवृत्तिसम्भवात्। वर्णादनुदात्तादिति सूत्रानन्तरमन्यतरस्यस्यपाठाद्विशेष्यभूतार्थवाचकस्य वर्णादित्यस्यापस्थित

अन्तोदात्त इति· श्वेतो वाजी जायते इत्यादौ तथा पाठादिति भावः। छन्दसिक्रमिति· नादेशापवादस्तेनोत्सर्गसमानदेशा अपवा
दा इति न्यायात्तत्स्थानिकत्वं ङीप्सन्नियोगशिष्टत्वञ्चास्य बोध्यम्· विशुद्धिवाचीति पाठे तत्प्रवृत्तिनिमित्तक इत्यर्थः। अन्यत्वे स
न्निधानाद्व्याख्यानाच्च नोपधस्यैव प्रतियोगित्वेनान्वय इत्याह· नोपधमिन्नादिति· वर्णात्किम्· स्वङ्गा आद्युदात्तः। नन्नेकीति· शि
ल्पिनि ष्वुन्। गौरशब्दो वर्णवाच्यप्यन्तोदात्त इतीह पाठः। अनडुहीति· आमनडुहः स्त्रियां वेति वचनात्पक्षे आम्· सूर्येति· स च
घ इति· सूर्यादीनामङ्गानामुपधाया इति व्याख्याने तु सौरी वलाकेति न सिध्येत· सूर्यलोकदिगित्यण्णन्ता ङीपि अणन्तमङ्गं न
सूर्यशब्द इति तदसिद्धिः। वचनं तु सूरीकुन्तीत्यत्र चरितार्थम्· अणो लोपे य्याभीयत्वेन सोऽसिद्धोऽणनिमित्तकाल्लोपस्तु व्या
श्रयत्वान्नासिद्ध इति यस्योपधात्वमुपधाग्रहणादेव भाधिकारमभिव्याप्याभीयासिद्धत्वमिति बोध्यम्॥ ॥

स्यान्यत्वे प्रतियोगितयाऽन्वये तन्निरिकल्माषीति भाष्यप्रयोगानुपपत्तिरत आह· अन्यत्व इति· व्याख्यानादिति· उक्तप्रयोगदर्शन
मूलकादित्यर्थः। आद्युदात्त इति· क्न्प्रत्ययान्तत्वात्। अन्तोदात्त इति· प्रातिपदिकस्वरेणान्तोदात्त इत्यर्थः। स चेत्सूर्यो घवयव इति व्या
ख्यानफलमाह· सूर्यादीनामिति· सोऽसिद्ध इति· एवञ्च सूर्यशब्दस्याङ्गत्वमिति भावः। उपधाग्रहणादेवेति· अन्यथा सूर्यादीनां ङीनिरूप

भै· असत्वप्रकृतिरिति· अद्रव्यस्वभावः। तेन भिन्नजातीयतंत्वारब्धस्यासमवायिकारणनाशजन्यनाशप्रतियोगिनः पटस्य निरासः। क्रियावा
रणयाह· आधेयइति· आधीयते उत्पाद्यते इत्यर्थः। एतेनानित्यत्वस्य लाभेऽक्रियाजइत्यनेन नित्यत्वस्य च लाभे नित्यानित्यवृत्तिजातिमानि
तिफलितम्· नचैवमपि तादृशसत्ताजातिमत्वस्य क्रियायां सत्वादतिव्याप्तिरेवेति वाच्यम्· द्रव्यावृत्तित्वस्यापि जातिविशेषणत्वात्· एतेनै
व सर्वगुणसङ्ग्रहे सत्वेन्निविशतइत्यादिव्यर्थमिति भावः। नचात्र कृदन्तसञ्ज्ञायाः गुणवचनसञ्ज्ञाया वाधादेव नातिप्रसङ्ग इति वाच्यम्· उ
णाद्यन्तानामव्युत्पन्नस्यैव सिद्धान्तितत्वात् नन्वतइत्यस्य सम्बन्धादेव शुचिरित्यत्र नातिप्रसङ्ग इति वाच्यम्· तस्यात्रासम्बन्धात्तदाह· ख

शुचिरिति· शुचेरौणादिकः किदिन् उतइत्यस्याभावेपि खरुसंयोगोपधान्नेत्येतत्सामर्थ्येनातइत्यस्यात्रासम्व
न्धः। उणादीनामव्युत्पन्नत्वात्कृदिकारादित्यस्यात्राप्राप्तिरित्यभिमानः शुक्लेति तु प्रत्युदाहरणमुचितम्· तपरः कि

रुसंयोगोपधान्नेति· अभिमान इति· अत्रारुचिस्तूणादीनां व्युत्पन्नत्वेन वक्ष्यमा ((म· कासूः वधूः वधूः स्नुषा नवोढा स्त्री·॥
णस्य वृत्तिकारसम्मतस्य व्यवस्थितविभाषात्वस्य सत्वेन च तेनैव दोषनिरासे उत इत्तिकार्यमा वार्तिकमप्यप्राप्त्यनुवाद एवास्त्वि
ति· प्रत्युदाहरणमुचितमिति· नचात्रापि संयोगोपधत्वात्संयोगोपधान्नेति निषेधो भविष्यतीति कथमेतत्प्रत्युदाहरणमिति वाच्यम्· खरु
शब्दसाहचर्येण संयोगोपधस्याप्युकारान्तस्यैव ग्रहणमित्याशयात् नचातइत्यस्य सम्बन्धेन खरुसंयोगोपधान्नेति न कार्यमिति वाच्यम्· पद्धे
त्यादीनामसिद्ध्यापत्तेः॥

भै॰ विकलवाचीति॰ विकलावाग्यस्यास्तस्यामित्यर्थः। उक्तरीत्यागुणवचनत्वाभावेनेति॰ सङ्ख्यासञ्ज्ञागुणवचनसञ्ज्ञायावाधेनासर्वतइत्य
स्यार्थमाह॰ अकृतोपि॰ अपिनाकृतः। शोणत्माचामितिसूत्रान्मा चामित्यनुवृत्त्यैवसिद्धेवोतइतिसूत्रेवाशब्दोपादानंव्यवस्थितविभाषात्वसूचनाय
तदाह॰ व्यवस्थितेति॰ वृत्तिरिति॰ द्वित्रात इत्यादिनातस्याः परिगणनाद्द्वित्रादिष्वस्यापाठादितिव्यवस्थितविभाषात्वन्नयुक्तमित्यरुचिः। तदुक्तंप्रयो
कासूर्विकलवाचिस्यादितिकोशवलेननवोढात्वस्यविकलवाक्त्वस्यचप्रवृत्तिनिमित्तत्वेनखरुशब्दवद्गुणवच
नत्वात्॰ पतिम्वरेति॰ पतिलाभोत्कण्ठावतीत्यर्थः। वह्वादि॰ वहुशब्दस्योक्तरीत्यागुणवचनत्वाभावेनग्रहणम्॰ कृ
दिकारादिति। सर्वतइतिचगणसूत्रे॰ अकृतोपीत्यर्थः। व्यवस्थितविभाषाश्रयणात्क्वचिन्न॰ सुगन्धिः प्रियकृति
वैश्येत्यादीतिवृत्तिः पुराणशब्दोऽत्रपठ्यतेसयद्यपिअयंपंथाअनुचितः। पुराणइत्यादावन्तोदात्तदर्शनेनघृतादिपाठाद
न्तोदात्तइत्युदात्तनिवृत्तिस्वरेणततोङीपङीषोः स्वरेविशेषाभावस्तथाप्यत्रपाठसामर्थ्यान्ङीषेवेतिवोध्यम्॰ अ
जननिरिति॰ आक्रोशेनञ्यनिरितिजनेरनिः। अहन् शब्दोऽत्रपठ्यतेसामर्थ्यादनुपसर्जनाधिकारवाधः। दीर्घान्ही
माहृडितिङीष्यन्तोदात्तम्॰ वह्वादिराकृतिगणइतिगणरत्नकृत्॰ ॥ ((गसिद्धिसुलिङ्गस्यलोकाश्रयत्वात्तत्रार्थस्यशास्त्री
यलिङ्गाभावकल्पनेनवाग्रहणन्तुसर्वमतेविकल्पार्थम्॰ ङीपङीषोरिति॰ अयंहिद्युलन्तः। पुराणप्रोक्तेतिनिपातनात्तुडभावः। एवञ्चटित्वान्ङी
पप्राप्तः। सामर्थ्यादिति॰ केवलस्यस्त्रियामप्रवृत्त्यसम्भवात्तस्मादुपसर्जनएवप्रवृत्तिः॥ ० ० ॥ ॥ ॥

श॰शे॰ मे॰ पुंयोगादितिसूत्रेपरपञ्चमीनसम्भवतीत्यतआह॰ हेतौपञ्चमीति॰ एवंसतिकस्मादनेनप्रत्ययविधानमित्याकाङ्क्षापूरणायाह॰ आख्यायामिती
टी॰भै॰ ति॰ आख्याशब्दस्यसम्बन्धिकत्वादाह॰ उपस्थितत्वादिति॰ एवञ्चयादृशोवाक्यार्थःसम्पन्नस्तमाह॰ पुंयोगाद्धेतोरिति॰ सर्ववाक्यमसतिबाधकेसा
वधारणमितिन्यायेनैवकारलाभः।विनापिप्रत्ययमितिवचनेनसंशब्दलोपेसतियोगशब्दस्यसंयोगपरत्वभ्रमनिरासायाह॰ योगःसम्बन्धइति।

पुंयोगात्॰ हेतौपञ्चमी॰ आख्यायामितिपञ्चम्यर्थेसप्तमी॰ आख्याशब्दोबोधकपरः।आख्याचोपस्थितत्वात्पुंसए
वनस्त्रियाः।स्त्रियांवर्त्तमानस्यपरस्पराख्यत्वाव्यभिचारादाख्यापदवैयर्थ्यापत्तेः।पुंस्येवयःप्रसिद्धःशब्दइत्यर्थः।पुंयो
गाद्धेतोःप्रवृत्तिनिमित्तारोपेणस्त्रियांवर्त्तमानात्पुम्बोधकाच्छब्दान्ङीषित्यर्थः।योगःसम्बन्धः।पुंयोगात्किम्॰ देव
दत्ताःआख्यायाङ्किम्॰ प्रसूता। तदभावेहिस्त्रियांवर्त्तमानंप्रातिपदिकंपुंयोगहेतुकप्रवृत्तिनिमित्तकमित्यर्थो
पिसम्भाव्येत॰ अस्तिहितत्प्रवृत्तिनिमित्तेप्रसवेपुंयोगहेतुकत्वम्॰ उक्तंपुमाख्यातुनैषेतिभावः।पुंयोगोत्रदाम्प
त्यरूपएवेतिभाष्यस्वरसः।यथेसंभर्त्तृपापकृतान्वन्ध्यादीन्लभते॰ एवंतच्छब्दमपीतिभाष्योक्तेः।देवकीत्या
देवदत्तेति॰ क्तिचक्तौचेतिसूत्रनिष्पन्नोयंस्वभावतः।स्त्रियांवर्त्ततेनतुपुंयोगमत्रनि दितुगोरादिषुबोध्यमितिकेचित् ॥
मित्तमितिभावः॰ आख्यायांकिमिति॰ एतदभावेपिप्रातिपदिकादित्यधिकृतेसम्बध्यतएव॰ एवंसतिनिष्पन्नंवाक्यार्थमाह॰ तदभावेहीति॰ ३७०
प्राचाम्मतङ्दूषयति॰ पुंयोगोत्रेति॰ एतेनजन्यजनकभावनिरासः।तथासतिदेवकीत्यादिप्रयोगाणामगतिरतआह॰ देवकीत्यादित्विति॰
आदिनाकैकेयीशूद्रीत्यादिप्रयोगाणांसंग्रहः॥

भे· नचगुणिपरशुक्लादीनाङ्गुणवचनसञ्ज्ञातद्धितान्तत्वान्नप्राप्नोतिमतुपोऽत्रलोपादितिवाच्यम्· श्रूयमाणतद्धितान्तस्यसञ्ज्ञाविधानात्· अथवा
गुणगुणिनोरभेदोपचारादेवगुणिनिशुक्लादिशब्दानाम्प्रवृत्तिसम्भवेनमतुपएवानुत्पत्तेः।रूपादिशब्दानान्तुनगुणवचनसञ्ज्ञा।जातिसञ्ज्ञ
याबाधात्· तेनतेभ्यःष्यञ्न· जातिसञ्ज्ञात्वसर्वलिङ्ग त्वात्प्रवर्त्तते।एवमव्ययादिसञ्ज्ञाभिरपिप्रातिपदिकग्रहणानुवृत्त्यासमावेशः।नचप्राति
पदिकमात्रस्यगुणवचनसञ्ज्ञापदितरागुणवचनब्राह्मणादिभ्यइतिसूत्रेब्राह्मणादिग्रहणम्व्यर्थमितिवाच्यम्प्राणभृज्जातिलक्षणण्वाध
गुणवचनेसन्त्वर्थसञ्ज्ञयागुणोपसर्जनगुणिवाचकानामेवनादृशानांसञ्ज्ञेतिनरूपादीनाङ्ग्रहणम्· जातिपदे
नाकृतिग्रहणाद्द्रव्यवृत्तिजातिवाचकानामेवतत्रग्रहणान्।कठादिशाखातद्ध्येतृणाञ्चतद्धितान्तत्वादेवव्यावृत्तिः।
एतत्सूत्रभाष्योक्तंसत्वेनिविशतेपैतिपृथक्जातिषुदृश्यते· आधेयश्चाक्रियाजश्चसोऽसत्वप्रकृतिर्गुणइति
गुणलक्षणन्त्वेकदेशयुक्तिर्वहुविशेषणानांवैयर्थ्यात्· भाष्यकृताऽव्याख्यानाच्च· तस्मादाकडारसूत्रोक्तमेव
भाष्यसम्मतमितिभाष्यप्रदीपोद्योतेनिरूपितम्· ॥ ॥ (( नार्थत्वात्·जातिसञ्ज्ञयाबाधाच्चाऐकोराजपौरुष्यमित्यादौ
ष्यञ्न तुब्राह्मणादित्वात्· एवंसङ्ख्याषट्सञ्ज्ञाएताःसञ्ज्ञाअपिवाधिकाः।एकद्रव्योपनिवेशिनीसञ्ज्ञारूपादिशब्दानाङ्गुणवचनसञ्ज्ञाम्प्र
कारान्तरेणवारयति· गुणवचनेसन्त्वर्थेति· वहुविशेषणानांवैयर्थ्यादिति· सत्वन्द्रव्यन्तमाश्रयते ततएवपाकादिनापूर्वगुणस्यनिवृत्तिरपि
भवति।विभिन्नजातीयेषुघटपटादिषुदृश्यते· एतेनजातिनिरासः।द्रव्यत्वेविभिन्नजातीयेषुजलपृथिव्यादिषुपद्योपिदृश्यतेतथापिक

मि॰ षष्ठीसमासस्यासुवुत्पत्तेः प्राक्प्रवृत्तिमनभ्युपगम्यसमाधानान्तरमाह यद्वेति तन्निषेधस्य तृजकाभ्यां कर्तरीति निषेधस्य अनित्यत्वात् तत्प्र
योजको हेतुश्चजनिकर्तुः प्रकृतिरितिनिर्देशेनानित्यत्वात् आद्युदात्तेति धातुस्वरेणाद्युदात्तेत्यर्थः। एतेन अन्तोदात्तस्यसूर्यशब्दस्यसाधनेनाङीष्प्र
तिषेधेन सूर्यान्नेतिन्यासेन ननु सूरीकुन्तीत्यनेनैवस्त्रीत्वाभिव्यक्तिसम्भवादियमिति व्यर्थमित्याशङ्कानिवारणायाह सूर्यस्येति ननुपुंयोगस्य
दाम्पत्यभावरूपस्यैवपूर्वव्यवस्थापितत्वात्तस्यविवाहितायामप्रसिद्धेः कथमियंसूर्यस्यस्त्री। विवाहात्प्राक्सूर्यसम्बन्धेनकर्णस्योत्पत्तिरितिप्रसि
द्धमितिचेन्न सूर्यस्यस्त्रीसूर्या देवतायां किम् सूरी। एतद्भाष्यप्रामाण्येनदेवतावाचकस्यपुम्शब्दस्यतद्देवकर्तृकस्वीकारकर्मत्वसम्बन्ध

यद्वातन्निषेधस्यानित्यत्वादप्रवृत्तौकारकषष्ठ्यासुवुत्पत्तेः पूर्वंसमासेनतत्रापीत्वंसुलभम् सूर्येति सर्तेः क्यप्याद्यु॰
दात्तसूर्यशब्दाच्चाप्यन्तोदात्तमिदम् एतेनङीषनिषेधेनटापैवसिद्धिरित्यपास्तम् सूरीति सूर्यस्यस्त्रीयाकुन्तीयंमानु
षीनदेवतेत्यर्थः। महत्वेइति तद्योगएवैषांस्त्रीत्वमितिभावः॥

॥ प्रयोज्यायस्याप्रवृत्तिः सापितत्स्त्रीत्वेनगृह्यतेइतिस्वी
कारात्। एवमेवेन्द्राणीत्यादीनामुपपत्तिः। नचजन्यजनकभावसाधारणः पुंयोगः कुतोगृह्यतइतिवाच्यम्। पुंयोगोपपादनावसरेपत्ये
वत्यसावकुर्वतीकिञ्चित्पापमभर्तृकृता बन्धवन्धनक्लेशान्लभते एवमष्टशब्दमपीतिभाष्यस्वारस्यात् तद्योगइति महत्वादियोगइ
त्यर्थः। अतएवैषामित्यस्योपपत्तिः। हिमारण्ययोर्महत्त्वइत्यादीनिवार्तिकानि। एतेषुवार्तिकेषूपात्तोयोयउपाधिस्तद्योगएषाम्प्रवृ ३७१
त्तिःप्रदात्तुनतत्तदुपाधिविवक्षातदास्त्रीत्वमेवनैतितद्योगएवैभ्योङीष्। अन्यत्रटाबितिभ्रमो न कार्यः। अतएवोक्तन्तद्योगएवैषामिति

मि· विभाषेयमिति· एतेनमातुलोपाध्याययोरितिवचनस्यपुंयोगएवप्रवृत्तिस्तत्रङीषःसिद्धत्वादानुग्मात्रंविकल्प्यते। ननुब्रह्माणीतिवदिन्द्रमानयती
तिव्युत्पत्याइन्द्राणीत्यस्यापिसिद्धिरितीन्द्रवरुणेतिसूत्रमव्यर्थमतआह· सूत्रन्त्विति· तेन· तादृशबहुव्रीहिसमासाश्रयणेन· करणेतिकिमिति· क्री

पचनाल्लिप्यामिति· लिप्यर्थकोत्रङीषूतस्यदमित्यएवाधकइतिवहवः लिपिरक्षरविन्यासः मातुलेति· मातुलान्निसेप्रा
सेउपाध्यायादप्राप्तेविभाषेयम्· यातुस्वयमेवेति· अपादानेस्त्रियांघञउपसङ्ख्यानन्तदन्ताच्चवाङीषितितृतीयेइङश्चे
तिसूत्रेवार्तिकादितिभावः। उपेत्याधीयतेयस्माइतिविग्रहः। अर्येतिहृस्वादित्सदाह· स्वामिनीति· अर्यःस्वामिवैश्ययोरितिसु
त्रेः। आर्येतिपाठस्तुकैयटाद्यसम्मतः। स्वार्थइति· अतएवभाष्येऽर्याणीअर्येत्येवोक्तम्· पुंयोगएवप्रवृत्तौतुउपाध्यायीति
वदर्यीतिपक्षेङीषमेवोदाहरेत्· कर्मण्याणीति· सूत्रन्त्विन्द्रीत्यादिव्यावृत्त्यर्थमितिभावः। क्रीतात्· करणादितिवक्तव्येपूर्वग्र
हणादनुवृत्तप्रातिपदिकरूपान्यपदार्थेऽवयववाचिपूर्वशब्देनबहुव्रीहिः। तेनवस्त्रेणक्रीतेतिवाक्येन· अतइतिचानुवर्त्त
ते· करणेकिम्· सुक्रीता· धनक्रीतेति· कर्तृकरणेइत्यत्रबहुलग्रहणेनगतिकारकोपपदानामितिस्यानित्यत्वादत्रसुबुत्पत्त्य
नन्तरमेवसमासइतिभावः। इदमुपपदमितिसूत्रेकैयटेस्पष्टम्· अयमजादिष्विसन्ने· एवञ्चगतीत्यादेरनित्यत्वेनमानमि
तितदाशयः। अतएवैतत्कर्तृकरणेइतिसूत्रेबहुलग्रहणफलत्वेनभाष्येनोक्तम्।। ९ तात्सपूर्वादित्येवास्त्वितिप्रश्नः। स्वक्रीते
ति· एवंसतिकर्तृपूर्वादपिस्यादितिभावः। कैयटइत्यनेनसूचितामरुचिम्प्रकटयन्स्वसिद्धान्तमाह· अयमिति· धनक्रीतेत्यादिशब्दः। अत
एव· तस्याःपरिभाषायाअनित्यत्वस्यानभिमतत्वादेव।।

भै॰ ननु तस्याः परिभाषाया अनित्यत्वाभावे गोष्ठादिष्वपि स्था धातोः के। कान्तस्य सुबुत्पत्तेः प्राक् समासे पदादित्वाभावात्सात्पदाद्योरिति निषेधाभ
भावेनादेशप्रत्यययोरित्यनेनैव षत्वे सिद्धे अम्बाम्बेति सूत्रे गवादिग्रहणं व्यर्थमत आह॰ अम्बाम्बेतीति॰ उत्तरपदभूतस्य स्थ सकारस्य षत्वं स्वेदे
भ्य एवेति तेन त्वदिस्था शोभते मालेत्यत्र नेति भावः। एतेन गवादिग्रहणमेव गतौ न्यादेरनित्यत्वे मानमित्यपास्तम्॰ नियमार्थत्वेन चारितार्थ्यात्
पदादादिरिति पक्षे तस्य तत्वासम्भवाच्च॰ वस्तुतस्तु न पदान्तसूत्रस्थपदान्तपदस्य पदे ऽन्तः पदान्त इति समासप्रदर्शनेन पदे परे योऽन्तस्तस्य कार्यं
कर्तव्यमेव न निषेध इति गोचेत्यादिसिद्ध्यर्थमनित्यत्वं परिभाषायाः स्वीकार्यमन्यथा ऽचइति सूत्रनिष्पन्नलोपस्य स्थानिवद्भावादवङादेशस्या

अम्बाम्बेति सूत्रे गवादिग्रहणन्तु नियमार्थन्तेन त्वदिस्थ इत्यादौ षत्वन्नेति दिक्॰ अभ्रलिप्तीति॰ कृद्ग्रहणे गतिकार
कपूर्वस्यापीति विशिष्टस्य क्तान्तत्वम्। अल्पाख्यायामिति समुदायोपाधिः। अल्पत्वं करणगतं क्रियागतं वा॰ क्ता
न्तादिति॰ प्रत्ययग्रहणपरिभाषालब्धक्तान्तेन प्रातिपदिकविशेषणात् क्तान्तान्तादित्यर्थः। ऊरुभिन्नाति॰ जातिकाल
सुखादिभ्यः परा निष्ठेति भिन्नशब्दस्य परनिपातः॥ १ प्यापत्तिरित्याहुः।पदशब्दस्य पदत्वयोग्योपलक्षणत्वमिति त्वन्येषामाशयः

विशिष्टस्य क्तान्तत्वमिति॰ यद्यपि वक्ष्यमाणरीत्या क्तान्तादित्यर्थे कृद्ग्रहणपरिभाषां विनापि निर्वाहस्तथापि तदन्तविधिद्वयाभावेपि निर्वाहः प्रभ
कृतेऽस्तीति भावः। समुदायोपाधिरिति॰ स्त्रीप्रत्ययान्तसमुदायविशेषणमित्यर्थः। करणगतम्॰ अभ्रगतम्॰ ईषदभ्रेण लिप्तेत्यर्थः। करणस्या
ल्पत्वे तल्लेपनस्याल्पत्वं सुकरमेवेत्याशयेनाह॰ क्रियागतमिति॰ अभ्रेण लिप्तेत्यर्थः प्रकृत इति भावः। स्त्रीप्रत्ययसमभिव्याहारस्तात्पर्यग्राह
का। प्रकारान्तरमाह॰ क्तान्तादितीति॰ एवं सति प्रकृते कृद्ग्रहणपरिभाषानाश्रयणेपि न क्षतिः। भिन्नशब्दस्य विशेषणवाचकत्वात्पूर्वनिपातः प्रा ३७२

भे॰ गोपालिकेस्यत्रगवांपालिकेतिनविग्रहस्तदाह·गाःपालयतीति·इदम्प्राचाम्मतमनुरुध्यवस्तुतस्ताहशविग्रहेपिनक्षतिरित्याह·वस्तुतइति·ननु
गतिकारकोपपदानामित्यत्रकारकपदोपादानेनकारकसन्ज्ञासमानाधिकरणसन्ज्ञानिमित्तकविभक्त्यन्तस्यसमासइत्येवलभ्यतइतिषष्ठ्यन्तस्यस
मासःसुबुत्पत्तेःप्रागितिकथंलभ्यतइत्यतआह·यथाकथञ्चिदिति·कथञ्चित्कारकत्वमिति·शेषत्वेनापिवस्तुतःकर्मण एवग्रहणमितिभावः।
अत्रत्यभाष्यादिति·एवंहिभाष्येउक्तम्·गोपालिकादीनाम्प्रतिषेधः।गोपालिकादीनाम्प्रतिषेधोवक्तव्यः।गोपालिका।पशुपालिकाइति·अत्र
गोपालिकादीनाम्प्रतिषेधइतिप्रतियोगित्वासम्भवादाह।कैयटःसिद्धपइतिवाक्यशेषइति·एतेनतृजकाभ्याङ्कर्त्तरीत्यस्यप्रवृत्त्याकर्मषष्ठ्यासमा

गोपालिकेति·गाःपालयतीतिगोपालःसएवगोपालकस्तस्यस्त्रीत्यर्थः।एवञ्चतस्यकारकषष्ठ्यासमासनिषेधाच्छेषषष्ठ्या
समासेआपःसुपःपरत्वादित्वन्दुर्लभम्·वस्तुतःशेषषष्ठ्याअप्यत्रकारकत्वात्सुबुत्पत्तेःपूर्वमेवतत्रापिसमासः।यथाकथञ्चित्का
रकत्वमादायगतिकारकोपपदानामित्यस्यप्रवृत्तेरत्रत्यभाष्यादुपपदमतिङितिसूत्रभाष्याच्चलाभात्॥ ((सासाम्भवाच्छेषषष्ठ्ये

वसमासोवाच्यः।तत्रयदिगतिकारकोपपदानामितिपरिभाषाप्रवृत्तिर्नस्यात्तदाऽऽपःसुपःपरत्वादित्वन्दुर्लभमितिभाष्योक्तस्यैत्वघटितस्यप्रयोग
स्यसिद्धयेशेषषष्ठीविषयेपिगतिकारकेतिपरिभाषाप्रवृत्तिः।ननुप्रकृतसूत्रस्थभाष्यस्यगोपालशब्दसाधपित्वाततःस्वार्थेकेपिसिद्धिरित्यतआह·
उपपदेति·तत्रहिषष्ठीसमासस्यवैकल्पिकत्वात्तदभावेचोपपदसमासइतिषष्ठीसमासादुपपदसमासोविप्रतिषेधेनेतिवार्तिकक्तोक्तस्य। उ॰द्यो॰
विप्रतिषेधस्यखण्डनायोक्तम्·अत्रविप्रतिषेधविचारेणषष्ठीसमासस्यापिसु बुत्पत्तेःपूर्वमेवोत्पत्तिरितिलभ्यते।अन्यथोपपदसमासस्यसु
बुत्पत्तेःप्राक्प्राप्तिःषष्ठीसमासस्यतुतदनन्तरमितिविप्रतिषेधविचारोऽसङ्गतएवस्यादतःषष्ठीसमासस्यापिसुबुत्पत्तेःप्राक्प्राप्तिरितिस्पष्टमेव

श॰ शे॰ टी॰ भै॰ ३७३

मे॰ मितिवाच्यम्॰ उत्तरसूत्रार्थमवश्यङ्कर्तव्यमित्याशयात्॰ एवञ्च॰ उत्तरसूत्रेतादृशार्थाश्रयणेच॰ तदाह॰ तदाशयेनाह॰ जातिपूर्वादित्यस्यप्रकृत सूत्रेपिसम्बन्धएवसमाननिमित्तकत्वलाभेननित्यशास्त्रावाधकत्वमितिभावः।पुत्रहतीत्यादावनेनसूत्रेणङीषभवतीतिवादिमतन्नयुक्तमितिध्वनयन्नाह॰ पुत्रादिनीत्यादावितिस्पष्टार्थमिति॰ प्रकृतसूत्रेविवक्षितस्यार्थस्यस्पष्टप्रतिपत्त्यर्थम्॥ ॥फलान्तरमप्यस्तीत्याह॰ किञ्चेति॰ इदमुपलक्षणम्पूर्वोक्तमपिफलम्बोध्यम्।वहुव्रीहिविशेषणमिति॰ एवंसतिसाध्वीकल्याणपाणिपादेत्यादावतिप्रसङ्गःस्यादितिशे

किञ्चेतरभावेऽस्वाङ्गादितिप्राधान्याद्बहुव्रीहिविशेषणंस्यादिति॰ स्वाङ्गाच्चोप॰ नदन्तादिषुपसर्जनग्रहणंलभ्यम्॰
वहुव्रीहेरित्यनुवर्त्तमाने उपसर्जनग्रहणफलमाह॰ अतिकेशीति॰ एकविभक्तीतिकेशानामुपसर्जनत्वमप्रधान्य
ञ्च॰ शिखेति॰ इदमेवप्रत्युदाहरणं शोभनेत्यादिसुशिखान्तमप्रसिद्धं विशिष्टेऽदन्तत्वाभावेनाप्राप्तेः।यद्यपिभाष्येऽ
शिखेतिप्रत्युदाहृतन्तस्याप्येकदेशएवतात्पर्यम्॰ नञ्पूर्वैसहनञितिनिषेधेनप्राप्त्यभावात्॰ एतेनक्रोडादिषुशि
खाशब्दपाठइत्यपास्तम् ननुसमङ्गं स्वाङ्गं चेत्सुमुखाशालेत्यत्रापिस्यात्॰ मुखस्यापिशालाङ्गत्वात्॰ सुकेशीरथ्ये॰
त्यत्रचनस्यात्केशानान्तदङ्गत्वाभावादतआह॰ अद्रववदिति॰ स्पर्शवद्द्रव्यपरिमाणम्मूर्त्तिः॥

((पः।शिखेति॰ यदिसूत्रेउपसर्जनपदन्नस्यात्तदाशिखेत्यत्रटापम्बाधित्वाङीष्स्यादितिभावः।अत्रभाष्यविरोधशङ्कांवारयति॰ यद्यपीति॰ एकदेशपरेव॰ शिखेत्यत्रैव॰ एतेन॰ अनेननिषेधेनतस्यसिद्धेःतत्रपाठेफलाभावेन।केचित्तुशिखेतिप्रत्युदाहरणमित्यसङ्गतङ्कल्याणपाणिपादित्यत्रदोषवारणायास्वाङ्गपूर्वपदादित्यस्यात्रसूत्रेऽनुवृत्त्याऽस्वाङ्ग॰ पूर्वपदान्यत्वस्यप्रकृतेऽभावेनङीषोऽप्राप्तेरित्याहुस्तन्न॰ एतत्सूत्रव्याख्यायामुपक्रमेऽशिखेत्युक्तत्वादिदमेवप्रत्युदाहरणमित्यत्रभाष्यकृतोनि ३७३

[illegible]

मे॰ तथा हि॰ अथोपसर्जनग्रहणं किमर्थम्। इह मा भूत्। अशिखा। उपसर्जनग्रहणमनर्थकम्। बहुव्रीह्यधिकारात्। उपसर्जनग्रहणमनर्थकम्। कि-
ङ्कारणम्। बहुव्रीह्यधिकारात्। बहुव्रीहेरिति निवर्त्तते। बह्वजर्थन्तर्ह्युपसर्जनग्रहणङ्कर्त्तव्यम्। बहुचो नेति प्रतिषेधं वक्ष्यति तद्बह्वज्ग्रहणमुपसर्ज-
नविशेषणं यथा विज्ञायेत। बह्वच उपसर्जनान्नेति। अथाक्रियमाणे बह्वज्ग्रहणे कस्य बह्वज्ग्रहणे विशेषणं स्यात्। बहुव्रीहेरिति वर्त्तते। बहुव्रीहि-
विशेषणं विज्ञायेत। अस्ति चेदानीं कश्चिद्बह्वज्बहुव्रीहिर्यदर्थो विधिः स्यादस्तीत्याह। खडाखडी इति। अडो वृश्चिकावयवविशेषः। बह्वजर्थ-

र्थ्येति॰ इदानीम्प्राणिस्थत्वाभावात्पूर्वलक्षणेनासिद्धिः। एवञ्चेदम्पूर्वलक्षणे प्राणिस्थत्वमुपलक्षणमित्यत्र तात्प-
र्यग्राहकमिति भावः। प्रतिमादिगतस्तनस्य प्राणिनिकटाप्यदृष्टत्वादाह॰ तेन चेदिति॰ अप्राणिनोपि स्वाङ्गं यदि तेन
तज्जातीयेन वस्तुना प्राणिर्यथा सम्बद्धस्तथाऽप्राणिः सम्बद्धश्चेदित्यर्थः। अत एव तस्य चेत्तत्तथायुतमित्यस्याप्राणि-
नोपि स्वाङ्गमिति शेषो भाष्ये दर्शितः। पुरस्तादिति॰ सत्यनन्तरस्यैव बाधकः। मध्ये इति॰ स हि पूर्वस्यैव बाधकः। प्रामाणिका
इति॰ एवञ्च सुगात्रीसार्योः प्रयोगा एवेति भावः। उरःक्रोडेति॰ दावन्तोयं स्वभावतो विशेषविषयः॥ ॥ ॥

मिति चेत्स्वाङ्गग्रहणात्सिद्धम्। स्वाङ्गग्रहणं क्रियते। तद्बह्वज्ग्रहणेन विशेषयिष्यामः। स्वाङ्गाद्बह्वचो नेति॰ स्वाङ्गसमुदायप्रतिषेधार्थन्तु। स्वा-
ङ्गसमुदायप्रतिषेधार्थन्तर्ह्युपसर्जनग्रहणङ्कर्त्तव्यम्। स्वाङ्गाद्यथा स्यात्। स्वाङ्गसमुदायान्मा भूत्। कल्याणपाणिपादेत्याद्युक्ता एतदपि नास्ति प्र-
योजनम्। स्वाङ्गपूर्वपदादिति वर्त्तते तेन स्वाङ्गं विशेषयिष्यामः। अस्वाङ्गपूर्वपदात्परं यत्स्वाङ्गमिति यच्चात्रास्वाङ्गपूर्वपदात्परं स्वाङ्गन्तदन्तो-

।श॰ श्रो॰ टी॰ मै॰ ३७५

भे॰ यदन्तश्चबहुव्रीहिर्नोदोःस्वङ्गपूर्वपदात्परंस्वाङ्गमिति। इदन्तर्हि प्रयोजनम्। बहुव्रीहेरिति वर्त्तमाने उपसर्जनग्रहणमुपसर्जनमात्राद्य
थास्यात्। निष्केशीपृक्ता। अतिकेशीमाला इतीत्युक्तम्। एतेन भाष्यीय प्रघट्टकेनोपसर्जनग्रहणस्य बहुव्रीहेरित्यस्य निवृत्तिरेव मुख्यम्प्रयो
जनन्नतु पूक्तमुपक्रमस्थमशिखेति प्रदर्शितम्भवति। सूत्रस्थस्वाङ्ग शब्दस्य वार्तिककारीय परिभाषाविषयत्वन्नतु केवलयौगिकत्वमि
ति प्रदर्शयितुमाशङ्कते नन्विति॰ स्वमङ्गमिति॰ स्वीयमङ्गमित्यर्थः। स्वांशब्दस्यात्मीयपरत्वात् अद्रवम्। द्रवतीति द्रवम् नद्रवमद्रवम्। मूर्त्तिः
काठिन्यम् अथवा असर्वगत द्रव्यपरिमाणम्। अविभुपरिमाणमिति यावत्॰ एतेनाकाशादेर्व्यावृत्तिः। तत्फलितार्थमाह॰ स्पर्शवदिति॰
तद्यस्यास्तितत्स्वाङ्गम्॥ स्वेदस्यस्वाङ्गत्वप्राप्तिर्हि द्वितीयार्थ एवेति द्वितीयार्थ एव तात्पर्यम्। ज्ञानस्याद्रवत्वात्तत्रातिव्याप्तिवारणाय मूर्त्तिमदि
ति। सुमुखाशालेत्यत्रातिव्याप्तिवारणाय प्राणिस्थमिति। सुशोफेत्यत्रातिव्याप्तिवारणायाविकारजमिति। विकारो वातादिवैषम्यन्तस्मा
द्यन्नजातन्तत्। सुकेशी। दीर्घकेशीरथ्येत्यत्र स्वाङ्गत्वसिद्धये आह॰ अतत्स्थन्तत्र दृष्टञ्चेति॰ सुस्तनी सुस्तना वा प्रतिमेत्यस्य सिद्धये तेन चेत्त
त्तथा युतमिति। भाष्ये तु तस्य चेत्तत्तथा युतमिति पाठो दृश्यते तस्याप्ययमेवार्थः। तत्र करणस्य शेषत्वविवक्षया षष्ठी। अत्रातत्स्थ न्त त्रदृष्ट
ञ्चेति लक्षणान्तरमिति प्रतीयते तन्नयुक्तम्प्रथमलक्षणेनैव द्वितीयलक्षणसङ्ग्राह्यस्य सङ्ग्रहसम्भवे लक्षणान्तरगौरवस्य गौरवपराहतत्वा
दित्याशयेनाह॰ एवञ्चेदमिति॰ पूर्वलक्षणेनासङ्ग्राह्यादाह॰ प्रतिमादीति॰ अतएव॰ तृतीयवाक्यस्याप्राप्तिविषयकत्वाद्वैवादाव न्तोयमिति॰ ३७५
कुडनिमज्जने इति धातोः पचाद्यजन्तादिसादिः। विशेषविषयः। उरोविषयः। एवंसति। तेन समासे उपसर्जनहस्वत्वे तदन्तात् क्रोडाशब्दस्य टा
वन्तस्य क्रोडादौ पाठाद्भुजान्तरवाचीयः क्रोडशब्दः स्त्रीनपुंसकलिङ्गोऽनन्ताक्रोडम्भुजान्तरमिति कोशप्रसिद्धस्तेन समासे ङीषविकल्पो भवत्येव

मे॰ पाणिगृहीतीत्यस्य पाणिर्गृहीतो यस्या इत्यर्थः। प्राशस्त्यञ्च ग्रहणे विवक्षितमन्तरभिप्रायेणाह॰ अग्निसाक्षिकेतियेति॰ यद्यपि भाष्ये भार्या
यामिति नाभिहितन्तथापि तत्र विशेष इत्यभिधानादेवङ्कथनमित्यभिप्रायेणाह॰ भाष्ये त्विति॰ नचान्य एव विशेषः कल्प्यतामिति वाच्यम्।

पाणिगृहीतीति॰ अग्निसाक्षिकतया गृहीतपाणिकेत्यर्थः। भाष्ये तु पाणिगृहीत्यादीनां विशेष इत्युक्तम्॰ अस्वाङ्गपूर्वं न
स्वाङ्गमस्वाङ्गम्॰ पूर्वञ्च तत्पदम्पूर्वपदम्पुनः कर्मधारयः। अस्वाङ्गभूतात्पूर्वपदात्परं यत्क्तान्तन्तदन्तबहुव्रीहेरित्यर्थः। उत्त
रसूत्रे भाष्ये कल्याणपाणिपादेत्यादौ तत्प्रवृत्तिनिवारणाय तत्रैतदनुवर्त्य कर्मधारयस्याश्रयणेनात्रापि तथैवौचित्यात्॰ त
त्र यद्युपसर्जनम्पाणिपादमिति समुदायो नस्वाङ्गं स्वाङ्गसमुदायश्च न स्वाङ्गशब्देन गृह्यते यच्च स्वाङ्गम्पादेति न तदस्वाङ्ग
रूपपूर्वपदात्परमित्युक्तम्॰ एवञ्च करमुखीत्यादावसाध्वेव जातिपूर्वादिती हापि सम्बध्यतेऽन्यथा बहुनञादीनामस्वाङ्गत्वे
न विकल्पस्य तत्पूर्वके दुर्वारत्वात्तदाह॰ नित्यप्राप्ते इति॰ वस्त्रच्छन्नेति॰ बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरे शेषनिघाते चा
नुदात्तान्तोयम्॰ पुत्रादिनीत्यादौ सुप्यजातावितिणिनिदर्शनेनाकृतिग्रहणत्वाद्यभावेन च पुत्रशब्दस्य जातिवचनत्वाभा
वेपि पुत्रहनीत्यादौ गौरादिङीषिति बोध्यम्॰ अस्वाङ्गादित्येव सिद्धे पूर्वग्रहणं स्पष्टार्थम्॥ ॥ ॥

पाणिगृहीता भार्या। यस्या हि यथाकथञ्चित्पाणिर्गृह्यते पाणिगृहीता सा भवतीति भाष्यात्तथोक्तमित्यभिप्रायात अस्वाङ्गपूर्वपदादित्यत्र कर्म
धारयसमासाश्रयणे बीजमाह॰ उत्तरसूत्र इति॰ नचास्वाङ्गपूर्वपदादित्यत्र कर्मधारयाश्रयणेऽस्वाङ्गादित्येव सिद्धे पूर्वग्रहणन्नास्मिन्सूत्रे सफल

भे॰ मितिवाच्यम्॰ उत्तरसूत्रार्थमवश्यङ्कर्त्तव्यमित्याशयात्॰ एवञ्च॰ उत्तरसूत्रेतादृशार्थाश्रयणेच॰ तदाह॰ तदाशयेनाह॰ जातिपूर्वादित्यस्यप्रक्र
त सूत्रेपिसम्बन्धएवसमाननिमित्तकत्वलाभेननित्यशास्त्रावाधकत्वमितिभावः।पुत्रहतीत्यादावनेनसूत्रेणङीष्प्रभवतीतिवादिमतन्नयुक्त
मितिध्वनयन्नाह॰ पुत्रादिनीत्यादाविति॰ स्पष्टार्थमिति॰ प्रकृतसूत्रेविवक्षितस्यार्थस्यस्पष्टप्रतिपत्त्यर्थम्॥ ॥ फलान्तरमप्यस्तीत्याह॰ किञ्चे
ति॰ इदमुपलक्षणम्पूर्वोक्तमपिफलम्बोध्यम्॰।वहुव्रीहिविशेषणमिति॰ एवंसतिसाध्वीकल्याणपाणिपादेत्यादावतिप्रसङ्गः स्यादितिशे

किञ्चतदभावेऽस्वाङ्गादितिप्राधान्याद्बहुव्रीहिविशेषणंस्यादिति॰ स्वाङ्गाच्चोप॰ नदन्तादिसुपसर्जनग्रहणलब्धम्॰
वहुव्रीहेरित्यनुवर्त्तमाने उपसर्जनग्रहणफलमाह॰ अतिकेशीति॰ एकविभक्तीतिकेशानामुपसर्जनत्वमप्रधान्त्व
ञ्च॰ शिखेति॰ इदमेवप्रत्युदाहरणं शोभनेत्यादिसुशिखान्तम्प्रत्ययेन विशिष्टेऽदन्तत्वाभावेनाप्राप्तेः।यद्यपिभाष्येऽ
शिखेतिप्रत्युदाहृतन्तस्याप्येकदेशएवतात्पर्यम्॰ नक्रोडादिवह्वचःइतिनिषेधेनप्राप्त्यभावात्॰ एतेनक्रोडादिषुशि
खाशब्दपाठइत्यपास्तम् ननुस्वमङ्गं स्वाङ्गम्॰ ञ्चेत्सुमुखाशालेत्यत्रापिस्यात्॰ मुखस्यापिशालाङ्ग॰ त्वात्॰ सुकेशीरथ्ये॰
त्यत्रचनस्यात् केशानान्तदङ्ग॰ त्वाभावादत आह॰ अद्रववदिति॰ स्पर्शवद्द्रव्यपरिमाणम्मूर्त्तिः॥ ((ष॰।शिखेति॰ यदिसूत्रेउपस
र्जनपदन्नस्यात्तदाशिखेत्यत्रटापम्बाधित्वाङीप्स्यादितिभावः।अत्रभाष्यविरोधशङ्कांवारयति॰ यद्यपीति॰ एकदेशएव॰ शिखेत्यत्रैव॰ एतेन॰ अनेननिषेधे
नतस्यसिद्धेःतत्रपाठेफलाभावेन।केचित्तुशिखेतिप्रत्युदाहरणमित्यसङ्गतङ्॰ स्याणपाणिपदित्यत्रदोषवारणायास्वाङ्गपूर्वपदादित्यस्यात्रसूत्रेऽनुवृ॰
त्त्याऽस्वाङ्ग॰ पूर्वपदात्परत्वस्यप्रकृतेऽभावेनङीषोऽप्राप्तेरित्याहुस्तन्न॰ एतत्सूत्रव्याख्यायामुपक्रमेशिखेत्युक्तत्वादिदमेवप्रत्युदाहरणमित्यत्रभाष्यकृतोनि ३७३

मिः। अनन्तमसूक्ष्मप्रत्याविनरजुमाधितत्त्वाणं

मे॰ तथाहि॰ अथोपसर्जनग्रहणङ्किमर्थम्। इहमाभूत्। अशिखा। उपसर्जनग्रहणमनर्थकम्। वहुव्रीह्यधिकारात्। उपसर्जनग्रहणमनर्थकम्। कि
ङ्कारणम्। वहुव्रीह्यधिकारात्। वहुव्रीहेरितिनिवर्त्तते। वह्वजर्थन्तर्ह्युपसर्जनग्रहणङ्कर्त्तव्यम्। वहुचोनेतिप्रतिषेधंवक्ष्यतितद्वह्वज्ग्रहणमुपसर्ज
नविशेषणंयथाविज्ञायेत। वह्वचउपसर्जनान्नेति। अथाक्रियमाणेवह्वज्ग्रहणेकस्यवह्वज्ग्रहणेविशेषणंस्यात्। वहुव्रीहेरितिवर्त्तते। वहुव्रीहि
विशेषणंविज्ञायेति। अस्तिचेदानींकश्चिद्वह्वजवहुव्रीहिर्यदर्थोविधिःस्यात्। सत्यमस्तीत्याह। खडाखडीइति। अडोदृश्चिकावपवविशेषः। वह्वजर्थ

रप्येति॰ इदानीम्प्राणिस्थत्वाभावात्पूर्वलक्षणेनासिद्धिः। एवञ्चेदम्पूर्वलक्षणेप्राणिस्थत्वमुपलक्षणमित्यत्रतात्प
र्यग्राहकमितिभावः। प्रतिमादिगतस्तनस्यप्राणिनिकटाप्यदृष्टत्वादाह॰ तेनचेदिति॰ अप्राणिनोपिस्वाङ्गं॰ यदितेन
तज्जातीयेनवस्तुनाप्राणिर्यथासम्वद्धस्तथाप्राणिःसम्वद्धश्चेदित्यर्थः। अतएवतस्यचेत्तन्नयायुतमित्यस्याप्राणि
नोपिस्वाङ्गमितिशेषोभाष्येदर्शितः। पुरस्तादिति॰ सत्यनन्तरस्यैववाधकः। मध्येइति॰ सहिपूर्वस्यैववाधकः। प्रामाणिका
इति॰ एवञ्चसुगात्रीसादयोः पप्रयोगाएवेतिभावः। उरःक्रोडेति॰ दावन्तोयंस्वभावतोविशेषविषयः॥ ॥ ॥

मितिचेत्स्वाङ्गग्रहणात्सिद्धम्स्वाङ्गग्रहणंक्रियते। तद्वह्वज्ग्रहणेनविशेषयिष्यामः। स्वाङ्गाद्वह्वचोनेति॰ स्वाङ्गसमुदायप्रतिषेधार्थन्तुस्वा
ङ्गसमुदायप्रतिषेधार्थन्तर्ह्युपसर्जनग्रहणङ्कर्त्तव्यम्। स्वाङ्गाद्यथास्यात्स्वाङ्गसमुदायान्माभूत्। कल्याणपाणिपादेत्याद्युक्ताएतदपिनास्तिप्र
योजनमस्वाङ्गपूर्वपदादितिवर्त्तते तेनस्वाङ्गंविशेषयिष्यामः। अस्वाङ्गपूर्वपदात्परंयत्स्वाङ्गमितियच्चात्रास्वाङ्गपूर्वपदात्परंस्वाङ्गन्नतदन्तो

भि॰ यदन्तश्चवहुव्रीहिर्नादेः स्वङ्गपूर्वपदात्परंस्वाङ्गमिति। इदन्तर्हि प्रयोजनम्। वहुव्रीहेरितिवर्त्तमाने उपसर्जनग्रहणमुपसर्जनमात्राद्य
थास्यात्। निष्केशीपूका। अतिकेशीमाला इतीत्युक्तम्। एतेनभाष्यीयप्रघट्टकेनोपसर्जनग्रहणस्यवहुव्रीहेरित्यस्यनिवृत्तिरेवमुख्यम्प्रयो
जनन्नतुपूर्क्तमुपक्रमस्थमशिखेतिप्रदर्शितम्भवति। सूत्रस्थस्वाङ्ग॰शब्दस्यवार्तिककारीयपरिभाषाविषयत्वन्नतुकेवलयौगिकत्वमि
तिप्रदर्शयितुमाशङ्कतेनन्विति॰ स्वमङ्गमिति॰ स्वीयमङ्गमित्यर्थः। स्वांशब्दस्यात्मीयपरत्वात् अद्रवम्। द्रवतीतिद्रवम् नद्रवमद्रवम्॰। मूर्त्तिः
काठिन्यम् अथवा असर्वगतद्रव्यपरिमाणम्। अविभुपरिमाणमितियावत्॰ एतेनाकाशादेर्व्यावृत्तिः। तत्फलितार्थमाह॰ स्पर्शवदिति॰
तद्यस्यास्तितत्स्वाङ्ग॰म्॥ स्वेदस्यस्वाङ्ग॰त्वप्राप्तिर्द्वितीयार्थएवेतिद्वितीयार्थएवतात्पर्यम्। ज्ञानस्याद्रवत्वात्तत्रातिव्याप्तिवारणायमूर्त्तिमदि
ति। सुमुखाशालेत्यत्रातिव्याप्तिवारणायप्राणिस्थमिति। सुशोफेत्यत्रातिव्याप्तिवारणायाविकारजमिति। विकारोवातादिवैषम्यन्तस्मा
द्यन्नजातन्नत। सुकेशी। दीर्घकेशीरथ्येत्यत्रस्वाङ्ग॰त्वसिद्धयेआह॰ अतत्स्थन्तत्रदृष्टञ्चेति॰ सुस्तनीसुस्तनावाप्रतिमेत्यस्यसिद्धयेतेनचेत्त
त्थायुतमिति। भाष्येतुतस्यचेत्तत्तथायुतमितिपाठोदृश्यतेतस्याप्ययमेवार्थः। तत्रकरणस्यशेषत्वविवक्षयाषष्ठी। अत्रातत्स्थ न्त न्त्रदृष्ट
ञ्चेतिलक्षणान्तरमितिप्रतीयतेतन्नयुक्तम्प्रथमलक्षणेनैवद्वितीयलक्षणसङ्ग्राह्यस्यसङ्ग॰हसम्भवेलक्षणान्तरगौरवस्यगौरवपराहतत्वा
दित्याशयेनाह॰ एवञ्चेदमिति॰ पूर्वलक्षणेनासङ्ग्रहादाह॰ प्रतिमादीति॰ अतएव॰ नतीयवाक्यस्याप्राप्तिविषयकत्वादेवादाव नोयमिति॰ ३७५
कुडनिमज्जनेइतिधातोः पचाद्यजन्तादिसादिः। विशेषविषयः। उरोविषयः। एवंसति। तेनसमासेउपसर्जनह्रस्वत्वेतदन्तात्क्रोडाशब्दस्यट
वन्तस्यक्रोडादैपाठाद्भुजान्तरवाचीयः क्रोडशब्दः स्त्रीनपुंसकलिङ्गोननाक्रोडम्भुजान्तरमितिकोशप्रसिद्धत्वेनसमासेङीषविकल्पोभवत्येव

मे॰ पाणिगृहीतीत्यस्य पाणिर्गृहीतो यस्या इत्यर्थः। प्राप्तस्यञ्च ग्रहणे विवक्षितन्तदभिप्रायेणाह॰ अग्निसाक्षिकेतियेति॰ यद्यपि भाष्ये भार्या
यामिति नाभिहितन्तथापि तत्र विशेष इत्यभिधानादेवक्लृप्तनमित्यभिप्रायेणाह॰ भाष्ये त्विति॰ नचान्य एव विशेषः कल्प्यतामिति वाच्यम्

पाणिगृहीतीति॰ अग्निसाक्षिकतया गृहीतपाणिकेत्यर्थः। भाष्ये तु पाणिगृहीत्यादीनां विशेष इत्युक्तम्॰ अस्वाङ्ग पूर्वं॰ न
स्वाङ्गमस्वाङ्गम्॰ पूर्वञ्च तत्पदम्पूर्वपदम्पुनः कर्मधारयः। अस्वाङ्गभूतात्पूर्वपदात्परं यत्क्तान्तन्तदन्तबहुव्रीहेरित्यर्थः। उत्त
रसूत्रे भाष्ये कल्याणपाण्यादेरसादेरत्यव्याप्तिवारणाय तत्रैतदनुवर्त्य कर्मधारयस्याश्रयणेनात्रापि तथैवौचित्यात्॰ त
त्र यदुपसर्जनम्पाणिपादमिति समुदायो नस्वाङ्गं स्वाङ्गसमुदायश्च न स्वाङ्गशब्देन गृह्यते यच्च स्वाङ्गम्पादेति न तदस्वाङ्ग
रूपपूर्वपदात्परमित्युक्तम्॰ एवञ्च करमुखीत्याद्यसाध्वेव जातिपूर्वादितीहापि सम्बध्यतेऽन्यथा बहुनञादीनामस्वाङ्गत्वे
न विकल्पस्य तत्पूर्वके दुर्वारत्वात्तदाह॰ नित्यप्राप्ते इति॰ वस्त्रच्छन्नेति॰ बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरे शेषनिघाते चा
नुदात्तान्तोयम्॰ पुत्रादिनीत्यादौ सुप्यजाताविति णिनिदर्शनेनाकृतिग्रहणत्वाद्यभावेन च पुत्रशब्दस्य जातिवचनत्वाभा
वेपि पुत्रहतीत्यादौ गौरादिङीषितिबोध्यम्॰ अस्वाङ्गादित्येव सिद्धे पूर्वग्रहणं स्पष्टार्थम्॥ ॥ ॥

पाणिगृहीता भार्या। यस्या हि यथाकथञ्चित्पाणिर्गृह्यते पाणिगृहीता सा भवतीति भाष्यात्तथोक्तमित्यभिप्रायात् अस्वाङ्गपूर्वपदादित्यत्र कर्म
धारयसमासाश्रयणे बीजमाह॰ उत्तरसूत्र इति॰ नचास्वाङ्गपूर्वपदादित्यत्र कर्मधारयाश्रयणेऽस्वाङ्गादित्येव सिद्धे पूर्वग्रहणन्नास्मिन्सूत्रे सफल

शु.शे. मि॰ जातिशब्देनेति॰ करणे तृतीया। अर्थे॰ जातिस्वरूपे। स्वरूपग्रहणन्तु न भविष्यति स्त्रीविषयत्वात्। लोके जनने लोके जननेन प्राप्तिरिति री सा जाति
टी.भे. शब्दस्य शुक्लादिगुणसाधारण्येन प्रवृत्तिदर्शनात्तस्यैव विवक्षया पाकुणोऽतिव्याप्तिः। यदि तन्त्रान्तरप्रसिद्धं भिन्नेष्वित्यादि नित्यमेकमित्यादि लक्ष
३७५ णमाश्रीयते तदापि शुक्लादिगुणानामेकत्ववादिमतेनैवातिव्याप्तिरिति भाष्यसम्मतं लक्षणमेव सिद्धान्तिसम्मतं युक्तमित्याशयेनाह भि
न्नेष्वित्यादि॰ अभिन्नयोः समानाकारयोः प्रत्यययोर्ज्ञानव्यवहारयोर्निमित्तमित्यर्थः। अव्याप्तिमप्याह॰ युवत्वादाविति॰ उपदेशादिव्यङ्ग्ये

जातिशब्देनार्थकार्यासम्भवात्तद्वाचकग्रहणमित्याह॰ जातिवाचीति॰ अनन्यभावे विषयशब्द इत्याह॰ न च स्त्रियान्नियतमिति॰ भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिर्नित्यमेकमनेकानुगतं सामान्यमित्यस्य च शुक्लादिगुणस्यैकत्वनित्यत्वपक्षे तत्रातिव्याप्तिर्जननेन प्राप्यते सा जातिरिति च युवत्वाद्यव्याप्तमत आह॰ आकृतीति॰ ग्रहणमिति करणे ल्युट् सामान्येन नपुंसकम्। आकृतिरवयवसन्निवेशः। आकृतिर्ग्रहणं यस्या इति विग्रहस्तदाह॰ अनुगतेति॰ ईदृशाकारो गोरित्याकृत्युपदेशव्यङ्ग्येत्यर्थः। न च बाल्याद्यवस्थादेहभिन्नानेकदेहवृत्तिर्देवदत्तत्वादेराकृतिव्यङ्ग्यत्वेन तत्रातिव्याप्तमिति वाच्यम्॰ समानकालिकानेकव्यक्तिवृत्त्यनुगतस्यानभिव्यङ्ग्येत्यर्थात्। अवस्थाभेदेऽपि तद्भेदा

त्यर्थ इति॰ तादृशोपदेशप्रयोज्याऽयज्ञोरिति प्रतीतिविषय इत्यर्थः। यद्यपि शास्त्रे जातिराकृतिपदेनोच्यते। तथापीहाकृतिपदमवयवसंस्थानपरत्वेन सामर्थ्याल्लभ्यात्मा तत्रातिव्याप्तमिति॰ तस्य सत्त्वारूपतयानिष्टापत्तिः कर्तुं शक्या। तद्भेदेति॰ तदाश्रयदेहभेद इत्यर्थः॥
पत्राश्रयाणां भेदप्रतीतिस्तत्रैव जातित्वस्वीकारात्॥

भि· प्रस्तुताभेदप्रसंगएवेत्याह· सएवेति· अतएव· अनुगतसंस्थानव्यङ्ग्यत्वनिवेशादेव· स्त्रीविषयत्वादपीति· अपिना कल्पभेदेन दुर्गाशरीराणां भेदेऽपि ते-
षां समानकालिकत्वाभावः सूचितः। तटत्वरूपजातौ लक्षणं दूषयति· अनुगतेति· नन्विदं लक्षणं वृषलत्वादिजातावव्याप्तमतो लक्षणान्तरमाह· नन्विस-
रिना· सापेक्षस्थलेऽपि वृत्तिप्रवृत्तौ गमकत्वम्प्रयोजकन्तच्च प्रकृते नास्तीत्याह· भाष्यप्रामाण्यादिति· अत्रेदम्बोध्यम्· न केवलं द्वितीयलक्षणमेवाभिप्रे-

सएवोपमितिप्रतीतेश्च तज्जातीयोयमित्यप्रतीतेश्च· अतएवेन्द्रत्वादिकन्नजातिः पञ्चेन्द्रोपाख्यानादिभिरनेकेषां सम-
कालिकत्वेऽपि सर्वेषां संस्थानस्यैकत्वेमानाभावात्· दुर्गापर्णेत्यादौ स्त्रीविषयत्वादपि नङीष्· तटीति· अनुगतसंस्थान-
व्यङ्ग्यमेतत् जलसमीपदेशविशेषोहितटमानन्वेवं वृषलत्वादीनां जातित्वन्नस्यात्। अवयवसंस्थानस्य ब्राह्मणसाधा-
रण्येन तस्या आकृतिग्रहणत्वाभावात् किन्तु साक्षादुपदेशगम्यासेत्यत आह· लिङ्गानामिति· इयमपि जातिरित्यर्थः। लिङ्गाना-
मिति कर्मणि षष्ठी सर्वाणि लिङ्गानि नभजतीति सर्वशब्दस्य लिङ्गापेक्षत्वेऽपि भाष्यप्रामाण्याद्भजो ण्विः समासश्च आख्या-
नमाख्यातमुपदेशः कथनादुपदेशात्· एकत्रेन्द्र इत्युपदिष्टेऽन्यत्र तद्ग्रहणेमानाभावान्नेन्द्रत्वादितथा· ब्राह्मणत्वन्तु एक-
त्रोपदिष्टे तत्पित्रादिषु सुग्रहम्· वृषलत्वन्तदपत्यतत्सहोदरादौ सुग्रहम्·॥ ५ तम· किन्नु प्रथमामपि तेन नटीत्यस्यासिद्धिरिति। उप-
दिश्य इति· ब्राह्मणब्राह्मण्यामुत्पन्नोपमित्यादिरूपः। तत्पित्रादिष्विति· ब्राह्मणपित्रादिर्लक्षणएव अत्र तदपत्यादिष्विति नोक्तम्। ब्राह्मणेन
क्षत्रियादिषूत्पन्नस्यान्यजातीयत्वसम्भवात्। तदपत्येति· अत्र तत्पित्रादिष्विति नोक्तम्। वृषलपितुरन्यजातीयस्यापि सम्भवात्·॥ ॥

भै· अत्रभाष्येआकृतिग्रहणेत्युक्त्वाअपरआहेत्यादिनालक्षणान्तरम्प्रणीतमितितयोर्यावद्वैलक्षण्यन्तदाह·अत्राकृतीति·नित्यानित्येति
नित्यम्ब्राह्मणत्वादि।अनित्यंयुवत्वादि।इत्यादिनेति·एवंहितत्रोक्तम्।अपरआह·प्रादुर्भावविनाशाभ्यांसत्त्वस्ययुगपद्गुणैः।असर्वलिङ्गाम्ब
ह्वर्थान्ताञ्जातिङ्कवयोविदुः।कःपुनरेतयोर्जातिलक्षणयोर्विशेषः यथापूर्वलक्षणन्तथाकुमारीभार्येतिभवितव्यम्।यथोत्तरन्तथाकुमार
भार्येतिभवितव्यमिति।अत्रकैयटः।द्रव्यस्यप्रादुर्भावविनाशाभ्यांयाआविर्भावतिरोभावौप्राप्नुतस्साजातिः।जातेर्नित्यत्वान्नसाक्षात्तयो
र्जातौसम्भवइत्याशयेनद्रव्यस्येत्याद्युक्तम्।नन्विदंपराश्रयस्योत्पत्तिविनाशौसम्भवतस्तत्रयद्यपिसम्भवतितथाप्यात्मत्वजातौनसम्भव

अत्राकृतिग्रहणेतिनित्यानित्यसाधारणमितियुवत्यादिकमपिजातिरेतन्मते अपरआहेत्यादिनायावद्द्रव्यभावि
त्वमित्यनित्यव्यावृत्तंलक्षणान्तरम्भाष्येदर्शितम्·एवञ्चभिन्नऋषिकर्तृकलक्षणद्वयप्रामाण्येनकुमारादिशब्दे
॥ जातिकार्यविकल्पः

तीतिचेन्नः प्रादुर्भावेत्यादिनायावद्द्रव्यभावित्वस्योपलक्षणात्।यावद्द्रव्यभावित्वञ्चस्वाश्रयद्रव्यसत्त्वप्र
तीतिसमनियतप्रतीतिविषयत्वम्·समनियतत्वञ्चकालिकप्रत्यासत्त्यावोध्यम्·युगपद्गुणैरिति·गुणैःसहयुगपद्द्रव्येणसम्बध्यते।यथा
निर्गुणस्यद्रव्यस्यनोपलम्भस्तथाजातिरहितस्यापीत्यर्थः।देवदत्तेत्यादिसञ्ज्ञानिरासायाह·वह्वर्था मिति·एतन्मतेयुवत्वादीनान्नजातित्व
मयावद्द्रव्यभावित्वात्।एतन्मतइति·प्रथममतेइत्यर्थः।नचवृडस्थविरादिशब्दाप्रथमरीत्याजातित्वाज्जातिलक्षणेङीषस्यादितिवाच्यम्·अ
जादिगणेतेषाम्पाठेनङीषावाधात् ननुपूर्वोक्तलक्षणभेदेनकुमारत्वस्यजातित्वसन्देहात्कथंसाधुत्वव्यवस्थेतिचेत्।अत्रकैयटः।पूर्वोक्त
मिवलक्षणम्भाष्यकारस्यमतम्।अपरआहेत्यभिधानादित्याहुरिति।वस्तुतस्तुलक्षणद्वयप्रणेतऋषिद्वयप्रामाण्याज्जातिकार्यस्यपुवशब्दा

भे· केवलयौगिकत्वइति· शब्दस्यान्तरसाधारण्ययोगार्थमात्रविवक्षायाम्।तेनरावणभगिन्यानस्ययोगरूढत्वेपिसणत्वानतज्ज्ञाविवक्षितेतिनत्र
णत्वस्यनिषेधस्यचप्रवृत्तिरस्त्येव।नान्दीमुखोमासइत्यत्रतुननखमुखादित्यनेननिषेधः।तस्यनान्दीकर्मसमृद्धिःसामुखमग्रदेयंपदस्याइत्य
र्थात्।कर्मसमृद्धौमुखशब्दस्यमुखमिवमुखमितिप्रधानत्वात्प्रवृत्तिः।नखमुखात्संज्ञायामित्यत्रसंज्ञापदेनपौरुषेयस्येश्वरीयसङ्केतातिर्
रिक्तसङ्केतस्यग्रहणम्· मातृषुचरोऽस्य सङ्केतएवेतिनानुपपत्तिः।अस्वरितत्वादिति· दिक्पूर्वपदादितिसूत्रघटकङीप्पदस्यास्वरितत्वादि

शूर्पणखेति· पूर्वपदात्संज्ञायामितिणत्वम्।केवलयौगिकत्वेतुशूर्पनखीत्येव· नङीबिति· अस्वरितत्वादितिभावः।
इतिशब्दइति· एवञ्चभाषायामितिव्यर्थञ्छन्दसीत्यस्यदिक्पूर्वपदादित्यत्रासम्बन्धेनास्वरितत्वादसम्बन्धसिद्धेः।परेतु
दिगितिसूत्रेवाहइत्यत्रचछन्दसीतिवर्त्तते।लोकेत्वन्तोदात्तमेवप्राङ्मुखीति· एवञ्चतन्निवृत्तिबोधनायभाषाग्रहण
म्· इतिश्चार्थेतेनछन्दस्यपि· अतएवङेराममितिसूत्रेकैयटेसख्यशिश्वीचभाषायामितिपाठोदृश्यतइत्याहुः।क्वचिदि
ति· सर्वविधीनांछन्दसिवैकल्पिकत्वेनसखासप्तपदीभवेतिसिद्धम्· नविद्यतेशिशुरस्याइत्यशिश्वी क्वचिदस्याद्युदात्त

त्वर्थः।इदञ्चव्याख्यानंवृत्तिकृट्टीत्या· वस्तुतस्तुसख्यशिश्वीतिसूत्रेभाषायामित्यस्योपादानाच्छन्दसीतिस्वरितत्वा(( त्वनुच्छान्दसत्वात्·
दिगितिसूत्रेवाहइतिसूत्रेचानुवर्त्ततएव।एवञ्चाद्युदात्तञ्छान्दसमेवेत्याशयेनाह· परेत्विति· अन्तोदात्तमेवेति· ङीषन्तत्वादितिशेषः।एवञ्चे·
ति· तयोःसूत्रयोस्तदनुवृत्तौच·।तन्निवृत्तिबोधनाय·छन्दसीत्यस्यनिवृत्तिबोधनाय· अतएव· इतिशब्दस्यचार्थत्वादेवक्वचिदस्याद्युदात्तत्वमि·
॥ ति· आद्येनबोधनयनामशिश्वीरित्यत्रेसर्थः॥ ॥ ॥

शा·शे· भै· स्वसिद्धान्तरीत्याह· ग्लुचुकायनीभार्येदोषस्त्विति· अतएव· अपत्यविशेषस्य गोत्रशब्देनाग्रहणादेव। व्याख्यानासङ्गतिमुक्त्वा रूपासिद्धि
टी·भै· मप्याह· ब्राह्मीनारदइत्यसिद्धिरिति· एतस्यानन्तरापत्यप्रत्ययान्तत्वेपि जातित्वसत्त्वेनाजाताविति निषेधः स्यादिति भावः। सामर्थ्येन· औचि
३७७ त्यात्। अथवा अपत्यस्य जाताविति विशेषणसामर्थ्यात्· अनुपसर्जनादिति सूत्रस्थभाष्यविरोधम्परिहरति· अनन्तरापत्येति· नन्वेवं ग्ली

ग्लुचुकायनीभार्येदोषस्तु ङीष्पुम्वत्त्वप्रतिषेधयोरसिद्धिरूपो बोध्य। सर्वतोक्तिन्नर्थादिति ङीषि तु पुम्वत्त्वप्रतिषेधासिद्धि
रेवदोषः अतएव ब्राह्मोऽजाताविति सूत्रेऽपत्ये जातौ नेत्यर्थः सङ्गच्छते तवत्वपक्षस्य जातित्वाव्यभिचारात्तदसङ्गतिर्ब्रा
ह्मीनारदइत्यसिद्धिरतः सामर्थ्येनात्र प्राग्दीव्यगोत्रस्यैवग्रहीतुमौचित्यम्· अनन्तरापत्यप्रत्ययान्तेऽवन्तीत्यत्र जातिप्रयुक्तो
ङीषित्यनुपसर्जनादितिसूत्रस्थभाष्यन्त्वनन्तरेऽप्यवन्त्यान्निर्द्रोणायनिवत्तत्रत्वारोपइत्यभिप्रायेण· यूनितु न प्राग्दीव्यगोत्र
त्वारोपस्तत्र युवैव न गोत्रमिति नियमेन तत्सञ्ज्ञानिषेधात् तदाह· अपत्यप्रत्ययान्तइति· अपत्यम्पौत्रप्रभृतीतिपरिभा
षितइति शेषः। शाखाध्येत्रिति· षष्ठीतत्पुरुषः। शाखायामस्त्रीविषयत्वाभावात्· जातिकार्यं लभतइति· अनेनास्या
तिदेशत्वम्बोधयति· कठेन प्रोक्तमधीतइति वैशम्पायनान्तेवासित्वात्प्रोक्तार्थे णिनेः कठचरकाल्लुक्· अध्येत्रण
प्रोक्ताल्लुक्· बह्वृचोऽध्येतव्या यस्या इति विग्रहे ऋक्पूरित्यसमासान्तः ६७॥ त्यागोत्राद्यूनीतिसूत्रस्य लुग्विधायक
त्वपक्षीयमेको गोत्रइति सूत्रस्थभाष्यमपि तु योजमत आह· यूनित्विति· अस्त्रीविषयत्वाभावादिति· एवञ्च शाखायां ङीषोऽभा ३७७
वेऽपि कठशाखेति कर्मधारयसमासाभावे भवति कर्मधारयसमासस्य प्रवृत्तौ तु पुम्वद्भावेन कठशाखेत्येव प्रयोगः। केचित्तु कठशब्दस्य
प्रोक्तार्थकणिन्यन्तस्य शाखायाम्प्रवर्त्तमानस्य योगार्थमादाय कस्यादिसाधारणतयाऽस्त्रीविषयत्वात्कठी शाखेति समासाभावे भवतीत्या

मे॰ अध्येत्रर्थकाणन्नत्यस्त्रियामावृत्तिमुपपादयति। स्त्रियामिति॰ स्त्रीयतिद्धान्तमाह॰ परेत्विति॰ उपदेशोपलक्षणमिति॰ एवञ्चोपदेशग्रा ह्याजातिरित्येवसिद्धम्॰ उपदेशग्राह्यत्वञ्च द्वाभ्यां प्रकाराभ्याम्‌ यद्वेतिपक्षेतूपदेशाकृत्यन्यतरग्राह्येतिलक्षणम्॰ लिङ्गानामिति॰ शास्त्रीयंलिङ्गञ्चातिरूपार्थेपिसम्भवतीत्याशयेनेदम्॰ तत्वरूपेति॰ जातिस्वरूपेत्यर्थः। तेनतादृशत्वरूपानुवादेन। नचानुवादमात्रे।

स्त्रियाअध्ययनाभावेपितद्दर्शनत्वात्ताच्छब्द्यम्॰ यथानधीयानेमाणवके॰ ब्राह्मणीत्यत्रापत्येऽणिब्राह्मोजाता वित्युक्तेष्टिलोपाभावः परेतुआकृतिग्रहणेत्येवलक्षणमाकृतिपदमुपदेशोपलक्षणमाकृतिद्वारासाक्षादोपदे शेनग्राह्याजातिरित्यर्थः। तत्रेदृशाकारोगोरित्यत्राकृत्युपदेशग्राह्यागोत्वादिजातिः। अयम्ब्राह्मणइतिसाक्षादु पदेशग्राह्याब्राह्मणत्वादिजातिः। यद्वाआकृतिग्रहणञ्जातिग्राहकोपदेशस्याप्युपलक्षणम्। लिङ्गानाञ्च नसर्वभागितितत्वरूपानुवादः। तेनशुक्लादिगुणानामेकत्वेपिजातित्वाभावोबोधितः। अतएवविशेषणा नाञ्चेतिसूत्रेजातेराविष्टलिङ्गत्वम्भाष्यउक्तम्॰ आविष्टलिङ्गत्वन्नियतलिङ्गत्वमितिकैयटः॥ ॥

णातिव्याप्तिवारयितुन्नशक्यतइतिवाच्यम्॰ विशेषणानर्थक्यप्रवेशस्याभिमतत्वात्। एवंसत्याकृतिग्रहणेत्येवेत्येवकारेण। द्वितीयलक्षणकरणाद्व्यवच्छिद्यते तत्वसर्वलिङ्गत्वेसतीतिविशेषणमितिबोध्यम्॰ अतएवजातावपिलिङ्गसम्बन्धसम्भ वादेव॰ ननुयद्वालक्षणद्वैविध्यन्तदाद्वितीयलक्षणस्याप्राप्तप्रापणार्थतयातटन्निरुक्तिरितिकोशबलेनतटशब्दस्यसर्वलिङ्गत्वे

सि॰ जातिकार्यं सिध्यति ॥

एकलक्षणत्वेत्वसर्वलिङ्गत्वे सतीति विशेषणदानेन प्राप्नोतीत्यत आह· तच्च प्रापिकमितीति· केचित्· प्राञ्चः। विशेषणस्य लिङ्गानामित्यस्याभा-
वेऽपि कश्चिज्जातित्वमिति तेषामभावः। स्वसिद्धान्तमाह· भाष्येति· ननु कोऽस्य कागतिरत आह· तदमिति· सकृदित्यस्यानन्तरप्रयोजनमाह· स-
कृदिति· एकत्वमनेकानुगतत्वमिति· एतेन जातिलक्षणयोग्यता दर्शिता। स्वरूपानुवादेन· वस्तुतः पूर्ववदेतदपि विशेषणन्तेन देवदत्तत्वादे

तच्च प्रापिकमिति केचित्· भाष्यप्रामाण्याज्जातेरेकशब्दवाच्यापानत्रिलिङ्गतातटत्रिषित्यादिको शाक्त्यप्रमाद इत्यन्ये· सकृदा-
ख्यातनिर्ग्राह्येत्यनेनैकत्वमनेकानुगतत्वञ्च बोधितम्· सकृदेकवारं क्वचिद्व्यक्तौ साक्षादाकृतिद्वारा वोपदिष्टाव्यक्त्यन्त-
रे गृहीतुं शक्येति तदर्थः गोत्वञ्चेत्यादिप्राग्वदेव· अत एव प्रादुर्भावविनाशाभ्यां सत्वस्य युगपद्गुणैः। असर्वलिङ्गां बह्वर्थान्ता-
ञ्जातिं कवयो विदुरिति लक्षणान्तरं भाष्ये उक्तम्· सत्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां या तौ प्राप्नोति सा जातिरिति लक्षणं याव-
द्द्रव्यभाविनीति तदर्थः। अनेन गोत्वब्राह्मणत्वयोरुभयोरपि सङ्ग्रहः। गुणैर्युगपद्द्रव्येण सम्बध्यते यथा निर्गुणस्य द्रव्यस्य
नोपलम्भस्तथा जातिरहितस्यापीत्यर्थ इति केचिदिति। इदं स्वरूपकथनमेव· अत्र लक्षणे असर्वलिङ्गामित्येतन्मदुक्तार्थक-
मेव न तु लक्षणान्तरमनुपयोगात्· बह्वर्थां सर्वव्यक्तिव्यापिनीमित्यर्थः। एतदेकवाक्यतया पूर्वलक्षणेऽपि मदुक्तव्याख्यैवोचिता
अत एव कः पुनरेतयोर्विशेषः यथा पूर्वलक्षणं तथा कुमारीभार्य इति भवितव्यम्। यथोत्तरं तथा कुमारभार्य इति भाष्ये लक्ष-
णमित्येकवचनमेव प्रयुक्तम्· अत एवाकडारसूत्रशेष आकृतिग्रहणा जातीत्येवोक्तं भाष्य इत्याहुः॥ ९ अवृत्तिः। समानकालि-

केत्यस्य निवेशेऽपि पूर्ववत्। प्राग्वदेव अतिदेश एव। अत एव· आकृतिग्रहणेत्यस्य पूर्वोक्तार्थाङ्गीकारादेव। अनेन· एकलक्षणेन। गुणैर्युग-
पत्सम्बध्यत इत्युक्ते केनेत्याकाङ्क्षाशान्तये आह· द्रव्येणेति· गुणैरिति प्रकृत्यादित्वात्तृतीया नेनैककाल इत्यर्थकेन युगपच्छब्देन योगे

मे॰ सर्वलिङ्गत्वादिति॰ स्त्रीपुंसयोरपत्यान्तरस्यमरान्नाडायनन्नपुंसकमितिदर्शनाद्यस्यप्रत्ययान्तस्यसर्वलिङ्गत्वन्तथाशाखाध्येतृवाचिनोपिस
र्वलिङ्गत्वङ्कठःकठीकठकुलमितिदर्शनादितिभावः। अपत्याधिकारादन्यत्रलौकिकङ्गोत्रन्तच्चापत्यमात्रमित्यभिप्रायेणकैयटेनैतद्वार्त्तिकव्या
ख्यावसरेऽपत्यमित्येवव्याख्यातमवनीकृतौसनन्तरापत्येउदाहरणञ्चदीक्षितैरपितदेवानुसृतन्तन्नयुक्तम्भाष्यविरोधादित्याशयेनाह॰
शास्त्रीयमत्रेति॰ अतएव॰ शास्त्रीयगोत्रग्रहणादेव॰ नप्राप्नोतीति॰ गोत्ररूपस्यार्थस्ययूनियः प्रत्ययस्तदर्थविशेषणत्वात्॰ प्रौढेति॰ अनुपसर्ज

अतएवयुवजातिरित्यत्रपुंवत्वंयुवतितरेत्यत्रतदभावश्चभाष्येउदाहृतः। नन्वेताभ्यामप्यौपगवीकठीत्यादेरसङ्ग्रहोऽनुगतसंस्था
नव्यङ्ग्यत्वाभावात्सर्वलिङ्गत्वाच्चेत्यतआह॰ गोत्रञ्चेति॰ शास्त्रीयमत्रगोत्रम् अतएवगोत्राद्यूनिप्रत्ययोभवतिस्त्रियांलुगिति
न्यासेऔपगवीमाणविकेत्यत्राण्योऽनुपसर्जनमित्यनुपसर्जनलक्षणईकारोनप्राप्नोति माभूदेवमणन्तादनुपसर्जनादित्येवम्भ
विष्यतीतिप्रौढापूर्वपक्षिणोक्तंतदङ्गीकृत्यैव॰ इहतर्ह्यौपगवीभार्यः जातिलक्षणपुम्वत्वप्रतिषेधोनप्राप्नोति माभूदेवम्वृद्धिनिमि
त्तस्येत्येवम्भविष्यति। एवन्तर्हिम्लुचुकायनीभार्यइतिदोषइत्येकोगोत्रञ्चेतिसूत्रस्थभाष्येयुवापत्यस्यजातित्वाभावकथनंसङ्गच्छते॰
अन्यथाजातिलक्षणङीषएवपरत्वाद्दृतुयुक्त पुम्वत्वप्रतिषेधोनप्राप्नोतीत्यसङ्गतिश्च॥ ११ नादित्यस्यतदन्तविशेषणत्वेऽनुपसर्ज
नाधिकारस्यैववैयर्थ्यंस्यादितितस्यगृह्यमाणविशेषणत्वमेवेतिभावः। प्रतिषेधोनप्राप्नोतीति॰ एतस्ययुवप्रत्ययान्ततयाशास्त्रीयगोत्रेयःप्रत्य
यस्तदन्तत्वाभावात्॰ नचयःप्रत्ययोगोत्रेउत्पन्नस्तदन्तत्वमस्त्येवेतिवाच्यम्॰ अणन्तादनुपसर्जनादितिभाष्यस्ययःप्रत्ययोयून्युत्पन्नोलुप्तश्च
तमाश्रित्यैवप्रवृत्तन्तथातम्प्रत्ययमाश्रित्यजातित्वंवाच्यमितिभावः। माभूदेवम्॰ जातेश्चेतिप्रतिषेधोमाभूदित्यर्थः। म्लुचुकायनीति॰ प्राचा
मवृद्धादितिफिन्नन्तमेतत्। अन्यथा॰ अपत्यप्रत्ययमात्रग्रहणे॰ असङ्गतिश्चेति॰ जातित्वसद्भावाज्जातेश्चेतिनिषेधप्राप्तेर्जागरूकत्वात्॰

तास्त्वकाण्डमान्तशतिकेभ्यः प्रतिषेधो वक्तव्य इति व्याख्यातम्। एवं व्याख्यानं योपधादित्यस्य सूत्रेऽप्यवर्णान्तयोपधप्रतिषेधे गवयह
येत्यादिना प्रतिप्रसवमतेन कृतम्। यदीदंसूत्रमजात्यर्थमित्येव स्यात्तदाऽस्त्रीविषयादित्यस्य प्रकृतसूत्रेऽपि सम्बन्धात् पूर्वसूत्रस्यास्य चा
प्राप्तेरदन्तत्वाद्ङीषोऽपि सिद्धेस्तदारम्भोऽव्यर्थः स्यादिति भावः। इदमेव च वार्तिकमजाद्यतष्टाबिति सूत्रव्याख्यानावसरे मूलेऽपनिबद्धम्। पूर्व
सूत्रेण पाककर्णेत्यनेन। ननु तित्तिरिः ककुभो लाव इति कोशे ककुभशब्दसाहचर्यात् पुंस्त्वनिर्णयसम्भवान्नास्य स्त्रीत्वमत आह। स्त्री
पुंसयोरिति। इदमुपलक्षणम्। नपुंसकत्वस्यापि। नाडायनन्तपुंसकमिति कोशात्सोपगवकुलमिति प्रयोगस्य च दर्शनात्। अन्यथा नोङ्धा
त्वोरिति सूत्रेऽपि ङकारानुच्चारणे बहुव्रीहाविति। ब्रह्मबन्धुरुपस्यादित्यर्थः। ननु ह्रस्वोकारादूङ्विधानमेवास्तु सवर्णदीर्घेण रू
पसिद्धेरत आह। दीर्घोच्चारणमिति। भाष्ये स्पष्टमिति। तत्र हि किमर्थोऽङ्कारः। विशेषणार्थः। नोङ्धात्वोरिति। नोङ्धात्वोरित्युच्यमाने यवाग्वा
यवाग्वे इत्यत्रापि प्रसज्येत। अथ दीर्घोच्चारणार्थम्। ब्रह्मबन्धूः। वीरबन्धूः। न ह्येतत् श्वेतिकपूः प्रसज्येत। नैष दोषः। नद्यन्तानां यो बहुव्रीहिरि
त्येवं तत्। न चैष नद्यन्तानां बहुव्रीहिः। शेषलक्षणस्तर्हि कप्प्राप्नोति। तस्माद्दीर्घोच्चारणं कर्तव्यम्। अत्र कैयटः। उकारद्वयं दीर्घेण नि
र्दिष्टम्। तत्र द्वितीय उकारः परत्वाद्बाधकस्य शेषलक्षणस्य कपो बाधनार्थमिति भावः। ननु यद्येक एव उकारो विधीयते तदा श्वशुरस्याः
काराकारलोपश्चेत्यनेनोङि कृते श्वश्रूरित्यस्यासिद्धिः स्यादत आह। श्वश्रूरिति त्विति। सिद्धमिति। तथा च तादृशनिर्देशवशादेव तादृशप्रा
प्तबाधको न तु तदर्थं वचनान्तरमिति भाव ॥

मे· न तु स्त्रिया वेदाऽध्ययनेऽधिकाराभावादध्वर्युरित्यसङ्गतमत आह· अध्वर्युशाखेति· यच्छाखाध्ययनेनाध्वर्युत्वम्भवति तच्छाखा
ध्यायिवंशोद्भवेत्यर्थः। ऊतइत्यस्य सम्बन्धे ऽलाबूशब्दाद्दीर्घान्तान्न स्यादत आह· ऊतइतीति· अलाबूरितीति· ऊङि सत्यलाबेत्यत्र नोङ्
धात्वोरिति विभक्त्युदात्तप्रतिषेधः सिद्धो भवति। गुणवाचीभीति· ननु जातिवाचीति शेषः श्वश्रूशब्दावयवाद्याकारस्य लोपाशङ्का
निवारणायाह· श्वश्रेति निर्देशादिति· ऊङाप्सूत्रस्य भाष्यस्वरसत्त्विति· नत्र हि स्त्र्याप्रग्रहणङ्किमर्थन्त्राप्रातिपदिकादित्येव सिद्धमिति प्रश्ने ऽ

कुरूरिति· एकादेशस्य पूर्वान्तवत्त्वात्त्वादयः। अध्वर्युरिति· अध्वर्युशाखाध्यायिवंशोद्भवेत्यर्थः। रज्ज्वादीति· ऊतइ
तित्वनेह सम्बध्यते अलाबूरिति भाष्योदाहरणादिति भावः। कृकवाकुरित्यत्र मनुष्यजातित्वाभावात्पूर्वेणापि न· पङ्गो
श्च· पङ्गुशब्दो गुणवाचीति पूर्वेणाप्राप्तिः। श्वशुरस्येति· श्वश्वेति निर्देशादन्त्याकारस्य लोपः तन्निर्देशसिद्धमेवैतत्भा
ष्येत्विदन्नदृश्यते· ऊङावितिभाष्यस्वरसत्त्वयमनूङन्तो ऽव्युत्पन्नम्प्रातिपदिकमिति· ऊरूत्त· उपमीयते ऽनेनेत्युपमा
उपमानन्तद्भाव औपम्यमुपमानत्वमेवञ्च तद्बोधको यरूत्तरपदादित्यर्थः। उत्तरपदादिति न पूर्वपदम्प्रत्यासत्त्योपमान
॥वाच्येव ॥

प्रत्यय इति प्रातिपदिकसञ्ज्ञाप्रतिषेधः प्राप्नोतीति समाधाने एवं सति न्यूङ्ग्रहणङ्कर्तव्यमिति पुनः प्रश्न इति प्रत्यय
स्य तद्धितत्वात्सिद्धमिति समाधाय ऊङ्न्तादपि पूर्वान्तवद्भावेन सिद्धमित्युक्तम्। श्वश्रूशब्दोपयुङन्तः स्यात्तदानर्थमूङ्ग्रहणस्यावश्य
कत्वेन भाष्येतस्यानुक्तत्वेन न्यूनतापत्तिरतो ऽयमव्युत्पन्न इति कल्प्यत इति· ऊरूत्तरपदादित्यधिकारप्राप्तप्रातिपदिकविशेषणमूरूत्
तरपदादिवहुव्रीहिः। औपम्य इति सप्तम्यर्थो वाचकत्वम्। पूर्वपदस्योपमानवाचकत्वे समुदायस्यौपम्यवाचकत्वसम्भव इत्याशयेनाह·

पा॰शे॰ मै॰ अतः। उपमानवाचकस्य पूर्वपदस्य ग्रहणेन · करभोपमोरुरित्यत्रेति · अत्र पूर्वपदस्योरुशब्दसामानाधिकरण्येनोपमानवाचकत्वा
टी॰भै॰ भावः स्पष्ट एव। यतः पूर्वपदस्योपमानवाचकस्य विवक्षाऽतएवोत्तरपदग्रहणं स्वरितार्थम्। अन्यथोर्वन्तादित्येव वदेत्। उपचारोलक्ष
५८० णासा च प्रकृततावच्छेदकारोपात्मिका तदाह · शाकपार्थिवेति · सनिमित्तमिति · सः। उपमानोपमेयभावः। सहेतेद्रतीति · एवञ्च सहशब्दः सौ
त्रः क्रियाप्रत्ययो न तु साहित्यवाचीत्युक्तं भवति। मूलोक्तं पद्देतिद्वितीयार्थकल्पनमेव सन्मूलमित्याह · सहविद्यमानाविति · सर्वस्यापि वि

अतः करभोपमोरुरित्यत्र न तदाह · उपमानवाचीति · करभेति · मणिबन्धादाकनिष्ठं करस्य बहिर्भागः करभस्तद्वद्रूप
स्यादूरुरित्यर्थः। उपचारादिति · शाकपार्थिवप्रवृत्तिनिमित्तस्योरुपदार्थे आरोपादित्यर्थः। एवञ्चोपमानस्योपमानोपमेयभा
वाबोधकत्वेन न पूर्वसूत्रप्राप्तिस्तदारोपे च सनिमित्तमित्यन्यदिति भावः। ननु सहशब्दग्रहणं व्यर्थं सर्वस्योरुमत्त्वे
न सहशब्दप्रयोगस्य तत्समभिव्याहारे व्यर्थत्वेन सहोरुरिति प्रयोगस्यैवाभावादत आह · सहेतेति · रतिश्रममिति पोषः
। सहविद्यमानावुरू यस्या इत्यर्थ इति कैयटः। अतिरमणीयावित्यर्थ इति तदाशयः। कमलानि कमलानीतिवत् · कद्रूरि

द्यमानोरुपमत्वेन विशेषणवैयर्थ्यशङ्कानिवारणायाह · अतिरमणीयावित्यर्थ इति · तत्रदृष्टान्तमा॥ति · नागमातुः सञ्ज्ञा।
ह · कमलानीति · तदाजायन्ते ते गुणा यदा सहृदयैर्गृह्यन्ते। रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि। अत्र च शुद्धक
मलत्वमुद्देश्यतावच्छेदकम्। शोभादिगुणयुक्तकमलत्वावच्छिन्नस्य विधेयत्वमिति नोद्देश्यतावच्छेदकविधेयतावच्छेदक
योरेकत्वाच्छाब्दबोधानुपपत्तिरिति। लोके कद्रूरिति कस्य बोधकमत आह · नागमातुरिति · कमण्डलुशब्दवत्तु स्याज्जातिवचन

अत एव चतुष्पाद्भ्यो ढञिति सूत्रस्य काम
ण्डलेय इत्युदाहरणसङ्गतिः ॥

मै पिनह्यतिः। द्रव्येणेति तु सहार्थयोगे तृतीया। लक्षणान्तरत्वमस्मन्निराचष्टे। अत्र लक्षणद्वयमिति। अत एव पूर्वोक्तस्याप्येकलक्षणत्वादेव एकवच
नमेवेत्यनेन स्वव्याख्योपोद्बलीकरणम्। अत एव पूर्वस्यैकलक्षणत्वादेव ॥ एतेन अस्त्रीविषयादित्यस्य पूर्वोक्तकारणेन अपास्तमिति सर्व
त्रवितकणिकात्वजातेः प्रवृत्तिनिमित्तत्वाभावान्नानुपपत्तिरिति भावः। अत एव अस्त्रीविषयादित्यस्य पूर्वोक्तार्थाश्रयणादेव। बहुपुष्पेति यौ

बलाकेति अयमत्र विप्राकणिकापदवाच्यजातिविशेषवाची तत्र च बकत्वव्याप्योऽन्यो वा द्वयमन्यत् अस्त्रीविषयादित्यस्य
प्रवृत्तिनिमित्तैके लिङ्गान्तररहितमित्यादिरित्यर्थः। एतेन बलाकायतीति यौगिकस्य सर्वलिङ्गत्वाद्बलाकाबकपंक्तिः स्याद्ब
लाकाविप्राकणिका बलाकाकामुकी मौक्ता बलाकस्त्वबकोमतद्वति कोषे पुंलिङ्गस्याप्यभिधानाच्च नेदं युक्तमित्यपास्त
म्। अत एव पाककर्णेति सूत्रं चरितार्थम्। न हि स्त्रीविषयार्थम्। अन्यथा तेषामपि यौगिकेष्वलिङ्गान्तरसम्भवेन पूर्वे
णासिद्धेन द्वैयर्थ्यं स्पष्टमेव। पाककर्ण जा तिवाचिनः किम्। बहुपुष्पा पुष्पा वा स्त्रीविषयादपीति। अजात्यर्थं नतु नभाकृपु
ष्पादिषु जातिवचनेषु नित्यस्त्रीलिङ्गेषु सदच्कूकाण्डेत्यादिनिषेधात् योपधादपीति। पुनर्जातिग्रहणादिति भावः। अस्त्रीवि
षयादिति पूर्वसूत्रेणाविच्छिन्नम्। तितिरिणिः स्त्रीपुंसयोरपत्यान्ताद्द्विचतुः षट्पदोरगाद्यत्यमरादयं स्त्रियामपीति भावः। ऊतः
किम्। दूरतः अगपेत्यणोऽनन्तरस्तिलुक्। ड्ड्डुः ऊतः। ककारोनोऊ धात्वोरिति विशेषणार्थः। अन्यथा यवागवेत्यादावपि निषेधः
स्यात्। दीर्घोच्चारणमश्लेषेणोकारद्वयविधानद्वारा भ्रूरित्यादि बहुव्रीहौ परकप्निवृत्त्यर्थम्। रूपाणां सवर्णदीर्घेणासि
द्धेरिति भाष्ये स्पष्टम्। श्वश्रूरिति तु श्वशुरः श्वश्रूरिति निर्देशात्सिद्धम्॥ ११ गिकोयम्। नतु जातिप्रवृत्तिनिमित्तकः। ननु पाककर्णेतिसू
त्रस्याभावे प्राप्नोति जात्यर्थमेन सूत्रमित्यपि वक्तुं युक्तम् अत आह अजात्यर्थं न्विति निषेधादिति तस्योङीषु बाधनार्थमारम्भात्॥ एत

रध्या

श॰ को॰ भै॰ नरशब्दान्त्याकारस्यलोपेनापहारेऽलोन्त्यपरिभाषयाऽन्त्यस्यरेफस्यवृद्धिः स्यादत आह॰ अत्राद्येति॰ व्याख्यानादिति॰ नरः अः नरः कतभ
नवस्यरूपम्। नाचनरश्चेतिद्वन्द्व इतिच्यांनादिरित्यर्थः॥ अनार्षमिति॰ तत्रादर्शनात्। आद्यदात्तस्यरूपस्यत
टी॰ भै॰ हिकथंसिद्धिरत आह॰ नुर्नरस्यचेति॰ योगार्थमादायान्यत्रास्यप्रवृत्तिंवारयति॰ रूढ्येति॰ अतएव रूढिस्वीकारेऽर्थभेदाभावादेव॰ उदीचाम्मतइ
३८१ ति॰ प्राचाम्मतेष्फस्यसत्त्वादाह॰ उदीचाम्मत इति॰ सः। गौकक्ष्यशब्दः। नपाठ्य इति॰ ष्यङ्प्रत्ययस्तत्रपाठेभवति ततोपङ्श्चावितिचाप्रूयते

अत्राद्याकारस्यैववृद्धिर्लक्ष्यानुसारिव्याख्यानात्॰ वस्तुतस्तदङ्गेणसूत्रमनार्षम्। नुर्नरस्यचधर्म्योनारीति॰ ऋतोऽञितिसूत्रेणन
रस्यचेतिवक्तव्यमितिवार्तिकेनचाद्युदात्तनार्योःसिद्धेः। रूढ्यायोगस्तयाचतद्धर्म्यानरत्वजातिविशिष्टैवबुध्यते॰ अतएव
वसेस्तव्यत्कर्तरिणिच्चेतिवचनंवास्तुनिभवोवास्तव्य इतिदिगादित्वात्संसाध्यप्रत्याख्यातम्भाष्ये नित्यानांशब्दानांप
थाकथञ्चिदन्वाख्यानङ्कार्यमितिकैयटः। रूढ्यासर्वदोषपरिहार इतितदाशयः। पङ्श्चाप्॰ पकारोपाडाप इतिसामा
न्यग्रहणार्थः। चकारस्यद्व्यनुबन्धत्वसम्पादनद्वारासामान्यग्रहणविघातकत्वेनचारितार्थ्येपिआम्बष्ठ्याआवट्येत्यादौ
परत्वाच्चित्स्वरःपित्स्वरम्बाधत इतिबोध्यम्॰ प्राच्यञ्ज इति॰ एवञ्चगौकक्ष्यशब्दस्यगर्गादियञन्तस्योदीचाम्मतेनैवचापः
सिद्धेःसक्रोड्यादिषुनपाठ्यः। सम्प्रसारणन्तुतस्यनेष्टमितिस्पष्टम्भाष्ये॰ पूनञ्छिः। ऋन्नेभ्य इतिङीपोऽपवादः। उत्तरार्थ
इति॰ इहकरणन्तदनित्यत्वज्ञापनार्थमितिकेचित्॥ ॥ इतिस्त्रीप्रत्ययाः॥ ५ सचाधुनाषाद्यञ इत्यनेनसिद्ध इतिभावः। न
नुगौकक्षीपुत्र इत्यत्रष्यङः सम्प्रसारणमितिसम्प्रसारणन्नस्यादत आह॰ सम्प्रसारणन्त्विति॰ नेष्टमिति॰ तदुक्तम्भाष्ये। षाद्यञश्चापवक्त
व्यः। शार्कराक्ष्या। पौतिमाष्या गर्गादियञन्ता एत इतिकैयटः। तत्रायमप्यर्थः। गौकक्ष्यशब्दः क्रौड्यादिषुपठ्यतेसनपठितव्योभवति। यदि

नपठ्यतेगोकर्ष्यापुत्रइतिसम्प्रसारणन्नप्राप्नोति। इष्टमेवैतत्सङ्गृहीतम्। गोकक्ष्यापुत्रइत्येवंभवितव्यम्। एवंहिसौनागाः पठन्तिष्यङः सम्प्रसा
णे·रणेगोकक्ष्यायाः प्रतिषेधइति। नन्वस्यतद्धिताधिकारस्योत्तरार्थत्वेइहकरणमव्यर्थमतआह· इहेति· केचिदिति· घठघटीग्रहणेनैवतदनित्यत्व
स्यसिद्धेरिदमपिप्रयोजनमन्यथासिद्धमित्यरुचिः॥ इतिश्रीमहामहोपाध्यायभैरवमिश्रविरचितायांलघुशब्देन्दुशेखरव्याख्यायाञ्चन्द्र
कलाख्यायांस्त्रीप्रत्ययप्रकरणंसमाप्तम्॥ ॥ ओंश्रीगणेशायनमः॥ ज्ञानानन्दमयन्देवञ्ज्ञानकीवल्लभंविभुम्। आधारंसर्वविद्यानांश्री
रामंसमुपास्महे॥१॥ अथस्त्रीप्रत्ययानाम्प्रातिपदिकप्रकृतिकत्वात्स्वादीनामपितथात्वात्तेषामपिनिरूपणमावश्यकमितिप्रसङ्गसङ्गत्यातदर्था
न्निरूपति· स्वौजसमौडिति· प्रथमापानकारकविभक्तित्वमितिवादिमतन्दूषयितुमुपक्रमते। इदमपीति· क्रियायोगश्चनसाक्षात्कारकत्वप्रयोजकः॥

स्वौजसमौडितिविहितस्वादीनामर्थ विशेषव्यवस्थान्दर्शयितुमाह· प्रातिपदिकार्थेति· इदमपिसूत्र
क्रियायोगएवप्रवर्तते· नतोऽस्तिक्रियायाः सर्वत्रसत्वात्· आख्यातार्थकर्त्रादिनाऽभेदान्वयेनतद्द्वारकः क्रियायोगोवो
ध्यः। प्रथमान्तार्थस्यापिक्रियाजनकत्वादस्याः कारकविभक्तित्वेनभाष्येव्यवहारः। ननुकृष्णादिशब्देलिङ्गस्यापिप्रातिपदि
कार्थत्वाल्लिङ्गग्रहणमनर्थकमतआह· नियतेति·॥ ॥ किन्तुसाक्षात्परम्परासाधारणः। साक्षाद्यथाकर्मादीनाम्। परम्पर

यायथाधिकरणेकारकस्य· एवम्प्रथमान्तस्यापि। साचक्रियायत्रक्रियावाचकम्पदम्प्रयुज्यतेतत्रचैत्रः पचतीत्यादौतदर्थभूतैव। यत्रतुनप्रयुज्य
तेघटः पटइत्यादौतत्रास्तिर्भवतिपरोऽप्रयुज्यमानोऽप्यस्तीतिन्यायेनगम्यमानास्तिक्रियायामेवान्वयः। सचप्रत्ययार्थकर्तृकर्मादिद्वारा। अतए
वतिङ्समानाधिकरणेप्रथमेतिवार्तिकसङ्गतिः। कारकविभक्तित्वञ्चक्रियाजनकार्थकविभक्तित्वम्। इदमपीत्यपिनाकारकाधिकारीय
सञ्ज्ञाप्रयोज्यसर्वविभक्तिसङ्ग्रहः। भाष्ये· अनभिहितपादे। कृष्णादिशब्देष्विति· वाचकतासम्बन्धेनस्थितमितिशेषः। प्रातिपदिकार्थत्वादिति

श·शे· भै॰ प्रातिपदिकजन्योपस्थितिविषयत्वं हि प्रातिपदिकार्थत्वं न च लिङ्गस्याप्यस्तीति भावः। अत्रोपस्थितिनिष्ठकार्यतायाः अवच्छेदकः सम्बन्धोऽवच्छेद
टी·भै· कता। प्रातिपदिकनिष्ठकारणतायास्तु स्वविषयकज्ञानावच्छेदकत्वम्॥ ॥ यस्मिन्निति· न च सामग्र्यन्तराभावे प्रातिपदिकमात्रोच्चारणेन क
३८२ स्याप्यर्थस्योपस्थितिर्न भवतीति प्रातिपदिकजन्योपस्थितिकत्वं न कस्यापीति वाच्यम्· स्वस्वव्याप्येतरयावत्कारणसत्त्व इत्यस्यापि पूरणात्· स्वम् प्राति
कम् तद्व्याप्यत्वं दीपसम्बन्धः। ताभ्यामितरद्यावत्कारणमित्यर्थः। प्रातिपदिकजन्यनियतोपस्थितिकत्वञ्च प्रातिपदिकोच्चारणकालानन्तरकालव्यापको

यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स तदर्थ इत्यर्थः। अन्वयानुपपत्तिपूर्विकालक्षणापदे एव प्रत्ययो त्पत्तिः सर्वत्र शक्यार्थ एव शक्यतावच्छेदकारोप एव च लक्षणेति न लक्ष्यासङ्ग्रहो दोषः। तटादिशब्दानान्तु तत्प्रत्ययसमभिव्याहारे सकललिङ्गबोधकतया न किमपि लिङ्गन्ततो नियतोपस्थितिकमिति न तद्बोध्यलिङ्गस्यात्र प्रातिपदिकार्थशब्देन ग्रहणमिति लिङ्गग्रहणमिति भावः। लिङ्गमात्रेति· लिङ्गस्यैवाधिक्ये इति क्रमेणार्थः। यद्यपि विशेष्यविशेषणभावोऽप्यधिको भासते तथापि तस्य वाक्यार्थत्वेन बहिरङ्गतया न स्वार्थमात्रनिमित्तकप्रथमप्रवृत्तसंस्कारबाधकत्वमिति बोध्यम्॥ ॥

पस्थितिविषयत्वम्· कालश्च प्रातिपदिकोच्चारणानन्तरं यावत्क्षणसमूहेनार्थाभिव्यक्तिर्भवति तावान्समुदायः। नन्वेतादृशप्रातिपदिकार्थत्व ञ्चैर्वाहीक इत्यादिलाक्षणिकस्थले न कस्यापि वाहीकाद्यर्थस्येति तत्र प्रथमायाः साधुत्वन्न स्यादित्यत आह· अन्वयानुपपत्तीति· पदे एव· सु बन्ते एव· न लक्ष्यसङ्ग्रह इति· एवञ्च मुख्ये स्वशक्ये एव तेषां साधुत्वं पश्चात्पदान्तरार्थसम्बन्धवेलायामन्वयतात्पर्यान्यतरानुपपत्तिप्रतिसन्धा नन्तरं स्वशक्यतावच्छेदकारोपात्मिका लक्षणेति भावः। लिङ्गग्रहणसार्थक्यमाह· तटादिशब्दानामिति· सूत्रे मात्रशब्दोऽवधारणे तस्य च प्रत्येकं

भै· पात्रवाचीतु नस्त्रीलिङ्गः। अत्र इत्यस्याकारविशेषणत्वं शार्ङ्गरवादेस्तु नेति हन्तानुपपत्तिरत आह· शार्ङ्गरवीतीति· अस्य· अत्र इत्यस्य एवं
टिड्ढेत्यत्रापीति· तस्य षष्ठ्यन्तत्वेऽनुपसर्जनादिति विभक्तिविपरिणामेन तद्विशेषणम्। विनिगमनाविरहादाह· तदत्रेति· अत्रोऽकारविशेष
णत्वे फलम्। शूरसेनीति· जनपदशब्दात्क्षत्रियादित्यञोऽतश्चेति लुकि जातिलक्षणो ङीष्। तेनान्तोदात्तम् पदम्। शार्ङ्गरव्याः साधुत्वमाह· अ
अण्यादीति· शृङ्गरुशब्दादपत्येऽणि आदिवृद्धौ वोर्गुणेऽणन्ताच्छार्ङ्गरुशब्दप्रकृतिकान्ङीष्युदात्तनिवृत्तिस्वरेणान्तोदात्तत्वम्। यदि तु गोत्रेऽ

अन्त्योदात्तेऽयमिति· छन्दसि तु कद्रुकमण्डल्वोश्छन्दसीत्यनेनैव सिद्धिरिति भावः। अञो य इति· शार्ङ्गरवादीति लुप्तप
ञ्चम्यन्तम् अञ इति च षष्ठी· अनुपसर्जनादिति विभक्तिविपरिणामेनास्य विशेषणमेवं टिड्ढेत्यत्रापि सुवचम्· तदत्रप
ञ्चम्यन्तत्वमपि सुवचम्· अञ्योऽकार इत्यपि पाठः क्वचित्। शार्ङ्गरव्यो जातिलक्षणे ङीषि प्राप्ते वचनम्· अण्यादिवृ
द्धिगुणौ। पुत्रशब्दोऽत्र पठ्यते तस्य पाठसामर्थ्याज्जातित्वाभावेऽपि ङीन्· नृनरयोरिति· यद्यपि नारीति नृशब्देन सिद्धं न
रीति पुंयोग ङीषा दुर्वारम्· जातिग्रहणानुवृत्त्या तत्रास्याः प्रवृत्तेरिति नरग्रहणं व्यर्थम्· तथापि नरत्वजातिमात्रप्रतिपि
पादयिषायां नरीति स्यादित्यर्थं नरग्रहणम्॥ ननु तदा जातिलक्षणो ङीष् परत्वान्ङीनं बाधित्वा स्यात्तथापि प्रत्ययस्वरेणान्तो
दात्तत्वमतो ङीनाद्युदात्तत्वसिध्यर्थं विधीयत इति। सामर्थ्यादिति· पुत्रशब्दस्य पाठसामर्थ्यादित्यर्थः। नृनरयोरिति गणसूत्रे नरश
ब्दोपादानस्य प्रयोजनं वक्तुं शङ्कते· यद्यपीति· नरीति प्रयोगनिवृत्तिरेव प्रयोजनमस्त्वित्यत आह· नरीति त्विति· जातिमात्रेति· अत्र
मात्रपदेन पुंयोगव्यावृत्तिः। पुंयोगे तु नरीतीष्यत एव· अत एव किन्नरीणां नरीणामिति प्रयोगोपपत्तिः॥ ॥ ॥

भै॰ विभक्तिर्नस्याद्यथा नहि भवति घटोस्ति कलश इति। नन्वेकत्वविशिष्टे एकत्वान्तरान्वयायैकवचनमस्त्वित्यत आह॰ प्रातिपदिकेति॰ सङ्ख्या
न्तरेति॰ प्रकृत्यर्थनाऽर्थतावच्छेदकातिरिक्तसङ्ख्यान्तरेत्यर्थः॥ ❀ ॥एकादिशब्दात्तर्हि द्विवचनादिकमुत्पद्यतामित्यत आह॰ अनन्वितार्थकेति॰
सर्वविभक्त्यापत्तिरिति॰ सर्वप्रथमापत्तिरितिभावः। ननु हिमानी इन्द्राणीत्यादौ कथम्प्रथमा महत्त्वपुंयोगादेराधिक्यादित्यत आह॰ लिङ्गविशिष्टप॰
रिभाषयेति॰ प्रातिपदिकार्थमात्र इत्यत्र प्रातिपदिकपदम्प्रातिपदिकप्रकृतिकलिङ्गबोधकप्रत्ययस्यापि बोधकमिति यस्माल्लिङ्गबोधकप्रत्य
यात्प्रथमोत्पत्तिरभिप्रेता तज्जन्यनियतोपस्थितिको योर्थो विवक्षितः सच प्रकृते नास्तीतिभावः। उन्मानादिष्वपीति॰ पलम्सुवर्णमित्यादौ।

अनन्वितार्थकविभक्त्यपेक्षया नुवादकविभक्तेरेवन्याय्यत्वान्न द्यादिभ्यः सर्वविभक्त्यापत्तिरितिभावः लिङ्गविशिष्टपरिभा
षयेन्द्राणीत्यादौ प्रथमासिद्धिः परिमाणशब्दश्च परिच्छेदकपर इत्युन्मानादिष्वपि प्रथमासिद्धिरिति बोध्यम्॰ परे त्वत्र सूत्रे प्रा
तिपदिकार्थशब्देन प्रवृत्तिनिमित्तन्तदाश्रयश्च स च मुख्य इवारोपिततदाश्रयोपि॰ अतएव गोपीत्यादौ स्वादिप्रकृतेर्लाक्षणिक

नच प्रातिपदिकेन स्वार्थस्योक्तत्वात्तत्र कथम्प्रथमेति वाच्यम्॰ प्रातिपदिकार्थे प्रथमाविधानसामर्थ्येन तत्रोक्तार्थानामिति ((त्वेपि न दोषः
न्यायाप्रवृत्तेः। यथा पञ्चकम्प्रातिपदिकार्थ इति पक्षे कारकस्य प्रातिपदिकार्थत्वेपि तत्र द्वितीयादीनां विधानमन्यथा विभक्तिरहितस्य प्रयो
गः स्यात् सचनकेवलेत्यादिवचनबाधितो नापि तेभ्यः कर्मादिप्रतीतीति॰ कस्यापि भवति तथा प्रातिपदिके न तदर्थे प्रतिपादितेपि प्रथमाभवतीति
प्राचीनमतनिगर्वः। स्वसिद्धान्तमाह॰ परे त्विति॰ प्रवृत्तिनिमित्तमिति॰ यस्माच्छब्दात्प्रथमाविभक्तिविधानन्तत्तच्छब्दप्रवृत्तिनिमित्तमित्यर्थः
स च तदाश्रयश्च॰ आरोपिततदाश्रयः। प्रवृत्तिनिमित्तप्रकारकारोपविशेष्य इत्यर्थः। अतएव॰ आरोपिततदाश्रयग्रहणादेव॰ लाक्षणिकत्वेपि॰

मे· अतएव प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थपदेन ग्रहणादेव· प्रातिपदिकार्थतया· प्रातिपदजन्योपस्थितिविषयार्थतया· तद्वैयर्थ्यम्· लिङ्ग·ग्रहणवैयर्थ्यम्। अतएव· लिङ्ग·स्य प्रातिपदिकार्थत्वादेव· सिद्धान्तितमिति· स्त्रीत्वस्य प्रातिपदिकवाच्यत्वे हि स्त्रीप्रत्ययस्य तद्द्योतकत्वं युज्यते· पुंशब्दस्य प्रकृतित्वे इति [illegible]· पुंवाचकशब्दस्य प्रकृतित्व इत्यर्थः। एतेन पुंसि विद्यमानस्य ग्रास इति नार्थ इति सूचितम्· वार्तिकविरोधशङ्कां वारयति· अभिहित इति· एतेन· उक्तव्याख्यानेन। तन्नये· वार्तिकमते। लिङ्ग·ग्रहणसार्थक्याय भूमिकामारचयति· तदादिशब्द

अतएव लिङ्ग·ग्रहणं सार्थकम्। अन्यथा स्वमोर्नपुंसकादित्यादिशास्त्रप्रामाण्येन लिङ्ग·स्यापि प्रातिपदिकार्थतया तद्वैयर्थ्यं स्पष्टमेव· अतएव स्त्रियामिति सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थ इति भाष्ये सिद्धान्तितम्· तस्माच्छस इत्यत्र पुंसीत्यस्य पुंशब्दस्य प्रकृतित्वे इत्येवार्थः। अभिहिते प्रथमेति वार्तिकस्य तन्न प्रातिपदिकार्थगतकारकशक्तावन्येनाभिहितायां स्वार्थे प्रातिपदिकात्प्रथमेत्यर्थ इति न तद्विरोधः। एतेन तन्नये कारकस्य प्रत्ययार्थता तत्र तु तन्नेति विरोध इत्यपास्तम्· तदादिशब्दानामपि लिङ्गं· वाच्यमेव द्योतकास्तु विसर्गादयः पूर्वं तत्तल्लिङ्गस्य बुद्धिस्थीकृतत्वैव तस्य विसर्गादेः साधुत्वान्वाख्यानं नियमांशनिवेशात्तु न मानम्।। ॥ ॥

नामपीति· यदि प्रातिपदिकजन्योपस्थितिविषयस्यैव प्रातिपदिकपदेन ग्रहणं स्यात्तदा लिङ्ग·स्यापि तदादिशब्दजन्योपस्थितिविषयतया प्रातिपदिकार्थपदेन तेभ्यः प्रथमासिद्धौ लिङ्ग·ग्रहणमनर्थकं स्यादिति भावः। ननु लिङ्गं न तत्तो नियतोपस्थितिकमत आह· नियमांशनिवेशात्त्विति· अतएव अलिङ्गा लिङ्ग·प्रवृत्तिनिमित्तकाश्च प्रातिपदिकार्थमात्रे इत्यत्र तदुदाहरणत्वेन प्रातिपदिकार्थे किमुदाहरणमिति प्रश्ने स्त्री पुमान्नपुंसकमित्येते दर्शिताः। अन्ये लिङ्गाधिकार इत्यस्य।।

प्रा·प्रे· मै· अत्रैवार्थे वृत्तिकारसम्मतिमप्याह· इत्थमेवेति· प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थपदेन ग्रहणस्याभिप्रेतत्वादेव· अव्ययपुमाद
टी·मै· यइति· अव्ययस्य प्रातिपदिकार्थ इत्येतदुदाहरणे प्रमाणन्तु प्रातिपदिक ग्रहणङ्कि· मर्थम्। उच्चैर्नीचैरित्यत्रापि यथा स्यादिति भाष्यमेव। अन्ये
३५४ सर्वे इति· कुलारयः। तत्र लिङ्ग प्रतीतेराधिक्यात्। एवं खट्वादिशब्दानामपि लिङ्ग· प्रवृत्तिनिमित्तकत्वाभावेन लिङ्गाधिक्य इत्येतदुदाहरणत्वमेवाप
रिमाणग्रहणचारितार्थ्यमाह· द्रोणत्वादिप्रवृत्तीति· लिङ्ग वदिति· यथा कुलादिशब्दजन्यप्रतीतिविषयस्य लिङ्गस्य विशेषणतया भानन्त

इत्थमेवाभिप्रेत्य वृत्तौ प्रातिपदिकार्थः सत्तेत्युक्तं सत्तेति प्रवृत्तिनिमित्तोपलक्षणम्। आश्रयस्तु तदाक्षिप्तत्वान्न पृथगुक्तः
एवञ्च प्रातिपदिकार्थ इत्यस्यालिङ्गा लिङ्ग प्रवृत्तिनिमित्तकाश्चाव्ययपुमादय उदाहरणम्। लिङ्ग विशिष्टपरिभाषया स्त्री
शब्दोप्यस्यैवोदाहरणम्। अन्ये सर्वे लिङ्गाधिक्य इत्यस्य द्रोणत्वादिप्रवृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन परि
माणमपि लिङ्ग वद्विशेष्यान्वय्यर्थः। एवञ्च तस्य लिङ्ग वत्प्रातिपदिकार्थत्वाभावात्परिमाणग्रहणम्· द्रोणः परिमाणमित्ये

था द्रोणः खारी आढकमित्यादिशब्देभ्यः परिमाणभिन्नो द्रोण इत्याद्याकारो बोधो भवतीति द्रोण (( यत्तु द्वौ ब्राह्मणाविति वन्नयोगः।
दिशब्दजन्यप्रतीतौ परिमाणस्याधिकस्य भानमतः ~~परिमाणभिन्नो द्रोण इत्याद्याकारो बोधो भवतीति द्रोणादिशब्दजन्यप्रतीतौ परिमाणस्या~~
~~धिकस्य भानमतः~~ परिमाणग्रहणमिति भावः। द्रोणत्वादिकमखण्डोपाधिर्जातिविशेषो वा। तच्च यत्ताविशेषावच्छिन्न ~~परिच्छि~~
~~न्न~~ पलादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमानाधिकरणम्। काकादिवाचकस्य तु लिङ्गाधिक्य इत्येतदुदाहरणत्वमेव· ननु परिमा
णमपि पदि द्रोणादिशब्दार्थस्तदा द्रोणः परिमाणमिति सह प्रयोगानुपपत्तिरत आह· द्रोणः परिमाणेति· सम्भेदेनान्यतरवैयर्थ्यमितिन्याया

सम्बन्धइत्याशयेनाह· लिङ्गस्यैवाधिक्यइति· नन्वेवन्नीलोघटइत्यादावपिनियतत्वांशनिवेशेप्रथमानस्यात्।विशेष्यविशेषणभावस्याधिकस्यभा
नेनमात्रपदेनव्यवच्छेदादित्याशयेनशङ्कते· यद्यपीति·संस्कारेति·प्रथमाहल्पः॥ ॐ ॥योप्यभेदोभासतेसोपिविशेष्यविशेषणभावान्नातिरिक्तः।
एवंसत्ययंवाक्यार्थएव।विशेष्यविशेषणभावःपरंद्विविधः।यत्रभेदःसंसर्गतयाभासतेतत्रतत्सम्बन्धावच्छिन्नः।समानविभक्तिकनामार्थयोर्यत्रा
न्वयस्तत्रेतरसम्बन्धानवच्छिन्नः।नचैवङ्घटम्पश्यतीत्यादावपिप्रथमापत्तिः।कर्मत्वस्यक्रियासापेक्षत्वेनतस्यवाक्यार्थत्वादितिवाच्यम्· ए
वंसतिकर्मणिद्वितीयेत्यादिसूत्राणांवैयर्थ्यापत्तेः।प्रातिपदिकपरदेशस्यप्रथमयाऽवरुद्धत्वादतस्तासांस्वविषयेवाधकत्वमुपेयमितिभावःनसं
सर्गइति·राहोःशिरइत्यादावौपाधिकभेदमादायषष्ठ्युपपादनपरभाष्यप्रामाण्येनतस्यसंसर्गत्वाभावकल्पनात्·अन्यत्रमञ्जूषादौ·नचद्रोणे

अभेदेनसंसर्गेणेति· इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावसंसर्गेणेत्यर्थः।अभेदस्तुनसंसर्गइत्यन्यत्रप्रपञ्चित
म्·इहोक्तार्थत्वादिति·उक्तार्थानामप्रयोगात्·प्रातिपदिकप्रतिपादितसङ्ख्याविशिष्टसङ्ख्यान्तराभावाच्चतदप्राप्तिः।

व्रीहिरित्यत्रप्रातिपदिकार्थएवप्रथमास्तुतस्यचपरिच्छेद्यपरिच्छेदकभावसम्बन्धेनव्रीहावन्वयोस्त्वितिवाच्यम्·समानविभक्तिकनामार्थ
योर्भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्।अन्यथाराजपुरुषइतिवाक्याद्भेदसम्बन्धेनान्वयबोधापत्तेः।नचयदिपरिमाणमात्रेप्रथमापरिमाणस्य
चप्रत्ययार्थतयापरिच्छेद्यपरिच्छेदकत्वभावसम्बन्धेनान्वयस्तदाद्रोणोव्रीहिमानयेत्यपिप्रयोगःस्यादितिवाच्यम्·प्रातिपदिकार्थसाहचर्येण
परिमाणमात्रेप्रथमापियत्रसमानविभक्तिकनामान्तरार्थेऽन्वयविवक्षातत्रैवनान्यत्रेतिकल्प्यतेइत्यभिमानात्।अतएवलिङ्ग·समानाधि
करणेप्रथमेतिवार्तिकविरोधोन· उक्तार्थत्वादिति·एकत्वादिष्वर्थेषुविभक्तिर्विधेपातेचार्थाःप्रकृत्यैवप्रतिपादिताइतितेषामभिधानाय

तच

प्रा॰ शे॰ भै० ४परिमाणमात्रविषयकप्रतीतिजनकत्वप्रथमेत्यस्य द्रोणः खारी त्याद्युदाहरणमिति कथं लिङ्गसङ्ख्याभ्यः प्रतीतिरिति वाच्यम् परिमाण
टी॰ भै॰ भिन्नत्वे सति प्रातिपदिकार्थलिङ्गान्यतरभिन्नोपस्थितविषयकत्वस्य प्रतीतिविशेषणत्वात् । ननु प्रातिपदिकेन प्रातिपदिकार्थस्योक्तत्वेपि प्रा
३८५ तिपदिकार्थे प्रथमेति वचनसामर्थ्यात्तदर्थगतसङ्ख्याया अनभिहितत्वमादाय प्रथमा । एकादिशब्दस्थले तु सङ्ख्याप्यभिहितेति प्रथमा
न स्यात् । परिनकेवलेति समयपरिपालनायाव्ययेभ्यस्त्वप्रथमेति भूषे तदेकादिशब्देभ्यो द्विवचनबहुवचनयोरप्यापत्तिरत आह एको द्वावि

नियमांशनिवेशमानाभावाच्च एको द्वावित्यादिसिद्धये तु वचनग्रहणम् । अन्यथैतत्सूत्रोपस्थितानभिहितत्वस्यात्र क
लाभावादेतदेकवाक्यतापन्नसङ्ख्यावाक्यान्वयित्वेन तद्दशा तेः । रामा वि॰ ॥ विसर्गादौ सङ्ख्याधिक्ये प्रथमा तु द्व्येकयोरि
त्याद्येकवाक्यतयेति बोध्यम् मात्रग्रहणं तु यथा कर्मणि द्वितीयेति नियमेन कर्मत्वाज्ञानसमानकालिकार्थान्तरस्येव व्या
वृत्तिर्न तु तज्ज्ञानसमानकालिकार्थान्तरस्यात एव गामित्योऽधिपय इत्यादावपादानत्वादिबोधेपि द्वितीया ॥ ॥

त्यादीति सङ्ख्यावाक्यान्वयित्वेन प्रातिपदिकस्यानभिहितत्व इत्यर्थः पूर्वोक्तरीत्यावक्तुमशक्यः किन्तु तदर्थगतसङ्ख्यायामनभिहितायामि
त्येव वाच्यमेवं सति तादृशवाक्यस्यान्यत्र चरितार्थत्वादेको द्वौ त्रय इत्यत्र न स्यादिति भावः । नन्वेवं रामा वित्यादौ प्रथमा न स्यात्तेषु लिङ्गाधिक्येपि त
न्मात्राधिक्याभावादत आह रामा वित्यादाविति सङ्ख्याधिक्येति सङ्ख्याधिक्यविवक्षायामित्यर्थः । लिङ्गमात्राधिक्येपि प्रातिपदिकार्थग
तद्वित्वादेर्विवक्षित इत्यर्थः न च राम इत्यत्र सङ्ख्याधिक्यसत्त्वात्प्रथमा न स्यादिति वैकवचनं तस्य पुरःस्फूर्तिकत्वात्कुतो न शङ्कितेति वाच्यम्

मे॰ द्व्येकयोरितिसूत्रस्थैक शब्दस्यप्रत्याख्यानेनादोषात् सौत्रमात्रग्रहणप्रयोजनमाह॰ मात्रग्रहणन्त्विति॰मात्रग्रहणाभावेत्वितिपाठः॥ ॥
अस्यइतिनियमःस्यादित्यनेनान्वयः। कर्मण्येवद्वितीयेत्येवंविधनियमेन ।यत्रकर्मत्वाज्ञानन्तत्रैवद्वितीयाव्यावर्त्तितइत्यभिप्रायेणाह॰ यथाकर्मभ
णीत्यादि॰ कर्मत्वाज्ञानसमानकालिकस्या कर्मत्वाभावसमानाधिकरणस्या अर्थान्तरस्य॰ तृतीयादिप्रयोजककरणत्वादेः। अपादानत्वादिवा
धेपीति॰ गान्दोग्धीपयइत्यत्रान्तःस्थितद्रवद्रव्यवृत्तिविभागानुकूलव्यापारानुकूलव्यापारोर्थइतिस्वीकारेतद्योगेऽपादानसञ्ज्ञाकर्मसञ्ज्ञयोःप्रा
प्तावपादानमुत्तराणिकारकाणिबाधन्तइत्याकडारेतिसूत्रस्थभाष्योक्तरीत्यास्थितकर्मत्वमादायद्वितीयायथाभवतीतिभावः। दार्ष्टान्तिकेया

एवञ्चकर्मणिसत्येवद्वितीयानतुतदसत्वेइतिनियमाकारस्तथानेनापिप्रातिपदिकार्थसत्वेएवप्रथमानतुतदसत्वेइ
त्येवनियमःस्यात्॰ एवञ्चानर्थकनिपातेभ्यःप्रथमानैवस्यात्॰ एवञ्चतत्समभिव्याहारेसपूर्वायाःप्रथमेत्यादिशास्त्रप्रवृ
त्तिर्नस्यात्॰ तत्सत्वेकर्मादियोग्यार्थकप्रातिपदिकाच्चेत्तद्विहितस्वार्थेइत्यर्थान्नदोषः॥ १जयति।तथाऽनेनापीति॰ प्रातिपदिका
र्थइतिसूत्रेणापीत्यर्थः प्रातिपदिकार्थसत्वएवप्रथमा।नतुतदसत्वइत्यस्यप्रातिपदिकार्थसत्वाभावविशिष्टशब्दव्यावर्त्तकतास्यादितिभावः।अ
नर्थकनिपातसमभिव्याहारइत्यर्थः। घटःपटोवैममस्वइ॰ घटः। पटोमेस्वमित्यादौ। तत्सत्वइति॰ मात्रपदसत्वइत्यर्थः। कर्मत्वादियोग्यार्थकेति॰क
र्मत्वाद्याधिक्येप्रथमाव्यावृत्त्यर्थंहिमात्रग्रहणन्तेनपर्युदासन्यायेनैतल्लाभः। नचार्थकनिपातेभ्योमात्रग्रहणाभावेपूर्वोक्तरीत्यायदिप्रथमानभ
वेत्तदाऽनर्थकस्यनिपातस्यप्रातिपदिकसञ्ज्ञेतिवार्तिकवैयर्थ्यमितिवाच्यम्॰ स्वरार्थन्तत्स्यात्।नचनिपाताआद्युदात्ताइत्यनेनस्वरोभविष्यतीति
वाच्यम्॰ अव्ययेभ्यःसप्तानामपिविभक्तीनामेकवचनानीतिपक्षेद्वितीयाद्यर्थन्तदित्याशयात्।कर्मत्वयोग्यार्थकेतिनिवेशयित्वायदिनियमस्त

न

मै॰ ननुभवदुक्तनियमेकिम्मानमतआह॰ इदमेवेति॰ तदकरणलाघवेनेति॰ मात्रग्रहणाकरणलाघवेनेत्यर्थः। स्पष्टञ्चेदम्भाष्यइति॰ तत्रहिशङ्कासमा
धानाभ्यामुक्तम्। अथमात्रग्रहणङ्किमर्थम्। एतन्मात्रएवप्रथमात्रएवप्रथमापथास्यात् कर्मादिविशिष्टेमाभूदिति॰ अत्रकर्मादिशब्दस्तच्छक्तिपरः।
कटङ्करोति। नैतदस्तिप्रयोजनम्। कर्मादिषुद्वितीयादयोयाःविभक्तयस्ताःकर्मादिविशिष्टेबाधिकाभविष्यन्ति। अथवाचार्यप्रवृत्तिर्ज्ञापयति॰ न
कर्मादिविशिष्टेप्रथमाभवतीति। यदयंसम्बोधनेप्रथमांशास्ति॰ नैतदस्तिज्ञापकम्। अस्तिह्यन्यदेतस्यवचनेप्रयोजनम्। किमामन्त्रितमितिव
क्ष्यामीति। यत्तर्हियोगविभागङ्करोति इतरथासम्बोधनेऽमन्त्रितमित्येवब्रूयादिति॰ भाष्यप्रदीपोद्योतेनिरूपितमिति॰ शेखरोक्तरीत्यैवनि

इदमेवमात्रग्रहणङ्कर्मणिद्वितीयेत्यादेर्मदुक्ताकारनियमेमानम्। मात्रग्रहणाच्चसूत्रकारस्यप्रत्ययनियमपक्षएवाभिम
तइतिगम्यते॰ तदकरणलाघवेनतुकर्मणिद्वितीयैवेत्यर्थनियमउक्तोभाष्यादौ॰ स्पष्टञ्चेदंसर्वम्भाष्यइतिभाष्यप्रदीपोद्यो
तेनिरूपितमित्याहुः। सम्बोधनेच॰ तत्रवर्त्तमानादित्यर्थः। सम्बोधनमभिमुखीकरणं॥ ((रूपितम्। द्वितीयादयोयाविभक्तयइ

ति॰ कर्मणिद्वितीयैवेत्येवमर्थनियमपक्षेद्वितीयादीनांस्वस्वविषयेप्रथमाबाधकतया कर्माद्यधिकेप्रथमा या अप्राप्त्यामात्रग्रहणन्नका
र्यमितिसूचितम्। यदिमात्रग्रहणन्नक्रियतेतदासम्बोधनेचेतिसूत्रंलिङ्गादिग्रहणञ्चनकार्यमित्यपिध्वनितम्॰ सम्बोधनेचेतिसूत्रम्व्याचष्टे॰
तत्रवर्त्तमानादिति॰ प्रातिपदिकादित्यधिकारतोलब्धम्। सूत्रकारमतेमात्रग्रहणम्प्रातिपदिकार्थेतिसूत्रेऽस्तीत्यस्यारम्भः। अभिमुखीकर
णमिति॰ स्वोच्चारितशब्दबोध्योयोऽज्ञातार्थस्तद्बोधानुकूलव्यापारानुकूलोव्यापारइत्यर्थः। सम्बोध्यश्चस्व व्यापारप्रयोज्योयस्तादृशार्थबो
धानुकूलोव्यापारस्तदाश्रयउच्यते॰॥

भैः वस्तुतः सन्देहनिवृत्त्यर्थन्तदाश्रयो गद्दत्याशयेनाह· द्रोणशब्दस्येति· मूलोक्तरीत्यापरिमाणग्रहणस्यसार्थक्यङ्खण्डयति· मूलोक्तमिति·
नचतिङ्समानाधिकरणेप्रथमेतिवार्तिकसम्मत्यासमानाधिकरणेनामान्तरान्वयएवपरिमाणमात्रेप्रथमा इतिप्रागुक्तत्वान्नद्रोणस्यानापन्दो
ष इतिवाच्यम्· यत्रद्रोणादिपदार्थस्यनसमानाधिकरणेनामान्तरार्थेऽन्वयविवक्षाकिन्तुतदर्थस्यसत्वमात्रप्रतिपिपादयिषातत्रप्रथमाना
पत्तेरुक्तनियमास्वीकारात्। यदिकल्पनाऽतिप्रसङ्गभङ्गयतादृशीक्रियतेतदाप्याह· किञ्चेति· तिङ्सामानाधिकरण्यंहितिङर्थाऽभिन्ना

द्रोणशब्दस्यानेकार्थत्वाद्धा मूलोक्तन्नयुक्तम्· द्रोणोव्रीहिमानयेत्यस्यापत्तेः। किञ्चतिङ्समानाधिकरणेप्रथमेतिवा
र्तिकैकवाक्यतयाभेदान्वयेद्रोणोव्रीहिरित्यनिष्टम्। नचपदार्थपरिमेयेद्रोणादीनांवृत्तिस्तदातस्यानेकत्वेनपरिमाणमात्रप
रत्वेतद्वोधेचव्यभिचारान्मेयस्यनियतोपस्थितिकत्वाभावेनाप्रातिपदिकार्थत्वादसिद्धौकर्मव्युत्पत्त्याप्रमेयार्थकम्परिमा
णग्रहणमितिकैयटोक्तंयुक्तमितिवाच्यम्· सिंहोमाणवकइत्यस्यासिद्ध्यापत्तेस्तद्धस्यापिसिद्धेश्च॥ ((र्थाभिधायकत्वन्तच्चमूलो

क्तरीत्यानास्तीतिभावः। प्रत्युततिङर्थेऽन्वयएवसाधुत्वमितिवार्तिकाल्लभ्यते। मूलोक्तरीत्याऽन्वयेत्वसाधुत्वमस्यस्यादित्यपिवोध्यम्। कैयटो
क्तम्परिमाणग्रहणसार्थक्यन्दूषयति· नचेत्यादिना· मेये· परिच्छेद्ये· कर्मव्युत्पत्त्या· परिमीयतेयत्तत्परिमाणमितिरीत्या। असिद्ध्यापत्तेरिति·
अत्रसिंहशब्दस्यसिंहसदृशप्रतिपादकतयाकस्यापिसदृशस्यनिरूक्तम्प्रातिपदिकार्थत्वन्नास्ति· तद्वदिति· पदएवलक्षणेति· प्रागुक्तरीत्या
स्वार्थमात्रेसिंहत्वस्यसाधुत्वमितिरीत्यापदिसिंहोमाणवकइतिवाक्यंसाध्वितिब्रूषेतदाद्रोणइत्यादीनामपिसाधुत्वन्तथैवभविष्यतीतिभावः॥

भै· ननुपूर्वोक्तरीत्यावोधेसम्वोधनान्तार्थान्वयस्वीकारेतिङ्समानाधिकरणेप्रथमेतिवार्तिकविरोधइतिचेत्।एवन्तर्हिसम्वोधनान्तार्थस्यविधेय
भूतक्रियायांविशेषणतापन्नोयआख्यातार्थस्तत्रैवान्वयःस्वीकार्यः। वोधेसम्वोध्यइतित्वस्यतुप्रत्यासत्त्यालाभः। अतएवसम्वोध्यतावच्छेदक
रूपेणसम्वोध्यस्ययत्रसिद्धत्वन्तत्रैवसम्वोधनविभक्तिस्वीकारादेव· व्यवस्थैवप्रयोगइति· यथारामायणेवाल्मीकीयेअयोध्याकाण्डेचित्रकू
टेप्रसादनार्थरामम्प्रतिसमागतम्भरतम्प्रतिरामवाक्ये· त्वंराजाभवभरतस्त्वयन्नराणांवन्यानामहमपिराजराट्मृगाणामागच्छत्वम्पुरमद्यसम्प्र
हृष्टःसंहृष्टस्त्वहमपिदण्डकान्प्रवेक्ष्येइति।यद्येवंराजाभवेतिसम्वोधनविभक्त्यन्ताभिन्नम्प्रयुक्तम्। इन्दूप्रत्नोवर्द्धस्वेतिभागवतेप्रयुज्यमानंस

अतएवराजाभवराजन्युध्यस्वेत्यनयोर्व्यवस्थयैवप्रयोगः।रामपाहीत्यादौचाभिमुखीभवद्रामाद्युद्देश्यकप्रवर्त्तनाविष
येरक्षणमितिवोधः। व्रजानिदेवदत्तेत्यादावपिजानीहीत्यादिःशेषोवोध्यस्तत्रव्रजनस्यकर्मत्वाद्देवदत्तस्योद्देश्यत्वा

न्नगच्छतेकथमितिचेदार्षत्वात्।एवंसतियाद्दृशोऽर्थःफलितस्तमाह·राममाम्पाहीत्यादाविति·एवम्त्रय((इभयोःसमानवाक्यस्थत्वम्
द्रूपावच्छिन्नस्यसम्वोध्यताप्रतीयतेतद्रूपावच्छिन्नएवत्वम्पदस्ययत्रप्रयोगस्तत्रपरामृश्यते।सम्वोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छि
न्नस्ययुष्मदर्थत्वात्। अतएवसम्वोधनविभक्त्यन्तसमानवचनकंसमानविभक्त्यन्तमेवत्वमित्यादिपदंसाधुयत्रतुविधेयभूतक्रियावाचकन्न
श्रूयतेतत्रवाक्यार्थपर्यवसानाययत्किञ्चित्स्थलन्दर्शयति। व्रजानिदेवदत्तेत्यादि· यत्रतुदेवदत्तत्वम्पण्डितइत्येवोक्तन्तत्रअसीत्यध्याहारः।अत
एवविधेयभूतक्रियावाचकस्यदंलोडाद्यन्तमेवप्रयोक्तव्यमितिनियमइतिदिक्·॥ ॥ ॥ ॥

मे· ननु जानीहीत्यादेरध्याहारे एकतिङ् वाक्यमिति लक्षणेनाक्रान्तत्वात्तेषु निघातादीनाम्प्रवृत्तिः कथं स्यादत आह· एकतिङिति· श्रूयमा-
णैकतिङीत्यर्थ इत्यत्र बहुव्रीहिः। इदं समाधानम्प्राचीनरीत्या· यदि तु प्रविशपिण्डीमित्यत्रैव वाक्यैकदेशन्यायेन बोधः स्वीक्रियते ऽध्याहारप-
दार्थोपि स एवाश्रीयते तदा यथाश्रुतमेव साधु उद्देश्यविधेयभावस्य कुतो लाभ इत्यत आह· उद्देश्यविधेयभाव इति· अभिमुखीभवनानुकू-
लव्यापारमाह· अभिमुखीति· अत एव सम्बोधनविभक्त्यन्तस्य विधेयभूतक्रियायामन्वयादेव· यदि धिक्शब्देन योगः स्यात्तदा द्वितीयास्या-
दिति प्रथमान्तसाध्यात्त्वेनोपोऽसीति शब्दस्तत्प्रतिपाद्यक्रियायामन्वयः। अनध्याहारे असीतिशब्दानध्याहारे तदा धिक्शब्देन योगे द्विती-

एकतिङ् वाक्यमित्यस्य च श्रूयमाणैकतिङित्यर्थ इति न दोषः। उद्देश्यविधेयभावो वाक्यार्थः· अभिमुखीभवनानुकूलव्या-
पारश्च सम्बोधनविभक्त्यन्तशब्दप्रयोगरूपः। व्रजानीति प्राप्तकाले लोट्। अत एव गच्छेत्याद्यध्याहारे धिङ्मूर्खेत्यादौ प्रथमा· अन-
ध्याहारे तु द्वितीयैवेति दिक्॥ इति प्रथमा॥ कारके· कारकत्वं क्रियाजनकत्वम्· भाष्ये करोति क्रियां निर्वर्त्तयतीति व्युत्पत्तिप्रद-
र्शनात्· ब्राह्मणस्य पुत्रम्पन्थानम्पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वम्पुत्रेणान्यथासिद्ध्यात्तत्त्वाभावात्॥ ११ याभवतीति भावः॥ ॥

इति प्रथमाविवरणम्॥ कारके इत्यधिकृतस्योत्तरसूत्रैकवाक्यतयावोधकत्वात्तस्याद्यदि तदर्थपरिज्ञानं स्यादतस्तस्यार्थमाह· कारकत्वमित्यादि-
ना· कारकशब्दः करोतिकर्तृकर्मादिव्यपदेशानिति विवक्षया क्रियापरः। जनकमित्यध्याहारः स सम्यर्थो निरूपितत्वम्। तस्य जनकशब्दार्थैकदे-
शजनकतायामन्वयः। एतेन क्रियाजनकत्वं कारकत्वमित्यर्थादुक्तम्भवति कारकाधिकारप्रयोजनमाह· ब्राह्मणस्येति· अकथितञ्चेति सूत्रमपादा-
नादीनाम्प्रसक्तिपूर्वकाविवक्षायां सर्वथा तदविवक्षायाञ्च प्रवर्त्तत इत्यग्रे वक्ष्यते। एवञ्च ब्राह्मणस्य पुत्रमित्यत्र सर्वथा तदप्राप्तिसत्त्वादकथितञ्चेत्यनेन

मे॰ कर्मसञ्ज्ञाप्राप्तिः स्यात्कारकाधिकारेऽकृतेसतितु ब्राह्मणस्यकारकत्वाभावात्। कारकत्वाभावमुपपादयति· पुत्रेणान्यथासिद्धेति· जनकत्वस्यान्यथासिद्धा
वितद्भिन्नमन्यथासिद्धमित्यन्यथासिद्धिसत्वेनकारकत्वाभावात्॥ ॥ अतएव· कारकाणांक्रियाजनकत्वादेव· स्वस्वावान्तरक्रियाद्वारेति· स्वस्वनिष्ठफ
लोत्पत्त्यनुकूलक्रियाद्वारेत्यर्थः। सर्वस्मिन्नेवकारकत्वेनाभिप्रेतफलानुकूलक्रियाऽऽश्रयत्वएतावान्परंविशेषः। यदापन्निष्ठक्रियायाः प्राधान्येनधातुवाच्य
त्वविवक्षातदातस्यकर्तृत्वम्। काष्ठम्पचति। स्थालीपचतीतियथा। यदातुनतन्निष्ठव्यापारस्यप्राधान्येनधातुवाच्यत्वविवक्षातदातेषान्नकर्तृत्वम्। अ
किन्तुकरणत्वादिकम्। तदुक्तंहरिणा· वस्तुतस्तदनिर्देश्यन्नहिवस्तुव्यवस्थितम्। स्थाल्यापच्यतइत्येषाव्यवस्थादृश्यतेपतइति। ननुपदासन्निधा

अतएवैषाङ्क्रियायामेवान्वयः। क्रियाजनकमितिज्ञातेकासाक्रियेत्याकाङ्क्षोदयेनक्रियायाजनकाकाङ्क्षयाचतत्रैवान्वय
स्यौचित्यात्· सर्वेषाञ्चकारकाणांस्वस्वावान्तरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वम्बोध्यम्· असन्निहितसम्प्रदानस्यापि·
दातृबुद्धिस्थत्वावश्यकत्वेनस्वज्ञानस्यपूर्वकालत्वेनैवजनकत्वम्। एवंस्तोकम्पचतीत्यादौफलस्यापि·॥ ९ नेत्स्थितःसन्मत्स्यन्द्रविण

न्देहीतिदातारंपाचतेतदनन्तरंसददाति तदासम्प्रदानव्यापारस्यदानक्रियापूर्वकालिकत्वात्सम्भवतिकारकत्वम्। यदातुसोऽसन्निहितः। अथच
मनसापात्रमुद्दिश्यजलमध्येजलङ्क्षिपेत्। दातातत्फलमाप्नोतिप्रतिग्राहीनदोषभागित्युक्तत्वेनतादृशसम्प्रदानउद्दिष्टस्तदातद्व्यापारस्यकथ
ङ्कारकत्वन्तस्मिन्व्यापाराभावादतआह· असन्निहितेति· स्वज्ञानपूर्वकालत्वेनेति· स्वज्ञानम्पूर्वकालंयस्याः सास्वज्ञानपूर्वकालातस्याःभावः।
स्वज्ञानपूर्वकालत्वम्। यथायागस्यसाक्षात्स्वर्गाव्यवहितपूर्ववृत्तित्वाभावेपिपरमापूर्वद्वारास्वर्गजनकत्वन्तथाविषयविधयाऽसन्निहितसम्प्रदानज्ञ ३८८
न्यंयत्तद्विषयकज्ञानन्तद्दानक्रियाऽव्यवहितपूर्वकालवृत्तीतिसम्प्रदानस्यापिक्रियाजनकत्वमस्तीतिभावः। फलस्यापीति· स्वज्ञानद्वाराव्यापारजन

भे॰ राममाम्याहीत्यादौ नादृशोः ज्ञानार्थबोधेप्रकृत्यर्थस्य समवेतत्वसम्बन्धेनान्वयः। तत्रैव विषयभूतार्थेऽभेदसम्बन्धेन प्रेरणाविषयमत्कर्मकर
णस्यान्वयः। सम्बोध्यतावच्छेदकत्वेन योज्ञातः सएवोच्चारयित्राऽभिमुखीक्रियते तेन रूपेण। अतएव ब्राह्मणत्वेन योज्ञातः सएव हे ब्राह्मणात्र
गच्छेत्येवमभिमुखीकृत्योच्यते न तु हे उ क्षत्रियेति। एवञ्च रामसमवेतो यो मत्कर्मकप्रेरणाविषयरक्षणाभिन्नार्थबोधस्तदनुकूलव्यापारानुकूलो
व्यापार इत्याकारकः शाब्दबोधः। तत्फलम्प्रवृत्तिनि॰ वृत्ती इति। हे देवदत्त तत्र गत्वा जलमत आनीयतामिति वाक्यप्रयोगोपत्र कृतो मैत्रेणात
त्र देवदत्तस्य देवदत्तसमवेततद्देशाधिकरणकगमनविशिष्टजलकर्मकतद्देशापादानकप्रेरणाविषयानयनाभिन्नार्थबोधानुकूल
व्यापारानुकूलो व्यापार इत्याकारकः शाब्दबोधो जायते तदनन्तरं देवदत्तस्य प्रवृत्तिर्भवति। यत्र तु देवदत्त तत्रारण्ये व्याघ्रादिसेवितेन गन्त

॥ तत्फलम् प्रवृत्तिनिवृत्ती सम्बोध्यतावच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विना तत्त्वासम्भवादनुवाद्ये॰ ॥

॥ एवैषा विभक्तिः। अतएव विधेयभूतक्रियायामेवैतदर्थान्वय उद्देश्यतया॰ ॥ ९ व्यमिति यज्ञदत्तेनोक्ते तत्र देवदत्तप्रेर
णाविषयतद्देशाधिकरणकगमनाभावाभिन्नार्थविषयकदेवदत्तसमवेतबोधानुकूलव्यापारानुकूलो व्यापार इत्याकारकशाब्दबोधो जाय
ते तदनन्तरं तद्देशाधिकरणक उ गमनमनिष्टसाधनमिति मानसबोधे सति गमनान्निवृत्तिः। एवं यत्र प्रवृत्तिस्तत्रापि शाब्दबोधानन्तरं प्रे
रणाविषयत्वेन ज्ञानक्रियायामिष्टसाधनताज्ञानमन्तरं प्रवृत्तिरित्यूहनीयम्। तत्त्वासम्भवादिति॰ तेन रूपेण सम्बोध्यत्वासम्भवादित्यर्थः। ए
तेन सम्बोध्यस्योद्देश्यत्वबीजं दर्शितम्। सिद्धं हि लोके उद्देश्यम्भवति। अतएव॰ अस्यानुवाद्यविषयत्वादेव। एतदर्थान्वयः। उद्देश्यस्य सम्बो
धनान्तार्थतया तस्य क्रियायां विधेयभूतायामन्वयः। सम्बोधनपदस्य कारकवाचित्वव्यवहारोऽप्येतन्मूलक एवाभियुक्तानाम्॰ ॥ ॥

श॰शे॰ मिं॰ मतिरिच्छेति॰ पुनर्वृद्धिग्रहणं।एवंसतिपादृशोवाक्यार्थःसम्पन्नस्तमाह॰ एवञ्चेति॰ आप्तिशब्दस्यव्याप्तिपरत्वभ्रमनिरासायाह॰ आप्तिश्चात्रे
टी॰मै॰ ति॰ कर्त्ताचकेनाप्तुमिच्छतीत्याकाङ्क्षायाः शान्तयेआह॰ कर्तृपदार्थविशेषणीभूतेति॰ प्रधानीभूतव्यापारस्यैवकर्तृपदार्थघटकतयातादृशव्याप
३८९ रेणसम्बन्धस्यचतज्जन्यफलाश्रयत्वरूपस्यप्रकृतेग्रहणमितिभावः।फलेव्यापारजन्यताचसाक्षात्परम्परासाधारणी।तेनतण्डुलम्पचतीत्यत्र
साक्षात्प्रधानीभूतव्यापारजन्यविक्लित्त्यादिफलस्यकर्मत्वमुपपादयति॰फलस्यापीति॰ फलसम्बन्धित्वात्फलाश्रयत्वात्॰ अतएव फलस्यक

मतिरिच्छेतितत्राकरः।एवञ्चकर्त्राप्तुमिष्यमाणङ्कर्मेत्यर्थः।आप्तिश्चात्रसम्बन्धः।सचकर्तृपदार्थविशेषणीभूतव्यापारद्वा
रकएव॰ उपस्थितपरित्यागेनानुपस्थितकल्पनेमानाभावात्॰ एवञ्चकर्त्रास्वनिष्ठव्यापारप्रयोज्यफलेनसम्बद्धुमिष्यमाण
मित्यर्थः।यथातण्डुलम्पचतीत्यादौ फलस्यापिव्यपदेशिवद्भावेनफलसम्बन्धित्वात्कर्मत्वम्॰ अतएव तत्समानाधिकरणे
लोकम्पचतीत्यादौकर्मत्वसिद्धिः क्तप्रत्ययोपात्तवर्त्तमानत्वन्तुनविवक्षितम्॰ तेनकटङ्कृतवान् करिष्यतीत्यादिसिद्धिः।कार
कङ्कर्मसञ्ज्ञंस्यादिति॰ कारकेइतिप्रथमार्थेसौत्रीसप्तमी तेनकारकंसत्कर्मसञ्ज्ञमित्यर्थः॥ ((र्मत्वादेव॰ कर्मत्वसिद्धिः।कर्मसमा

नाधिकरणस्यकर्मत्वन्त्वाप्यमेवेतिभावः।अत्रेदम्बोध्यम्।व्यपदेशिवद्भावेनफलाश्रयत्वात्।फलस्यसकर्मत्वन्नसकर्मकधातुस्थलएव॰ कि
न्त्वकर्मकधातूपस्थाप्यफलाश्रयस्यापि॰ आस्तेशेतेइत्यादौकर्त्तुःकर्तृसञ्ज्ञयाबाधान्नकर्मत्वम्।व्यपदेशिवद्भावेनफलाश्रयस्यतुभवत्येव ३८९
अतएवओजःसहोम्भसावर्त्ततेइतिसूत्राद्वर्त्ततेइत्यनुवर्त्तमाने तद्व्याप्यक्रियायाः समानाधिकरणङ्कर्मवाचकन्तत्प्रत्यनुपूर्वमीपलोमकूल
मितिसूत्रेनदित्युपात्तम्।अत्रफलस्यकर्त्तुरितिसूत्रेणकर्मत्वम्भवत्येव॰बाधिकायाःकर्तृसञ्ज्ञाया अप्राप्तेः।फलेनकर्मणासकर्मकत्वव्यवहा

मे· रणेन· एतादृशकर्मणः सर्वत्रैवसम्भवेनाकर्मकत्वव्यवहारस्यैवोच्छेदापत्तेरिति॥ ॐ॥ महासञ्ज्ञाश्रितमिति· करोतीतिकारकमिति।
किङ्करोतीतिप्रश्नेसाध्यत्वेनयोर्थः। प्रतीयतेतन्निरूपितसाधनत्वमेवगृह्यतेसाचक्रियैवनतुद्रव्यन्तत्स्वभावतःसिद्धत्वेनैवभासते। एतत्पक्षे
एकसञ्ज्ञाधिकारात्सञ्ज्ञाद्वयविधानेपिपर्यायःस्यादितिद्वयोःसमावेशसिद्धयेकारकंसदित्युक्तम्। गतिकारकोपपदादितिसूत्रेकारकशब्देनम-
कारकसञ्ज्ञकस्यैवोपस्थितिः एवमेवैतदधिकरणोक्तकर्त्रादिसञ्ज्ञासुबोध्यम्· तेनग्रामेवासइत्यादौकारकत्वात्कृदुत्तरपदप्रकृतिस्व-
रस्याथघञितिविहितोऽधिकरणत्वात्सप्तमीचसिध्यति। भाष्योक्तम्प्रथमपक्षमुक्त्वाद्वितीयपक्षमाह· यद्वेति· तत्रत्यैवमुक्तम्। यावद्बू-

सञ्ज्ञिनःक्रियाजनकत्वन्तु महासञ्ज्ञयाश्रितम्· यद्वासप्तमीयथाश्रुतैव कारकपदञ्च क्रियापरम्· करोतिकर्तृकर्मादि-
व्यपदेशानितिव्युत्पत्तेः। जनकमित्यध्याहारः। विषयत्वंसप्तम्यर्थः। कारकग्रहणेचस्वरितत्वप्रतिज्ञयैतदधिकारोक्तकर्त्रा-
दिषट्कमेव· तेननटश्रवणमित्यादौनकृदुत्तरपदप्रकृतिस्वरः॥ ॥ ११ क्रियायामितितावत्कारकेइत्युक्तम्। एवञ्चकृत्वा

निर्देशउपपन्नोभवतिकारकेइति। कारकशब्दस्यक्रियापरत्वेयुक्तिमाह· करोतिकर्तृकर्मादिव्यपदेशानिति· कारकइतिवैषयिका धारस-
प्तमीतदाह· विषयत्वमिति· स्वरितत्वमिदन्दोषविशेषरूपङ्कारकशब्देबोध्यम्। स्वरितेनाधिकारइतिसूत्रस्यस्वरितेनाधिकङ्कार्यमित्यर्थाद-
तदधिकारोक्तसञ्ज्ञाविशिष्टस्यैवग्रहणमित्येवकार्यम्प्रकृतेगृह्यते। नटश्रवणमिति· अत्रनटस्यश्रवणेक्रियाजनकत्वेपितस्यनैतदधिका-
रोक्ताःकर्त्रादिसञ्ज्ञाः कृदुत्तरपदप्रकृतिस्वरइति· उत्तरपदेश्रवणशब्देलितीतिसूत्रेणप्रथमाकारस्योदात्ततयासमुदायोमध्योदात्तःस्यात्क-
र्त्रादिसञ्ज्ञाविरहात्तुनभवति। आदिनानटश्रुतिरित्यस्यसङ्ग्रहः॥ ७॥

श॰शे॰ भे· समावेशफलन्दर्शयति· ग्रामेवासइति· अत्राधिकरणसञ्ज्ञाकारकसञ्ज्ञयोः समावेशेसप्तमी थाथादिस्वरयोः सिद्धिः। प्रथमपक्षे द्वितीयपक्षे आह· त
टी॰भै॰ त्स्वरसिद्धिरिति· थाथादिस्वरसिद्धिरित्यर्थः। यत्तु कृदुत्तरपदप्रकृतिस्वरस्यपूर्वमुक्तत्वात्तत्पदेन तस्यैव परामर्शइति तन्न· थाथादिस्वरस्य तदपवादत्वात्
३९ यदपि तन्त्रिमइत्यत्र सप्तमी कृदुत्तरपदप्रकृतिस्वरयोः सिद्धिस्समावेशफलमिति कैयटः। अत्र थाथादिस्वरस्तु न· अपासाहचर्य्यलेरव्चएवग्रहणात्तत्
दपि न· उपपदत्वेनेष्टसिद्धेः। व्यापारलाभइति· कारकसञ्ज्ञापक्षेऽन्वर्थसञ्ज्ञाबलात्क्रियापरत्वे तु स्वतएवेति भावः। माषेष्विति· अयम्भावः। कर्तृपदस्या
विवक्षितपरस्य क्रियाशब्दत्वेपि कारकवृत्तिव्यापारप्रयोज्यफलाश्रयग्रहणे कारकवृत्तिव्यापारप्रयोज्यं पतनं फलन्तत्कालिकतन्माषभक्षणन्तदपि
प्रकृतधात्वर्थतावच्छेदकं यत्फलन्तत्प्रयोज्यम्भवति बन्धधात्वर्थश्च देशान्तरसञ्चारविरोधिबिलक्षणशङ्कुसंयोगानुकूलव्यापारानुकूलो व्या

ग्रामेवासइत्यादौ च तत्स्वरसिद्धिरित्यन्यत्र विस्तरः। कर्तुः किमिति· तदभावेपि केनाप्तुमिष्यमाणत्वाकाङ्क्षायाङ्कारकाधिकाराद्व्यापार
लाभइति प्रश्नः। माषेष्विति· माषेषु प्रसक्तमश्वम्माषनाशोमाभूदित्यन्यत्र बध्नातीत्यर्थः। तदाह· कर्मणइति· तमपग्रहणङ्किं कृ

पारानुकूलो व्यापारः। एवञ्च धात्वर्थतावच्छेदकम्फलन्देशान्तरसञ्चारविरोधिबिलक्षणशङ्कुसंयोगा((मिति· अवयवद्वारा समुदायस्य प्र
नुकूलव्यापाररूपन्तत्प्रयोज्यतातादृशभक्षणेऽस्ति। यदा माषसेत्रसमीपदेशनिहितशङ्कौ बद्धोप्यश्वो रज्जुदैर्घ्यत्वेन माषभक्षणं कृतवान् तन
त्सञ्ज्ञानानन्तरमन्यत्र बद्धस्तत्र माषाणाम्प्रसक्तिक्रियाधिकरणत्वम्माषाणाम्बाधितापरत्वाद्बन्धधात्वर्थतावच्छेदकफलप्रयोज्यफलाश्रय
त्वात्कर्मसञ्ज्ञा स्यादधिकरणसञ्ज्ञायास्तु कटे आस्तेइत्यादौ चारितार्थ्यमस्ति। कर्तृग्रहणसत्वे तु कर्तृपदं कारकपदलभ्यधात्वर्थयोः प्रत्यासत्त्या ३९
कत्वलाभे प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यं यत्प्रकृतधात्वर्थफलन्तस्यलाभान्नातिप्रसङ्ग इति भावः॥ ॥ ॥ ॥

भि॰ प्रथमफलज्ञानन्ततः फलेच्छा ततस्तदुपायान्वेषणन्ततस्तदुपाये फलसाधनताज्ञानन्ततउपायेच्छा ततउपायनिष्ठसाध्यत्वाख्यविषयता
काप्रवृत्तिरित्येवङ्क्रमेण फलस्य क्रियाजनकत्वमितिभावः॥ ॐ॥ वौद्धघटादेरिति॰ बुद्धिसत्तासमाविष्टस्य घटशब्दवाच्यत्वात्। स्मृत्यादीनामिति॰ आ
दिना घटङ्करोतीत्यादिसङ्ग्रहः। अत्र क्रियापर इति॰ इदमुपलक्षणम्। तथा युक्तम्। स्पृहेरीप्सितः। वारणार्थानामितिसूत्रेष्वपि रूढएव॰ अयम्भावः
कर्तुरिति न शेषषष्ठी। पटे नीलो जायतामितीच्छया नीलकरणे यत्र प्रवृत्तिस्तत्र पटे नीलङ्करोतीति प्रयोगानुपपत्तेः। अधिकरणसञ्ज्ञां बाधित्वाप
टस्य कर्मत्वं स्यात्। किन्तु कर्तुरिति कर्तरि षष्ठी। एवं सत्यस्य रूढत्वे कर्तृषष्ठ्यनन्तस्यानन्वयापत्तिरतः क्रियाशब्दोयमिति। न चाक्षिप्तक्रियायामन्वयो
भविष्यतीति वाच्यम्॰ श्रौतक्रियान्वयसम्भवे आक्षिप्तक्रियान्वयमादाय कारकषष्ठ्युपपादनस्यानुचितमित्याशयात्। स्पष्टञ्चेदमिति॰ तत्र हि

घटङ्करोतीति स्मरतीत्यादौ बौद्धघटादेः पूर्वकालत्वेन स्मृत्यादिनिष्पादकत्वम्बोध्यम्॰ कर्तुरीप्सि॰ ईप्सितशब्दोऽत्र क्रियापरो नाभि
प्रेतपरो रूढः स्पष्टञ्चेदं वारणार्थानामित्यत्र भाष्यकैयटयोः। कर्तुरिति क्तस्य च वर्तमान इति कर्तरि षष्ठी॰ आप्नोतेः सन्नन्तान्म
तिबुद्धीतिवर्तमाने कर्मणि क्तः॥ ११ किमुदाहरणम्। माषेभ्यो गां वारयति। भवद्यस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः यस्य तु ख
लु गावो न माषाः कथन्तस्य माषा ईप्सिताः स्युः। अभिप्रेतपर्यायमीप्सितशब्दम्मन्यत इति कैयटः। तस्यापि माषा एवेप्सिताः। एवकारो भिन्नक्रमः। मा
षा ईप्सिता एवेत्यर्थः। अतश्चेप्सिताः यवेभ्यो गां वारयति। अत्र कैयटः। ईप्सितशब्दः क्रियाशब्द आश्रीयते न तु रूढिशब्दः तत्र वारणक्रियया
परकीया अपि माषा वारयितुमीप्सिता भवन्ति। मा न शन्नेते इत्येतेभ्यो सौ गां वारयति। इह कूपादन्धं वारयतीति कूपे पातानसन्त्वानमाप्नोतिन
हितस्य कूप ईप्सितः। कस्तर्ह्यन्धः। ईप्सितशब्दस्य रूढत्वाभिप्रायेण प्रश्नः। तस्यापि कूप एवेप्सितः। पश्यस्य यमन्धः कूपम्मा प्राविदिति। क्रियाशब्द

मि· उभयत्र सूत्रे॰ तमप्ग्रहणे हि यथा माणवकस्य कर्मत्वम्भवति तथाह। तमप्ग्रहणइति· ईप्सितमात्रे। प्रकृतव्यापारवाचकधातूपस्थाप्यफलाश्र
यकूपाग्न्यादौ। व्यापारप्रयोज्यप्रकृतधात्वर्थेति· एवञ्चैतादृशप्रयोज्यत्वलाभफलकन्तमप्ग्रहणमितिभावः। प्रत्यासत्तीति· कर्तृपदार्थेनावच्छेद
कतया प्रकृतधात्वर्थप्रधानीभूतव्यापारलाभे तत्फलस्य शीघ्रोपस्थितिकत्वात्तत्रापि प्रकृतत्वलाभः प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्ये

एषएवप्रवृत्तिविघातः। ईप्सितशब्दउभयत्रापि क्रियाशब्दएव· नचसंयोगोनतत्कर्तृव्यापारजन्यइतितत्र कर्मत्वाप्राप्तिरि
तिवाच्यम्· कर्तृव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैवतेनलाभात्· तमप्ग्रहणेत्वीप्सितमात्रेसावकाशस्यपर
त्वादीप्सिततमेऽनेनबाधः। ईप्सिततमत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्व
तच्चनाग्न्यादौ· फलव्यापारयोः प्रकृतधात्वर्थत्वन्तु प्रत्यासत्तिलभ्यम्। तेनपदार्थप्रष्टार्थम्माषभक्षणप्रमाषक्षेत्रेएवाश्वब
न्धनन्तदामाषेष्वश्वम्बध्नातीत्यादौ माषाणान्नकर्मत्वम्। बन्धनप्रयोज्यभक्षणफलाश्रयत्वेपिभक्षणस्यबध्नात्यर्थत्वाभा
वात्· प्रयोज्यत्वनिवेशाद्गान्दोग्धीत्यादौ विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगेपयसः कर्मत्वसिद्धिरितिस
ह्मभाष्ये· कर्मेत्यनुवृत्ताविति· अधिशीङ्स्थासामितिसूत्रात्· आधारेति कर्तृकर्मद्वाराक्रियाश्रयोहिसतदाह· गेहमि
त्यादि· अनुक्तेकर्मणीति· कर्मपदेनैतच्छास्त्रबोधितकर्मसञ्ज्ञकङ्कर्मत्वशक्तिमद्गृह्यते॥ एतिपरित्यज्यप्रयोज्येतियन्निवेशित
न्तत्प्रयोजनमाह· प्रयोज्यत्वनिवेशादिति· नन्वाधारनिवृत्त्यर्थमिदमनुपपन्नम्फलाधारस्यैवकर्मसञ्ज्ञाविधानादतआह· कर्तृकर्मद्वारेति· एकञ्च ३९१
यस्यकर्तृकर्मद्वाराधात्वर्थाधारत्वंसएवाधारइत्युच्यते। तण्डुलम्पचतीत्यादौतण्डुलादिकन्तुनतादृशपरम्परयाआधारइतिभावः॥

स्य

मे॰ कर्मणिद्वितीयेत्यादिसूत्राणांस्वसिद्धान्तरीत्या अर्थमाह॰ कर्मपदेनैतदिति॰ कर्मत्वशक्तिमानिति॰ एवंसतिशाब्दबोधोपिकर्मत्वशक्तिमत्वेन॰
ननुकर्मणिद्वितीयायाएवविधानन्नत्वविभक्तेरितिद्वितीयादीनामित्यसङ्गतमितिचेन्न॰ गत्यर्थकर्मणीतिसूत्रविहितचतुर्थ्याकर्तृकर्मणोरिति
सूत्रविहितषष्ठ्याश्चसङ्ग्रहार्थन्तथाकथनात् क्रियाकारकसम्बन्धश्चेति॰ क्रियाकारकयोर्भावः क्रियात्वकारकत्वसमूहः तद्रूपः सम्बन्धश्चेत्य

सर्वकर्मविहितद्वितीयादीनाङ्कर्मत्वशक्तिमानर्थः क्रियाकारकभावसम्बन्धश्चतदर्थः। राज्ञः पुरुषइत्यत्रराजपुरुषयोःस
म्बन्धस्यषष्ठीवाचिकाकष्टंश्रितइतिक्रियाकारकयोःसम्बन्धस्यद्वितीयावाचिकेतिसमर्थसूत्रस्थभाष्यात्॰ एवञ्चहरिम्भ
जनीत्यादौहरिकर्मकभजनमितिबोधः। अभिहितेत्विति॰ अनभिहिताधिकारादितिभावः। पञ्चकम्प्रातिपदिकार्थइतिपञ्च
कर्मणिद्वितीयेत्यादेर्द्वेकयोरित्यादेश्चनियमत्वमेतदभावेपिस्वादिसूत्रेणनिर्दिष्टार्थाः प्रत्ययाः स्वार्थइतिकर्मादौसङ्ख्याया
श्चस्वादीनांसिद्धेः। तत्रयदाकर्मणीत्यादेर्द्वेकयोरित्यादेश्चैकवाक्यतायामेकस्मिन्कर्मणीत्यन्वयेनसूत्रजबोधेकर्माद्यर्थस्य
प्राधान्यन्तदानार्थोऽनेन॰ सूत्रजबोधविषयप्रधानविषयेणोक्तार्थानामितिन्यायेनसिद्धेः। यद्यपिद्विर्बद्धंसुबद्धमितिन्याये
नद्योत्यत्वलाभस्तथापिलुनीतइत्यादौद्योतकवाचकयोर्द्योतकयोश्चसमुच्चयोदृष्टस्तथापिप्रकृतेतल्लाभानुसारादुक्तार्थानामिति

र्थः कर्मत्वादिशक्तिविशिष्टस्यद्वितीयादिपदवाच्यत्वेकर्मणिद्वितीयेत्यादिसूत्रंसाधकमितिसु ॥ न्यायानुसरणस्यैववक्तुंशक्यत्वात्
प्रसिद्धमेवासम्बन्धस्यवाच्यत्वेतुभाष्यंसाधकमाह॰ राज्ञः पुरुषइत्यत्रेति॰ एतेनाश्रयत्वेनाश्रयस्यवाच्यत्ववादिप्राचीनमतन्निरस्तम्॰ एवंसात
पादृशोबोधस्तमाह॰ एवञ्चेति॰ अनभिहितइतिसूत्रंयथाव्याख्यातन्तम्प्रकारमाह॰ पञ्चकेत्यादि॰ एतदभावेपीति॰ एतयोःसूत्रयोरभावेपीत्यर्थः ॥८६॥

तत्रपदेतिकर्मणीत्यस्यनियमार्थत्वप्रसेर

भै· भाष्यप्रसिद्धप्रत्याख्यानप्रकारमुक्त्वाऽनभिहितसूत्रारम्भवादिसूत्रकारमतमाह· यदात्विति· तत्वम्· वाच्यत्वम्· सूत्रम्· अनभिहित इत्येतत्ताद्दृ
योः पक्षयोर्मध्ये द्योतकतापक्ष एव मुख्यो भाष्यसम्मतत्वात् ननु पञ्चकञ्चेत्प्रातिपदिकार्थस्तदा कर्मादिषु विभक्त्यर्थत्वव्यवहारस्य भाष्य
सम्मतस्य का गतिरत आह· भाष्य इति· विभक्त्यर्थत्वव्यवहार इति· सुपाङ्कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङामित्यत्र तथा व्यवहार इत्य

एवञ्च कर्मादीनां द्योत्यत्वमेव· यदा तु कर्मगत एकत्व इत्यन्वयेन सङ्ख्यायास्तत्वं तदा सूत्रमारब्धव्यम्· भाष्ये एषु विभ
क्त्यर्थत्वव्यवहारो द्योत्यतयैव न त्वेनावच्छकत्वमेषामिति भ्रमितव्यमानियमत्वानुपपत्तेरिति स्पष्टं बहुष्विति सूत्रे भाष्या
दिषु द्योतकविषयेऽप्युक्तार्थानामिति न्यायोऽधिपरीति सूत्रे भाष्ये दृश्यते· तत्रत्यं ध्यागच्छतीत्यादावध्यागच्छतीत्यतोऽन
धिकार्थयोरधिपर्योः प्रयोगस्योक्तार्थानामिति न्यायेनाभावमाशङ्क्यापूपौ द्वावित्यादावुक्तार्थानां प्रयोगदर्शनेन समाधानमु
क्तम्· तत्र हि द्विशब्दापूपशब्दयोर्वाचकयोः प्रकृतिप्रत्यययोर्वाचकद्योतकयोर्द्वावित्यत्र तयोर्वाचकानुवादकयोश्च समुच्चयः
अत एव हि दशाद्यादौ समासे न सुजर्थस्योक्तत्वान्न सुजिति भाष्य उक्तम्· तत्र हि समासः सुच्च सुभयमपि द्योतकं सुजर्थश्चाऽ
न्येति तत्रैव वक्ष्यते तथा तद्धितद्विर्वचनयोर्द्योतकयोस्तद्धितेनोक्तत्वाद्वीप्सायां न द्विर्वचनं माषश इत्यादाविति सर्वस्येदृ
इति सूत्रे भाष्य उक्तम्· एवं धातोरपि क्रियात्वक्रियाकालकारकसङ्ख्यारूपं पञ्चकमर्थः॥ ११ ॥ ॥ 

र्थः। ननु द्योतकविषये उक्तार्थानामिति न्यायस्य व्यभिचारः पूर्वत्र दर्शित इति कथं तन्न्यायमाश्रित्य प्रत्याख्यानमत आह· द्योतकविषय इति·
दृश्यात इति· तत्रत्यपूर्वपक्ष इति शेषः। तत्र तत्सूत्रस्थभाष्ये केवलद्योतकस्थलमाह· अत एवेति· द्योतकविषयेऽपि तन्न्यायाङ्गीकारादेव॥

मे॰ तदाह· तदभिप्रायेणाह· कर्मणईप्सिताः। कर्मवृत्तिव्यापारप्रयोज्यफलाश्रयाः। नकर्तुः। नप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफला श्रयत्वेनोद्देश्याः। यतस्तादृशफलाश्रयत्वेनोद्देश्यकर्मत्वमतः कर्मकारकस्यफलएवान्वयः। पयोग्रहणमुभयव्यावर्त्तकत्वमेकस्यप्रकर्षस्यनसम्भ वतीत्याशयेनमूलोक्तंयोजयति· अवयवद्वारेति· कर्तुरितिषष्ठ्यर्थप्रतिसम्बन्धिनोःभावेआकाङ्क्षाशान्तिर्नभवतीतितच्छान्यर्थमुद्देश्यपदमध्या हृत्यव्याचष्टे· कर्तुरुद्देश्यमिति· पयसउद्देश्यत्वमुपपादयति· यदाकृतभोजनइति· तत्क्रियायाः। भक्षणक्रियायाः। पयोलाभेच्छाप्रयोज्यत्वन्त त्क्रियाया अतः पयउद्देश्यकत्वमितिभावः। विशिष्टोपादानेतुपथ्यानातिप्रसङ्गस्तथोपपादयति· ईप्सिततमेति· तदापयसः संस्कारकत्वमात्रवि

कर्तुरुद्देश्यङ्कर्मेस्येवास्त्वितिभावः। पयसौदनमिति· यदाकृतभोजनोऽपिपयोलाभेनौदनभोजनेप्रवर्ततेतदेदम्प्रत्युदाहरणम्·त त्क्रियायाः पयउद्देश्यकत्वादीप्सिततमशब्दस्यतुक्रियाशब्दत्वात्पयसस्तदफलाश्रयत्वेनाविवक्षणान्नदोषइतिभावः। तमस्य फलन्त्वग्रेमाणवकंवारयतीति। तदभावेहिवारणार्थानामितिसूत्रमस्यापवादः स्यात्। एवञ्चमाणवकस्यकर्मत्वन्नस्यात्। नचा ग्नेतच्चरितार्थम्· तस्यापितदुपस्थाप्यसंयोगरूपफलाश्रयत्वात्· वारयतेश्चसंयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः

वक्षानतुप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रयत्वविवक्षेतिभावः। यदातुसंस्कारकत्वेनकरणत्वस्यफलाश्रयत्वेनकर्मत्वस्यच विवक्षातदापरत्वात्कर्मत्वमेवभवति। तमस्येति· तन्मात्रस्येत्यर्थः। तमपग्रहणाभावेकर्तृवृत्तिव्यापारवाचकधात्वर्थफलाश्रयत्वंयस्ययस्यत स्यसर्वस्यकर्मत्वप्राप्तौवारणार्थानामित्यनवकाशंसद्वारयतियोगेकर्मसञ्ज्ञाबाधकमेवस्यादित्येतदुपपादयति· तदभावेहीत्यादिना· ननुप्र वृत्तिविघातस्यैववारयत्यर्थतयासंयोगस्यकथन्तदुपस्थाप्यत्वमतआह· वारयतेश्चेति· संयोगादीत्यादिपदेनभक्षणादिसङ्ग्रहः॥

भै॰ अत्रप्राञ्चः यथा अश्वेन यथारोपि कपानिशायाङ्ग्राममन्व्रजति चैत्र इत्यादौ सर्वेषां कारकाणान्धात्वर्थस्वातन्त्र्येण विशेषणतया ऽन्वयस्तथा कर्तृभी
ष्ममित्यादावपि स्वातन्त्र्येणोभयोः क्रियायाम्प्रकारकत्वं शाब्दबोधे पार्ष्टिकन्तु परस्परमभेदावगाहिमानसमितितन्न युक्तमित्याशयेनाह बोधस्त्विति।
तयोः द्वितीयान्तपदाद्युपार्थयोः विशेष्यविशेषणभावेनेति इतरसम्बन्धानवच्छिन्न विशेषणविशेष्यभावेनैवेत्यर्थः। समानविभक्तिकनामार्थयो
रसति बाधके ऽभेदान्वयस्यौत्सर्गिकत्वात्। कर्मभीष्माभिन्नकर्मकट कर्मक ङ्गरणमित्यादिरीत्या भीष्मङ्कटङ्करोतीत्यादिभ्यो बोधः। यदि स्वातन्त्र्येण
क्रियायामेवोभयपदार्थान्वयबोधस्तदा ऽभेदान्वबोधसामग्र्यभावसाम्यादनीय किञ्चित्प्रतिबन्धकङ्कल्पनीयमिति गौरवम्। किञ्चैतद्वाक्यजन्य

बोधस्तु परस्परन्तयोर्विशेष्यविशेषणभावेनैव कारकाणाम्भावनान्वयव्युत्पत्तिः साक्षात्स्वाश्रयद्वारा वान्वयविषयेति
तदापरिगणनम्भाष्येप्रत्याख्यातम् तिङ्कृतोस्वप्रकृत्यर्थम्प्रतियस्य कर्मतातस्य सर्वस्यापि कर्मतामाह तुरितिहृतः
कटःसुन्दर इत्यादौ न क्वापि द्वितीयेति दिक्। शास इति अत्र वदन्ति कर्मादि पदे इवात्रापि न विभक्तिवाच्यतावच्छेदकस्वे
न कर्मादेर्भानमतऔपगवश्चैत्रगुरितियुक्तम्प्रत्युदाहर्तुम् तत्र च सम्बन्धस्य येन रूपेण षष्ठ्या भानं तेनैव तद्धितादिभिः स

शाब्दबोधानन्तरङ्कटो भीष्मो न वेति सन्देहनिवृत्त्यर्थं नियमेन तादृशमानसकल्पना कार्या एवं सति मानसव्यक्तित्वप्रागभावत्वं सच कल्पनी
यमित्यतिगौरवम् किञ्च प्राचीनमते कटम्भीष्मङ्कुर्वित्याकारकवाक्यजन्य शाब्दबोधसामग्र्याः स्वातन्त्र्येण भीष्माभिन्नः कटः सुन्दर इत्याकारकवि
शिष्टवैशिष्ट्यमितिरीत्या यत्प्रत्यक्षन्तत्प्रतिबन्धकत्वङ्कल्पनीयमित्यतिगौरवमस्मन्मते तु शाब्दसामग्र्याः कटो भीष्म इत्याकारकयोग्यताज्ञानघ
टिततया तादृशयोग्यताज्ञानसत्वे विशेष्यतावच्छेदकप्रकारकज्ञानात्मककारणाभावादेव तादृशविशिष्टवैशिष्ट्यमितिरीत्या यत्प्रत्यक्षन्तदापत्ति ३८३

मे॰ वा रूपे शब्दसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकत्वं न कल्पनीयमिति लाघवमिति दिक् ननु भीष्ममित्यस्य द्वितीयान्तार्थस्याभेदेन कटे ऽन्वयस्वीकारे
कारकाणां भावनान्वयव्युत्पत्तिभङ्ग इत्यत आह॰ कारकाणामिति॰ अन्वयविषयेतीति॰ अस्य पद्युच्यत इति शेषः। नन्वेवङ्कृतः कटः सुन्दर इत्यत्राभि
कटनिष्ठकर्मत्वस्याभिधानेपि सुन्दरपदार्थनिष्ठकर्मत्वस्यानभिधानात् द्वितीया स्यादत आह॰ तिङ्कृताविति॰ यस्य कर्मणेति॰ साक्षात्सम्बन्धेनेति शे
षः। मूलादिकङ्खण्डयति॰ अत्र वदन्तीति॰ कर्मादिपदे इति॰ अस्योच्चारिते सति तज्जन्योपस्थितौ यथा न विभक्तिवाच्यतावच्छेदकरूपेण भा
नन्तथेति शेषः। रूपेण॰ कर्मत्वशक्तिमत्त्वेनाय यथा वा शब्दजन्यविकल्पोपस्थित्यपेक्षया विकल्पपरजन्यविकल्पोपस्थितिर्विलक्षणा सत्त्वासत्त्वा

एतदधिकाराभावे च घट इत्यादौ षष्ठ्यवाच्यत्वेन दृष्टानामेव प्रातिपदिकार्थपदेन ग्रहणं स्यात्तद्भिन्नस्यैव षष्ठीविधायके शेषप
देन ग्रहणं स्यादित्यत्र सम्बन्धस्य षष्ठीवाच्यत्वेन दृष्टतया प्राप्तां षष्ठीं वारयितुं सः वस्तुतस्तु कटं भीष्ममिति परिगणनफलमु
क्तात्प्रत्याख्यानाय शेषत्वान्नात्र शेषलक्षणा षष्ठी॰ अन्यानभिहितकर्मादीनामभावाच्च नान्या इत्याशङ्क्य न केवला प्रकृति =
रिति समयः कृतो न चान्यो सद्यमाना एतमभिसम्बन्धमुत्सहते वक्तुमिति कृत्वा द्वितीये तु कर्मभाष्ये तेनौपगवादावपि षष्ठीवारि तं पू

भ्यां तयोर्वैलक्षण्यस्यानुभवसिद्धत्वात्॰ समुदायशक्त्येति॰ औपगव इत्यत्र तत्सम्बन्ध्यपत्यमित्यर्थप्रत्य (( नैवेति तयोरप्यप्रत्युदाहरणत्व
य विधानाच्चित्रगुरित्यत्र षष्ठ्यर्थे बहुव्रीहिविधानादिति भावः॥ ॥ एतदधिकार इति॰ अनभिहिताधिकार इत्यर्थः। औपगवश्चित्रगुरित्यत्र षष्ठ्यापा
दनन्तरा समुदायात्स्याद्यदा प्रातिपदिकार्थे विधीयमानया प्रथमया बाधो न स्यादित्याशङ्कानिवारणायाह॰ घट इत्यादाविति॰ दृष्टानामेवेति॰ प्रवृत्ति
निमित्ततदाश्रयरूपाणाम्॰ तद्भिन्नस्यैवेति॰ प्रवृत्तिनिमित्ततदाश्रयाभ्यामभिन्नस्येत्यर्थः। षष्ठीवाच्यत्वेन दृष्टतयेति॰ अनभिहिताधिकाराभावेऽभि
हितानभिहितसाधारणसम्बन्धमात्रस्य षष्ठी शेष इति सूत्रे शेषपदेन ग्रहणं स्यात् अनभिहिताधिकारे तु कृते ऽनभिहितसम्बन्धस्यैव षष्ठीवा

मै॰ च्यतया औपगवश्चित्रगुरित्यत्र प्रतीयमानस्य तु प्रातिपदिकेनाभिहिततया ऽयं षष्ठ्यावाच्य इति प्रवृत्तिनिमित्तस्यायं सम्बन्धः। प्रातिपदिकार्थपदे
न गृह्यत इति प्रथमा भवतीति भावः। अत एव प्रकृतसूत्रे भाष्ये कर्मणि द्वितीयेत्यादिविषयेऽधिकारफलमुक्त्वाऽन्ते औपगवश्चित्रगुरित्यत्राधिकार
फलमुक्तम्। वस्तुतस्त्विदमपि तत्प्रत्युदाहरणफलमित्याशयेनाह॰ वस्तुतस्त्विति॰ अत्रेति॰ भीष्मादौ॰ नान्या॰ द्वितीयादयः। एवमभिसम्बन्धमिति॰ क्रिया
कारकभावरूपम्। तेन॰ अशेषत्वादित्यनेन॥ ॥ अस्मिन्नेवार्थे भाष्यान्तरमपि साधकमित्याह॰ तदुक्तमिति॰ स्वसिद्धान्तमाह॰ परे त्विति॰ साध्यत्वे

तदुक्तमनेकमित्यत्र भाष्ये चित्रगुरित्यत्र षष्ठ्यर्थस्य नियमेन भानात् षष्ठी प्राप्नोतीत्याशङ्क्याभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिका
र्थः सम्पन्न इति प्रथमेत्युक्तम्॰ अनेनाशेषत्वरूपं षष्ठ्याप्राप्तिबीजमुक्तमन्तर्भूत इत्यनेन चित्रग्वादौ सम्बन्धस्यैव प्रवृत्तिनिमि॰
त्तत्वेन प्रातिपदिकार्थपदेन ग्रहणयोग्यतेति बोध्यम्॰ परे तु शास्य इत्यादौ कारकान्वययोग्यतावच्छेदकसाध्यत्वेन न क्रियादेर्भान
म्। अत एव न तत्रेतरकारकाणामन्वयः। इदञ्च कर्तृकर्मणोरित्यत्र निरूपयिष्यते॰ एवं प्राप्तानन्द इत्यादौ यत्कर्मक प्राप्तिकर्त्रान
न्द इति विग्रहतो बोधे समासतश्चानन्दकर्तृक प्राप्तिकर्मेति बोधे विशेष्यविशेषणभावव्यत्यासेनैकार्थीभावः कल्प्यः स्यात्। वृत्ति
विग्रहयोः समानार्थत्वभङ्गश्च॰ किञ्च तथा सति बहुव्रीह्युपजीव्यस्यैक धर्मिबोधकत्वरूपसामानाधिकरण्यस्य हानिः ॥

न न भानमिति॰ यद्यपि शतेन क्रीत इत्यर्थे शताच्च ठन्यताविति सूत्रेण यति निष्पन्नस्य शत्यस्य शब्दस्य शतकरणक क्रयणकर्मबोधकता तथा॰
पि प्रत्ययान्तसमुदायेनोपस्थिताया क्रियातस्या न साध्यत्वेन भानम् अत एव॰ साध्यत्वेनाभानादेव॰ मन्दुरायां शय्योऽश्व इति वाक्यान्वययोग्या 
क्रिया धातूपस्थितैव न तु तद्धितशक्त्योपस्थिता॰ अत एव सत्यो ऽश्वो देवदत्तेनेति न प्रयोगः। एवम्प्राप्तोदको ग्राम इत्यत्र प्राचीनसम्मत बोधप्रक्रि
याया दूषणमाह॰ एवम्प्राप्तेत्यादि॰ आदिना प्राप्तोदके त्यस्य सङ्ग्रहः कल्प्यः स्यादिति। इदञ्च न युक्तम्। वृत्तिविग्रहयोः सामानविशेषणविशेष्य

मे· अतएव· तत्तत्सम्बन्धकस्य तत्तद्वाच्यत्वादेव· अतएव· उक्तपञ्चकस्य धातुवाच्यत्वादेव· तद्वत्तात्· भावकर्मवाचकात्। उभयत्र· प्रातिपदिकस्थले धातुस्थ
लेचाएवञ्च हरिम्भजतीत्यादितः कर्मीभूतहरिकर्मकम्भजनमिति रीत्याबोधः। अतएव सत्त्वप्रधानानि नामानीति वाक्यं स्वार्थादिनिरूपितप्राधान्यं यत्तो
नामार्थस्यातः साधु सङ्गच्छते। पचतीत्यादौ चैककर्तृविशिष्टा वर्त्तमाना पचिक्रियेति रीत्याबोधः। ननु प्रातिपदिकार्थप्रथमैवेत्यपि कथन्तत्राप्यनभि
हिताधिकारादत आह· साहीति· अतएव कर्मादीनामभिधानस्थले प्रथमायाः सर्वसम्मतत्वादेव· विशेषणान्तेति· भीष्मपदाद्द्वितीयेत्यर्थः। परिगम

अतएव तद्विषयेपि द्व्येकयोरित्यादेर्भावकर्मणोरित्यादेश्चानियमत्वम्भाष्यसम्मतं सङ्गच्छते· अतएव दधि अजर्घा अवेरित्यादौ
प्रातिपदिकधातुभ्यामेव सर्वबोधः। अतएव भावकर्मणोरित्यस्य तद्वत्ताद्धातोरित्यर्थः स्नुक्रमोरिति सूत्रे भाष्ये दर्शितः। घोस्त्वा
देवोभयत्रापि प्रत्ययार्थस्य विशेषणत्वमेवेत्यन्यत्र विस्तरः। प्रथमैवेति· सा हि प्रातिपदिकार्थस्य तेनोक्तत्वेपि भवत्येवेति भावः
अतएवाभिहिते प्रथमेति वार्त्तिकं सङ्गच्छते· तिङ्कृदित्यादि· परिगणनादेव कटम्भीष्मङ्कुर्वित्यादौ विशेष्यादुत्पन्ना द्वितीय
या गतार्थत्वेपि विशेषणान्ता· यदा तु प्रक्रियादशायाङ्कटोपि कर्म भीष्मादयोपीत्याश्रयणात् कटत्वविशिष्टकटनिष्ठकर्मत्वा
न्नावपि भीष्मत्वादिगुणविशिष्टनिष्ठस्य तस्य बोधार्थं न्नतोपि सा·॥ ९ एतत्प्रत्याख्यानमाह· यदात्विति· एतत्पक्षस्य पदिकर्मत्वं

शक्तिविशेषरूपन्तदेयपत्तिस्सुष्टु सम्भवति। प्राचीनमते तु फलाश्रयत्वमेव कर्मत्वमाश्रयता चाश्रयभेदेन भिद्यते प्रकृते तु नाश्रयभेदे
यद्यप्यस्ति तथाप्याश्रयतावच्छेदकभेदादाश्रयताभेदमङ्गीकृत्य यथाकथञ्चित्कर्त्तव्या·॥ ॥ ॥ २३

प्र·प्र· मै· सधर्मः शक्तिरूपः। विभक्त्यादिभिरित्यादिभिरित्यादिना दोषादिवेत्यादिविभक्त्यर्थशक्तिप्रधानाव्यपरस्यदधिपयेत्यादौ त्वनुत्पन्नविभक्तिकप्राति
टी·मै· पदिकस्य च सङ्ग्रहः। उपकारः। उपकारकः। स्वावेशेन प्रातिपदिकस्य क्रियां प्रति विशेषणतानियामकः अत एव उद्भूतकारकशक्तिप्रतिपाद
३६५ कत्वाभावादेव तस्याः। कारककर्मादिशब्दप्रतिपाद्यशक्तेः न क्रियान्वयनियम इति· द्रव्येप्यन्वयदर्शनात्। तथात्वे बाधकमप्याह· अन्य
थेति· विभक्तिप्रयोजकरूपेणाऽद्भूतकर्मकत्वशक्तिमत्त्वेन· एवञ्चाभिधानविषये प्रातिपदिकस्योद्भूततत्तच्छक्तिविशिष्टेऽर्थे न वृत्तिरिति न।

अत एव तस्य कर्मत्वस्य न क्रियान्वयनियमः। अन्यथा कारकशक्तेः क्रियाविशेषणत्वनियमेन कर्मादि
प्राधान्यानापत्तिः। एवञ्च कर्मादिपदैरिव पक्वादिपदैरपि न विभक्तिप्रयोजकरूपेण कर्मादीनां भानम्· तिङ्
कृत्तद्धितसमासैरभिधाने इत्यस्यायमर्थः एतैरभिधाने तत्तच्छक्त्यावेशेन न भानमिति विभक्त्यप्रसक्ति
रत्रैवानभिहित इति तात्पर्यम् आह कथम् ध्वनितं त्वेदं सुपश्चात्मन इति सूत्रे भाष्ये तत्र हि दृष्टः पुत्र इष्यते पुत्र
इत्यर्थकाचमाशङ्क्य स्वशब्देनोक्तत्वान्नेति समाहितम्· ॥ ६ ॥

तत्र सा सा विभक्तिः। पूर्वोक्तार्थे भाष्यान्तरमपि साधकमाह· ध्वनितं त्वेदमिति· अत्र चोप्यर्थः। सूत्राप्राप्तिमुपपादयति· सुप इति· तत्रत्ये
व मुक्तम्। अथेह क्यचा भवितव्यमिष्टः पुत्र इष्यते पुत्रः। केचित्तावदाहुः। न भवितव्यमिति· किं कारणं स्वशब्देनोक्तत्वात् स्वशब्देनेति·
दृष्टशब्दसामानाधिकरण्यात् पुत्र इत्यनेन निर्भुक्तो विक्रियापेक्षकर्मभावस्यार्थस्य प्रतिपादनादित्यर्थः ॥ ६ ॥ ॥

भे॰ अयमर्थः यदा क्रियाफलस्य कर्मणः प्राधान्यं प्रतिपिपादयिषितं तदा वाक्यमेव प्रयुज्यते॰ पुत्र इष्ट इत्यादि॰ न तु क्यजन्तः। तस्याकर्म
कत्वात्कर्मणि प्रत्ययानुत्पादादिति कैयटः। अपरमाह॰ भवितव्यमिति॰ किं कारणम् धात्वर्थे ऽयं क्यज्विधीयते स च धात्वर्थः। केनचिदेव
शब्देन निर्देष्टव्य इति। स च धात्वर्थ इति॰ इच्छायाः प्रत्ययार्थत्वं दर्शयितुं वाक्यमुपादेयम् तत्र वाक्ये कर्तृप्रत्ययः प्रयुज्यताम्। कर्म
प्रत्ययो वा॥ प्रत्यये तूत्पन्ने ऽकर्मकत्वात्कर्मप्रत्ययो न भवति। इह भवन्तस्तावदाहुः। न भवितव्यमिति। समानार्थेन वाक्येन भवितव्य।
इष्टशब्दसामानाधिकरण्यात्पुत्रार्थे कर्मत्वावगतावपि पुत्र इति सुबन्तं न कर्मवाची तिङन्ततः क्यजिति तद्भावः स्वङ्गमेतत्व
न्तद्बाधकशब्देन पुत्रगतं कर्मत्वमुक्तं न तु पुत्रशब्दस्य तत्र वृत्तिरित्यस्यार्थः। सुप आत्मन इति सूत्रस्य कर्मत्वविशिष्टबो
धकसुबन्तादित्यर्थ इति तदाशयः। वस्तुतः कर्मत्वविशिष्टयोरर्थस्य द्बोधकादित्यर्थ इह भवन्त इत्यादिना समाध्यन्तरमु
क्तं वाक्यफलं विशेष्यं च नोव्यापार इति समानार्थत्वाभावात्तत्रार्थे वृत्तिर्नेतीत्याहुः। प्राच्यानुसारेण क्तस्य प्राधान्येनास्य फलमा
ह॰ क्वचिदिति॰ परे तु अत्र तु पुनः साधुत्वापेक्ष्यत इत्यध्याहार आवश्यकः॥ प्रत्ययान्तेन चायमेवार्थो वाक्येन गम्यत इष्टः पुत्रः इ
ष्यते पुत्र इति नासौ जातुचित्प्रत्ययान्तेन गम्यते नासौ जातुचिदिति॰ प्रत्ययान्तस्याकर्मकत्वात्कर्मणि प्रत्ययानुत्पादादिति कैयटः। प्राच्या
नुसारेणोक्तस्येति॰ तिङ्कृत्तद्धितसमासैरिति न परिगणनं किन्तूदाहरणमात्रमिति तद्भावः। प्राचां मतं दूषयन्स्वमतमाह॰ परे त्विति॰ इष्यत
इत्यध्याहारः। इदमपि परीत्यास्वमते तु अन्यत्राध्याहारपदार्थ उक्तः। अन्यथा तदनध्याहारे॥

मै·

अन्याप्यमिति· यद्यप्येतर्हिसम्प्रतीदानीमधुनासाम्प्रतन्तथेतिकोशात्साम्प्रतमित्यव्ययमिदानीमित्यर्थकमितिप्रतीयते। तथापिनिपातानां
मनेकार्थतयाएवम्व्याख्यातम्। एवमनुन्नारदइत्यबोधीत्यत्रेतिशब्देनोक्तत्वान्नद्वितीयेतिप्राचोक्तइ·त्वएदयति। एवमिति· अतएव· तिङ्क्त
न्नद्वितसमासैरितिपरिगणनादेव· समासइति· निपातेनाधिकरणेउक्तेपिसप्तमीभवतीतितदन्तस्यसमासइत्यर्थः। ननुनिपातेनाभिहिते।

अन्यथाक्रियार्थक्रियोपपदत्वाभावाच्छकादियोगाभावाच्चसदुर्लभःस्यात्· अध्याहारेतिच्छार्थेषुतुमुन्नितिसुलभः।
विषवृक्षोपिसम्वर्द्ध्यस्वयञ्छेत्तुमिष्यतइतियत्तदसाम्प्रतमन्याप्यमित्यर्थः। एवञ्चाध्याहृततिङभिधानान्नद्वितीया· ता
दृशेच्छायाअन्याप्यत्वञ्चतद्विषयस्यान्याप्यत्वेन· एवमनुन्नारदइत्यबोधिसइत्यादौनारदइतिनिश्रीकृष्णीयज्ञानाकारानु
करणम्· नारदइत्येतच्छब्दाभिलप्यमानाकारोबोधइत्यर्थइतिप्रथमान्तस्याप्रातिपदिकत्वान्नात्रद्वितीया· अतएवाधिहृ
रीत्यादौसमासः। तद्वचनसामर्थ्यनत्वस्यापरिगणनत्वकल्पनेवयुक्ता· अतएवास्त्र्योग्यपदइत्यादौसप्तमीकिञ्चनिपा
तेनाभिधानेपिप्रातिपदिकादुद्भूतनतच्छक्तिमत्वेनैवमानमितितत्रविभक्तिः सुलभाशब्दशक्तिस्वभावादस्यैवार्थस्यद्यो
तकोधिर्निपातः। अतएवपरिगणनप्रत्याख्यानेपिनदोषइत्याहुः ॥ अधिकरणेवचनसामर्थ्यात्सप्तमीत्यन्यत्रोक्तमेवेत्यतआ
ह· तद्वचनेति· अतएवेति· परिगणनादेव· तत्तच्छक्तिमत्वेन· अधिकरणत्वादिशक्तिमत्वेन। अत्रसाधकमाह· शब्दशक्तीति· नदोषः। न

अ सप्तम्या अनुपपत्तिः ॥

भे·भावावगाहिबोधजनकत्वस्यसिद्धान्तसम्मतत्वात्।विशेषणविशेष्यभावव्यत्यासेदोषमप्याह·किञ्चेति।।ः॥प्राचीनसम्मतबोधेदोषान्त
प्रायेण। भूतले घटः स्थाल्याम्पचतीति परित्यज्य गङ्गायाङ्घोष इत्युपात्तन्तस्य मुख्याधारपरमेवाधारपदम्भविष्यतीति कल्पनेन सामञ्जस्यमित्या-
शयात्। यथा च प्रकृते गौणत्वन्तदुपपादयति· नीरधर्मस्येति· प्रवाहे आरोप इति· एवञ्च गौणत्वं स्पष्टमेव। तीरलक्षणेति· गङ्गापदशक्यता-

एवञ्चेदं सूत्रं तिलेषु तैलमित्यादावेव प्रवर्त्तेत न हि गङ्गा तीरं वा सर्वावयवैर्व्याप्ता तीरधर्मस्य घोषाधारत्वस्यात्यन्तसामीप्यात्प्र-
वाहे आरोपोऽत्र बोध्यः। यदा तु व्यवहितो गङ्गातो घोषस्तदा गङ्गापदस्य तीरे लक्षणा तमप्ग्रहणेन शब्दसामर्थ्यगम्यः प्रकर्षो
नाश्रीयत इति ज्ञापयत इति गौणाधारस्याप्यधिकरणसञ्ज्ञा सिध्यति एवङ्गङ्गायाङ्घोष इत्यप्युदाहरणं सर्वावयवव्याप्त्यभावे
न मुख्याधारत्वाभावात् गौणमप्याधारत्वादिति तस्यादिशक्यमेवेति बोध्यम्· ॥

वच्छेदकस्य गङ्गात्वस्य तीर आरोपः। शक्यतावच्छेदकारोप एव लक्षणा तदा गङ्गापदबोध्यस्य गौणत्वं स्पष्टमेव। प्रकर्षो नाश्रीयत इति· एवञ्च
यथाकथञ्चिदाधारस्सोऽधिकरणसञ्ज्ञः। एवञ्च मुख्याधारत्वाभावेऽपि यथाकथञ्चिद्घटितेनाधारत्वेन मुख्यङ्गौणं वा सर्वमप्यधिकरणसञ्ज्ञम्।
गौणाधारस्याप्यधिकरणसञ्ज्ञायाम्भाष्यमपि साधकमित्याशयेनाह· एवङ्गङ्गायाङ्गाव इति· इदन्तत्रत्यकूपे गर्गकुलमित्यस्याप्युपलक्षणम् ॥

भे· मासनिष्ठाव्याप्यताचतादात्म्यसम्बन्धावच्छिन्ना। व्यापकतातुकालिकसम्बन्धावच्छिन्ना। व्यापकताघटकाभावश्चप्रतियोगिव्यधि
करणोविवक्षितः।अन्यथातन्मासावयवदिनेपिपद्घस्यवच्छेदेननाध्ययनत्वावच्छेदेनकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाध्य
यनाभावस्यसत्वेपिनमासमधीतइतिप्रयोगानुपपत्तिः।एकादश्यांरात्रौजागृयादित्यत्रद्वितीयातिप्रसङ्गंनिराचष्टे· एकादश्यामिति· नचैव
मप्येकादश्यान्नान्नम्भुञ्जीतेतियत्रोच्यतेतत्रैकादशीव्यापकभोजनस्यैवाभावस्तात्पर्यविषयइतिद्वितीयापत्तिरितिवाच्यम्· तादृशतात्प
र्येत्वेकादशीन्नभुञ्जीतेतिप्रयोगः प्रकृतेत्वेकादशीरूपस्यकालस्यभोजनाभावाधिकरणत्वविवक्षैवासचाभावःप्रतियोगिव्यधिकरण

स्वतन्त्रः।कारकाधिकारात्क्रियाजननेस्वतन्त्रइत्यर्थस्तदाह· क्रियायामिति· ॥

एवविवक्षितेतोनानुपपत्तिः।नचमासमधीतइत्यत्रधातोरध्ययनपूर्वकव्यापनेवृत्तिकल्पनयाकर्तुरित्येवकर्मत्वसिद्धमितिकाला
ध्वनोरितिसूत्रवैयर्थ्यमितिवाच्यम्· मासन्देवदत्तस्यकौटिल्यम्भोजनाभावश्चेतियत्रप्रयोगस्तदर्थमस्यावश्यकत्वात्· मासस्यद्विरधी
तइतियत्रप्रयोगस्तत्रमासव्यापकत्वनिवृत्तावेवतात्पर्यन्नतुमासाधिकरणकत्वनिवृत्ताविति कृत्वोर्थप्रयोगइतिसूत्रेण षष्ठ्येवनतु
नेनद्वितीयेतिवोध्यम्।इतिद्वितीयाविवरणम्। स्वतन्त्रः कर्ता· अत्रस्वतन्त्रपदमन्यानधीनव्यापाराश्रयपरम्सचव्यापारोनप्राद्वा
च्यः किन्तुकारकाधिकारादुपस्थितक्रियारूपइत्याह· कारकाधिकारादिति· ईदृशंनेपस्तीत्याह· क्रियाजननइति· तत्रप्रयोज्यनि
ष्ठव्यापारात्मकक्रियाजननेप्रयोजकः स्वतन्त्रएव ॥

शु·शे·
टी·भै·
५७३

भै· एवञ्च· उक्तव्यवस्था सिद्धौ च। ननु व्यवधानेन फलोत्पादकेऽपि करणत्वं दृश्यते। यथा राजा चतुर्भिरुपायैः शत्रून्वशीकरोति। अत्रामात्यभ
टादिद्वारैव वशीकरणं न साक्षात्। न चाव्यवधानविवक्षया तथा प्रयोग इति वाच्यम्। तथा सति व्यवधाने न यत्र फलोत्पादस्तत्र सञ्ज्ञान्तरस्य
प्राप्त्या तृतीयाया अप्राप्त्या तादृशोक्तप्रसङ्गेरिति चेन्न· नटस्य शृणोतीत्यत्र नटे गीतद्वारा क्रियाजनकत्वेन कारकत्वस्वीकारात्करणत्वप्रा॰
प्त्यनद्यात्तन्मर्थ्यन्तमप्र हरणमित्यापायात्। करणत्वोपचारेणेत्यस्य करणत्वप्राप्त्येत्यर्थः। तत्र नटस्य कारकत्वेऽप्याख्यातोपयोग इति सूत्रस्थमु
पयोगग्रहणं क्लिमर्थम्· नटस्य शृणोतीति भाष्यमेव साधकं बोध्यमिति दिक्। दिगिति· दिगर्थस्तु पूर्वोक्तगौणाधारस्याधिकरणसञ्ज्ञाया अप्राप्तु

एवञ्च व्यवधानेन फलोत्पादके करणत्वोपचारेण तृतीयान्तप्रयोगस्य साधुत्वबोधनं तन्मफलम्। एतन्तमवशादेवान्यत्र॰
त्वरितत्वमिति ज्ञापनमिति दिक्· स्पष्टञ्चेदं स्वरितेनेति सूत्रे भाष्ये· रामेणेति· कर्तृतृतीयायाः कर्तृत्वादिशक्तिमान्कर्तृक्रियाभावः
सम्बन्धश्चार्थः करणतृतीयायाः करणत्वशक्तिमान्क्रियाकरणभावः सम्बन्धश्चार्थः। तच्छक्तिमत्त्वञ्च व्यापारवत्त्वमेव रामकर्तृक
बाणकरणकप्राणवियोगाश्रयो वालीति बोधः। प्रकृत्यादिभ्य इति· ॥ पपादनाय यत्नौणामुख्यन्यायोपन्यसनप्राचान्तदसङ्गतमेव। त
स्य न्यायस्य पदकार्यविषयत्वाद्विशिष्टरूपोपादानविषयत्वाच्चेति· तच्छक्तिमत्त्वम्· करणत्वशक्तिमत्त्वम्। व्यापारवत्त्वमेवेति· अत एव करणत्व
व्यापारनियतमिति वक्ष्यमाणं सङ्गच्छते। प्रकृत्यादिभ्य इत्यत्रादिशब्दः प्रकारे। समुदायघटकेभ्यस्तृतीयेत्यर्थः। नाम्ना सुतीक्ष्णश्चरितेन दान्तः
अत्र नामपदार्थस्याभेदः सुतीक्ष्णपदे भासते। चरितेन दान्त इत्यत्र चरितपदार्थस्य प्रकृतिस्वरूपस्य दान्तत्वेऽन्वयः। घटत्वेनाभावः। अ
त्र तृतीयार्थोऽवच्छिन्नप्रतियोगिताकत्वम्। पट इति ज्ञाने पटत्वेन पटस्य विषयत्वं नतु द्रव्यत्वेनेत्यत्रावच्छिन्नत्वं तृतीयार्थो बोध्यः ॥

मे प्रकृत्याचारुः। प्रकृतिः स्वभावः। प्रकृतिसम्बन्धिचारुत्ववान्। नचकृतद्गत्यध्याहारेणाकारणएवतृतीयाऽस्तु। घटत्वेनेत्यादिष्वपिघटत्वा
दिपदानाद्गु घटत्वावच्छिन्नप्रतियोगिताकत्वलाक्षणिकतयाज्ञातद्गत्यस्याध्याहारेणाकरणएवतृतीययासिद्धिरितिवाच्यम्· यदानमस्या
ध्याहारस्तदाशेषलक्षणाषष्ठीप्राप्नोतितद्बाधनार्थमस्यावश्यकत्वात्। प्रायेणयाज्ञिकः। प्रायः पदमाचारातिशयपरम्। ज्ञातद्गत्यस्यचाध्या
हारः। आचारातिशयेनयाज्ञिकद्गत्यर्थोज्ञातद्गत्यर्थोविवक्षितः। गोत्रेणगार्ग्यः। गोत्रसम्बन्धिगार्ग्यत्ववान्। सामान्यविशेषभावेनान्वयः। समे
नविषमेणेतीत्यादौद्वितीयार्थेतृतीया। द्विद्रोणेनधान्यङ्क्रीणाति। यात्रादित्वात्त्रीत्यभावः। परिच्छेद्यत्वन्तृतीयार्थः। तस्यधान्येऽन्वयः। सुखेनदुःखे

इदंयथाप्रयोगंसर्वविभक्त्यपवादः। दिवः कर्मच· चेनसञ्ज्ञयोस्समावेशः। तेनदिवः साधकतमस्यशक्तिद्वययोगोवोध्यते·
तेनाक्षैर्दीव्यतेइत्यत्रतृतीयापरत्वात्· कर्मत्वाच्चाकर्मकत्वमयुक्तपरस्मैपदाभावः। अत्रविप्रतिषेधशास्त्रबलात्तृतीयैव
शक्तिद्वयवोधिका· यदाक्षाणाम्फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षातदाक्षान्दीव्यतीत्यादिसाधु·॥ नयातीत्यत्रसु

खदुःखपदन्तत्साधनपरम्। तच्चयाधात्वर्थफलेऽभेदेनान्वेतीतिद्वितीयायाम्प्राप्तायामनेनतृतीया। शक्तिद्वययोगइति· करणत्वकर्मत्वा
त्मकशक्तिद्वययोगइत्यर्थः। तेन· सञ्ज्ञाद्वयसमावेशेन। परस्मैपदाभावइति· अणावकर्मकाच्चितिसूत्रेणप्राप्तइत्यादिः। ननुकरणरूपेऽ
र्थेतृतीयाया विधानेनकथन्तृतीययाकर्मत्ववोधनमतआह· अत्रेति· अत्रकार्यकालपक्षेकर्मत्वसामानाधिकरण्यविशिष्टमपिकरण
त्वम्प्रकृतसूत्रप्रदेशोपस्थितकर्तृकरणयोरितिसूत्रघटककरणपदेनगृह्यतइतितृतीयैवोभयवोधिकेतिभावः। ननुतर्ह्यक्षान्दीव्यतीति
नैवस्यादतआह· यदाक्षाणामिति· अत्रेष्टपरिवर्तनाद्यनुकूलव्यापारोदीव्यतेरर्थः। फलञ्चेष्टपरिवर्तनन्तदाश्रयत्वसमानाधिकरणकर्म

शा॰शे॰ टी॰भै॰ भै॰ ननु पूर्ववत्षष्ठीप्राप्त्या कथम्मनसादेव इति हरदत्तोक्तः प्रयोग इत्यत आह॰ मनसादेव इत्यादाविति॰ अस्य सञ्ज्ञात्वेन मनसः सञ्ज्ञायामित्यलु
क् असञ्ज्ञात्वे तु तत्पुरुषे कृतीति सूत्रघटकबहुलग्रहणेनालुक्॰ ननु मनसो दिवुधात्वर्थसाधकतमत्वसमानाधिकरणकर्मत्वशक्तिमत्त्वा
४१५ त्कथन्तृतीयेत्यत आह॰ हेतुतृतीयानेनेति॰ अत्र कर्मणि॰ दिवः कर्म चेति सूत्रबोधितकर्मत्वशक्तिमति। तृतीयापत्तिरिति॰ दीव्यतेऽक्षा इत्या
दावित्यादिः। इदमुपलक्षणम्। देवना अक्षा इत्यत्र ल्युटा करणत्वस्याभिधानेपि कर्मत्वस्यानभिहितत्वात्षष्ठ्यापत्तिरिति॰ तद्वत्प्रकाशेन॰

अक्षाणान्देवितेत्यादौ तृतीयातः परत्वात्कृद्योगलक्षणा षष्ठी मनसादेव इत्यादौ हेतुतृतीयान्तेन पचाद्यजन्तदेवशब्दस्य
समासः। न च शक्तिद्वयस्वीकारेऽत्र कर्मणि लकारे करणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिरिति वाच्यम्॰ अपादानमुत्तराणी।
त्यस्योदाहरणे गान्दोग्धीत्यादौ तत्र कर्मणि लकारे पञ्चम्यापत्तिवारणायैव द्रव्यगतानेकशक्तिमध्ये एकस्या अभिहितत्वेऽ
परस्या अपि तद्वत्प्रकाशनात्ततः। एकैव शक्तिः सञ्ज्ञाद्वयोपयोगिनी इति तु चिन्त्यम्॰ कर्मादिपदानाङ्कर्मत्वादितत्तच्छक्तिरू
पेण बोधकतया तयोर्भेदस्यैवौचित्यादिति मञ्जूषायां विस्तरः ॥ अभिहितशक्तिवत्प्रकाशेन अस्मिन्नर्थेऽपादानमुत्तराणि का
रकाणि बाधन्त इति भाष्यमेव मानम्. तथा हि॰ सञ्ज्ञयोः स्वतो न विरोधः। कृत्कृत्यसञ्ज्ञयोरिव समावेशासम्भवात्। किन्तु फलद्वा ४१५
रक एव बाध्यः सोपि चेन्नाश्रीयते तदा परत्वादित्यसङ्गतमेव स्यादिति तथा कल्पनमावश्यकमिति माचामुक्तिङ्खण्डयति। ए
कैवशक्तिरिति॰ तत्पूर्वकत्यागः। फलप्राप्तिपूर्वकत्यागः। एवञ्चाह्ना क्रोशेन वाऽनुवाकोधीत इत्यत्र त्यागस्तृतीयार्थः।
अहर्व्यापकत्यागप्रतियोग्यतीताध्ययनकर्मानुवाक इति शाब्दबोधः ॥

भे· प्रकृतसूत्रभाष्यइति· तत्रहितमपूग्रहणङ्किमर्थम्। सर्वेषाङ्कारकाणाङ्ग्रहणंसञ्ज्ञासमावेशेनेतिविचारे पूर्वसञ्ज्ञानामपवादत्वात्परसञ्ज्ञानाञ्च तथैववाधकत्वम्भविष्यतीत्यभिधायधनुषाविध्यतीत्यत्रापाययुक्तत्वादपादानसञ्ज्ञासाधकत्वाच्चकरणसञ्ज्ञाप्राप्नोति।एवन्तर्हिलोकेऽभिरूपायकन्यादेयेति।नचानभिरूपेप्रवृत्तिरस्तितत्राभिरूपतमायेतिगम्यतेएवमिहापिसाधकङ्करणमित्युच्यतेसर्वाणिचकारकाणिसाधकानिनचासाधकेप्रवृत्तिरितिसाधकतममितिविज्ञास्यते।एवन्तर्हिसिद्धेसतियत्तमग्रहणङ्करोतितज्ज्ञापयत्याचार्यःकारकसञ्ज्ञायान्तरप्

इदम्प्रकृतसूत्रेभाष्येस्पष्टम्· यदितुमहासञ्ज्ञयान्तराक्षेपकरणसमर्थम्प्रति·आधारादिपदञ्चरितार्थम् साधकशब्दस्य व्यापारानन्तरमव्यवधानेनफलोत्पादस्तत्रशक्तिराधारशब्दस्यचाध्रियतेयस्मिन्नितिव्युत्पत्त्याकर्त्तृकर्मणोर्धारणक्रियाम्प्रति सर्वावयवव्याप्त्याय·आधारस्तत्रशक्तिरित्युच्यते तदुक्तप्रयोगादिसाधनायकारकप्रकरणेउद्देश्यवाचकेस्वरितत्वप्रतिज्ञया गौणाधारादेर्ग्रहणम्वाच्यम् स्वरितेनाधिकङ्कार्यमित्यर्थात् तमपातुप्रकृतेतदभावोबोध्यते ॥

तमप्योगोनभवतीति।आधारमाचार्यःकिन्त्वाप्यमन्यतेयत्रकृत्स्नमाधारमाव्याप्नोतितेनेहैवस्यात्तिलेषुतैलन्दधिसर्पिः।गङ्गायाङ्गावः कूपेगर्गकुलमित्यत्रनस्यात्।कारकसञ्ज्ञायान्तरतमप्योगोनभवतीत्यत्रापिसिद्धम्भवतीतिपक्षान्तरमाह· यदित्विति· चरितार्थमिति· अन्यथासञ्ज्ञिलाभोनस्यात्।युक्त्यन्तरमाह·साधकशब्दस्येति· संसिद्ध्यर्थकधातुनिष्पन्नत्वात्।उक्तप्रयोगादिति·गङ्गायाङ्गावः।कूपेगर्गकुलमितिप्रयोगसाधनायेत्यर्थः।प्रकृतेउद्देश्यवाचकेसाधकपदे· तदभावः।स्वरितत्वाभावः।तमपातुप्रकर्षोबोध्यतइत्यव्यवधानलाभः ॥

शा॰ शे॰ भैं॰ यद्यपि पुत्रेण सहागतः। पितेत्यादौ पुत्रशब्दार्थस्य निरुक्तसाहित्येऽन्वयेऽर्थात्तदन्वयित्वं तथापि न शाब्दबोधविषयभूततदन्वयित्वमुक्तसा
टी॰ भै॰ हित्यवान्पिता आगमनकर्त्तेत्येव हि बोध इष्यते। तच्छब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावस्तत्रास्ति। एकेनैव सुपुत्रेण सिंही स्वपिति
४९५ निर्भया। सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ विद्यमानवाचीसहशब्दप्रयोगेप्यनेन तृतीया। पुत्रशब्दार्थक्रियान्वयित्वमेव नेति विशेष्याभा
वाद्विशिष्टाभावोऽस्त्येव। न च विद्यमानता विशिष्ट एव सहशब्दार्थोस्तु। पुत्रशब्दोत्तरतृतीयाया उपपदविभक्तित्वेन षष्ठ्यपवादतया सहशब्दा
र्थेऽनन्वयापत्तेः। यदि विद्यमानैः पुत्रैर्युक्ता गर्दभीत्यर्थस्तत्रापि पतेतदा कर्तृकरणयोरित्येव तृतीया भविष्यति। सह युक्त इति सूत्रे द्विविधोपि।

यद्यपि पुत्रेण सहागत इत्यादावागमनक्रियाकर्तृत्वादेव पुत्रात्तृतीया सिद्धा तथापि पुत्रेण सह स्थूल इत्याद्यस्य मुख्यमुदाहर
णमिति भाष्ये स्पष्टम्॰ अङ्गेन॰ अवयवेन इदं सन्निधानलब्धम्॰ अङ्गिनोऽवयविनः सूत्रे अङ्गशब्दोऽपि आद्यजन्तो व्याख्या
नादिति भावः। अक्ष्णा काण इति॰ यद्यप्यक्ष्ण एव काणत्वं तथाप्यवयवधर्मस्य समुदाये आरोपाच्छरीरे तदवच्छिन्ने च व्यवहारो।

सहार्थे गृह्यत इति दिक्॰ सन्निधानलब्धमिति॰ अङ्गशब्दस्याङ्गिपरतया तत्सन्निधानेन यच्छब्दोऽङ्गपर इति भावः॥ निरूढ इति बोध्यम्॰
। व्याख्यानादिति॰ अङ्गशब्दोयं समुदायशब्द इति भाष्यमूलकादित्यर्थः। अक्ष्णैव काणमिति॰ अस्याक्षिकाणमिति व्यवहारस्य सुप्रसिद्धत्वात्।
तथा च पुरुषे काणत्वरूपधर्माभावेनाक्ष्णा काण इति व्यवहारो नोपपद्यत इति भावः। अवयवधर्मस्य काणत्वस्य। समुदाये। काणावयवघ
टितसमुदायसमवेतेऽवयविनि। तदवच्छिन्ने तादृशावयवव्यवच्छेद्ये चैत्रादौ अक्षिगतविकारवाचक एवेति॰ तथा च काणोयमित्येतावता
सर्वसामञ्जस्येऽक्ष्णेति प्रयोगानप्राप्तीति भावः॥

भे॰ द्वौविप्रावितिवदन्ति॰ एवञ्चसम्भेदेनान्यतरवैयर्थ्यमितिन्यायेनतादृशोऽत्रप्रयोगः। यद्यपिचक्षुर्नोशावान्तचक्षुष्कः काणपदार्थत्वेन लोकप्रसिद्धः। तथापिकाणनिमीलनइत्यभियुक्तवचनस्वरसादानिश्चायनिकप्रकरणस्थभाष्यस्वरसाच्चाह॰ लेशतोपीति॰ प्रकारमात्रपर इति॰ इदमस्थ्यमुरितिथमुप्रत्ययान्तोयद्यप्ययमिदंशब्दार्थसन्निकृष्टाभिन्नप्रकारप्रतिपादकइतिप्राप्तमेवञ्चप्रकारसामान्यस्यलाभो

यद्यपिकाणशब्दोऽक्षिगतविकारवाचकएवतथापिद्वौविप्रावितिवदस्णोतिप्रयोगस्यसाधुत्वमीदृशरीत्याईदृशानांसाधुत्वेचेदमेवमानंषष्ठ्यपवादोऽयमित्याह॰ अक्षिसम्बन्धीति॰ अङ्गविकारः किमिति॰ अङ्गग्रहणप्रयोजनप्रश्नः। अक्षिकाणमिति॰ प्रथमान्तबाधित्वात्रैवस्यात् लेशतोऽपिदर्शनसामर्थ्यहीनत्वङ्काणत्वम् इत्थशब्दः प्रकारमात्रपरः। प्राप्त्यर्थोद्भवः कर्तरिक्तः कर्मविभक्त्यन्तेनेत्थंशब्देनभूतशब्दस्यसमासः। लक्षणशब्दः करणप्रधानः तस्यकर्मषष्ठ्यन्तेनेत्थम्भूतशब्देनसमास इत्याह॰ कञ्चिदित्यादि॰ जटाभिरिति॰ यद्यपिताभिस्तापसोज्ञातइत्यर्थेज्ञानक्रियायाङ्करणत्वादिदंसिद्धन्तथापिकरणत्वाविवक्षायांलक्ष्यलक्षणभावमात्रविवक्षायान्तृतीयार्थमिदम्। इत्थम्भूतस्ययत्रलक्षणवाचकात्पृथगुपस्थितिरेवतत्रैवानेन तृतीयातेनकमण्डलुपाणिञ्छात्रमद्राक्षीदित्यादौकमण्डलुपदान्नतृतीया॥

तस्मात्तथापिप्रकृत्यर्थविशिष्टप्रत्ययमात्रेस्यलक्षणेतिभावः। एवञ्चकश्चिद्धर्मस्मान्नोयेनलक्ष्यतेतद्वाचकप्रातिपदिकात्तृतीयेतिसूत्रार्थः। सूत्रवैयर्थ्यमाशङ्कते। यद्यपीति॰ प्रकृतसूत्रविषयेप्राचीनोक्तविशेषमाह॰ इत्थम्भूतस्येत्यादिना॰ लक्षणवाचकात्पृथगुपस्थितिः। शक्त्यालक्षणवाचकशब्दजन्योपस्थित्यविषयत्वम् किन्त्वन्यशब्दजन्योपस्थितिविषयत्वम्। नतृतीयेति॰ अस्यलक्षणवाचकोपः कमण्डलुपाणिशब्दस्तज्जन्योपस्थितिविषयत्वादिति

पा.प्रो. भे· अनवयवत्वादिति· प्रातिपदिकसञ्ज्ञाप्रवृत्तिकाले तस्मिन्नित्वेनाभिमतसमुदायघटकत्वं यस्य तस्य तदवयवत्वमिति भावः। अत्र प्र
टी.भे. माणं तु प्रकृतसूत्रस्थभाष्यमेव। तत्र हि इत्थम्भूतस्य लक्षणेन तस्य प्रतिषेध इति वार्तिकम्। तत्स्थे· लक्ष्यवाचिपदस्थे। अपि भवान् कम
४२९ ण्डलुपाणिं छात्रमद्राक्षीदिति। नवेत्थम्भूतस्य लक्षणेनाष्ठ्यभावात्। यत्रेत्थम्भूतस्य षष्ठ्यन्तभूतं लक्षणं तत्र भवितव्यमित्युक्तम्। कैय

न चोत्पन्नायास्तृतीयायाः सुपो धात्विति लुगिति वाच्यम्· कृतसमासेन तस्या उत्पन्नायाः समासरूपप्रातिपदिकानवयवत्वादिति कै यटस्याशयः। कमण्डलुः पाणौ यस्येति बहुव्रीहिः। परे तु कमण्डलुपाणिशब्दादत्र तृतीयापत्तिः कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्तदुक्तमनुर्लक्षणे इति सूत्रे भाष्ये सकृदप्येतौ कमण्डलुपाणिं छात्रौ दृष्टस्तस्य तद्वि लक्षणं भवतीति तद्वेत्यस्य कमण्डलुपाणित्वमेवेत्यर्थः। कमण्डलोर्लक्षणत्वे हि स एवेति वदेत्। किञ्च तन्मध्यपतितन्यायेन तद्विशिष्टस्य प्रातिपदिकत्वेन तदनवयवत्वोक्तेरनौचित्येन लुको दुर्वारत्वम्। अत एव नरम्मन्य इत्यादावविजन्तस्योत्तरपदपरत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः सुपो धात्विति लुक् अम्विधिसामर्थ्येन वारित इत्येकाचामिति सूत्रे भाष्ये इत्याहुः। सञ्ज्ञो· देवादिकस्य जनेर्न ग्रहणं तस्याकर्मकत्वादित्याह· जानातेरिति· कर्मत्वप्राप्तिरेवात्र तृतीयार्थः। हेतौ· हेतुरिह कारणत्वशास्त्रीयः। तस्य कर्तृसञ्ज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः॥

देइत्यनेन सूचितामरुचिं प्रकटयति। परे त्वित्यादिना। कैयटोक्तमभ्युपेत्यापि दूषणमाह· किञ्चेति· अत एव· पश्चादुत्पन्नस्यापि तन्मध्यप तितन्यायेन तदवयवत्वादेव· यदुक्तं ज्ञानातेरिति तन्निमित्तमाह· जानातेरिति· ॥ ६ ॥ ॥ ॥

दि

मैः तथात्रभूतेविहितनिषेधत्यागस्यलाभेतृतीयायास्तत्रप्राप्तिकल्पनमनर्थमितिवाच्यम् तयाऽतीसत्वलाभेपिनिवृत्तिरूपस्यत्यागस्याप्रती
तेः। अतीतत्वंहिवर्तमानध्वंसप्रतियोगिसमयकत्वम् निवृत्तिश्चपुनरनुत्पादनमितिभावः। क्रियाँसमानकालेति अत्रादिनागुणद्रव्याभाव
सङ्ग्रहः। यदागुणप्रधानभावेनैतेषुद्वयोः सम्बन्धस्तदासाहित्यवाचिसहशब्दस्यप्रयोगोभवति। यथापुत्रेणसहागतः। पुत्रेणसहस्थूलः। देव

ले

फलप्राप्तिरिति तस्याश्चसत्याम्प्रयोजनाभावादेवनक्रियाप्रवृत्तिरितिफलप्राप्तिप्राक्तनत्वेत्यागउच्यते त्यागस्यचफलप्रा
प्तिर्व्यङ्ग्येत्यन्यत्रविस्तरः। नायातइति अनेनफलाप्राप्तिरेवस्फुटमुच्यते सहयुक्ते पृथग्विनानानाभिस्तिवत्सहेनेत्येवसिद्धेयुक्त
ग्रहणंशब्दविशेषानादरेणार्थयोगेभवत्वित्यर्थमित्याह सहार्थेनेति अतएवकचिच्छब्दयोगंविनापिभवतितदाह विनापीति
न्यायसिद्धेऽर्थेलिङ्गमप्याह वृद्धइति सहार्थः साहित्यम् तच्चतत्समभिव्याहृतक्रियादिसमानकालिकत्वक्रियादिमत्वम्। कचित्स
मानदेशक्रियावत्त्वम् अतएवमाषवापोत्तरन्नैवसेत्रेतिलवापेतिलैःसहमाषान्वयतीतिभवति ॥ दत्तेनसहचैत्रस्यधनम्

देवदत्तेनसहचैत्रस्यनाशः। यद्यपिनाशोपिक्रियैवतदाचैत्रेणस हमैत्रस्याभावइत्युदाहरणम्। अभावपदेननञोविरोध्यर्थकत्वाद्भाववि
रोधीपदार्थविशेषएवाभावः। स्पष्टञ्चेदम्मञ्जूषायाम्। समानदेशक्रियावत्वम्। समानोदेशोऽधिकरणरूपोयस्यास्तादृशीयाक्रियातद्वत्त्व
मित्यर्थः। अतएव द्वितीयस्यप्रकारस्याश्रयणादेव। एतत्सूत्रोदाहरणविषयेऽप्राधान्यञ्चशब्दगुणाद्यन्वयित्वाभावरूपम् ॥

शा०शे० भै० क्रियारूपस्याध्याहारेणार्थानुसन्धानस्य पदाजन्यतया शाब्दबोधनियामकत्वासम्भवेन तस्यार्थस्य शाब्दबोधविषयत्वासम्भवा
टी०भै० त् नापि शब्दानुसन्धानम् उच्चारितस्यैव शब्दस्योच्चारितः शब्दः प्रत्यायको नानुच्चारित इति भाष्योक्तेरनुसन्धीयमानस्य शाब्दबोध
४२७ जनकत्वासम्भवात् पिण्डीमित्यस्यैकदेशस्य शक्तिरेव कल्प्यतेऽतस्तावन्मात्रादर्थबोधस्तथा च तेऽपीत्याशयेनाह अमेणत्यादि पदजे

नन्वलं अमेणत्यादौ क्रियावाचकपदाभावात् क्रियाया अप्रतीत्या कथं कारणत्वमत आह गम्यमानापीति अमेण
त्यादिपदजबोधविषयापीत्यर्थः । न तूच्चार्यमाणतद्वाचकपदजबोधविषयैवेति भावः । अलंशब्दो निषेधार्थस्तदाह मा
ध्यन्नास्तीति नतु साध्यमित्यर्थज्ञाने पि तस्य अमेणेति नामार्थत्वेन न क्रियात्वमत आह इहेति स्ववाच्यक्रियाम्प्रति स्वस्य क
रणत्वमित्यर्थः स्पष्टश्चेदमिष्यण इति सूत्रे प्रविश पिण्डीमिति वाक्यार्थे वाक्यैकदेशप्रयोग इत्यादिना भाष्य इति मञ्जूषायां
विस्तरः अशिष्टेति अशिष्टानां सङ्कीर्णाचाराणां यो व्यवहारः क्रियातद्बोधकप्रयोगप्रत्यासत्त्यात्मसम्बन्धेन व्यवहा
रस्य सङ्कीर्णाचारत्वेन तद्वाचकाच्चतुर्थ्यर्थेन तीयेत्यर्थः ॥ त्यादिना नामार्थत्वेन ऋुवनार्थत्वेन । त्वा वाच्येति स्ववाच्य
विशिष्टाया वाक्यैकदेशसाध्यमित्यर्थसाधनक्रियातां प्रति स्वस्य अमेणेत्येकदेशार्थस्य करणत्वव्यवहार इत्यर्थः । वस्तुतस्तु
अमेणालमिति वाक्यप्रयोगस्थले ज्ञातव्यम् । अशिष्टव्यवहारेत्यत्र कर्मधारयभ्रमनिवारणायाह अशिष्टानामिति अशि
ष्टपदमत्र नशिष्टभिन्नपरम् श्रुतिस्मृत्यादिप्रामाण्याभ्युपगन्तॄणामपि रागोत्कर्षात्तादृशव्यवहारस्थले दोषाभावसंयच्छ जेति प्रयोगदर्शना
दत आह सङ्कीर्णाचाराणामिति कालभेदेन धर्माधर्मफलकाचारकर्तॄणामित्यर्थः ॥

मे·। प्रकृते च दासीशब्दार्थस्य रतिफलके दाने सम्प्रदानत्वेनान्वयात्तादृशव्यवहारः सङ्कीर्णाचारकर्तृकत्वमिति भावः। दास्यां संप्रयच्छते इत्यत्र दाणश्च
सा चेच्चतुर्थ्यर्थे इति सूत्रेणात्मनेपदम्। भार्यायां शास्त्रोक्तरीत्या विवाहितायां तस्यै दानानन्तरं यत्र तत्र त्रीत्यनन्तरं तस्या उपयोगस्तत्र न चतुर्थ्यर्थे तृतीया अ
शिष्टव्यवहाराभावादिति न तत्रात्मनेपदमित्याशयेनाह· मूले धर्मेत्विति·॥ इति तृतीयाविवरणम्। दानस्य कर्मणेति तत्स्य घटक दानेति प्रातिपदिकार्थ
स्य न क्रियात्वमिति दानस्य करणत्वमनुपपन्नमत आह· दाधात्वर्थस्येति· इदमिति· दाधात्वर्थस्यैतत्। अत एव भाष्ये क्रियाग्रहणं कर्तव्यम्। इहापि य
था स्यात्। श्राद्धाय निगर्हते। युद्धाय सन्नह्यते। पत्ये शेते इति· तत्तर्हि वक्तव्यं न वक्तव्यम्। कथम्। क्रियां हि नाम लोके कर्मेत्युपचरन्ति कां क्रियां करि
ष्यसि। किं कर्म करिष्यसीति भाष्ये उक्तम्। श्राद्धायेति· श्राद्धं निन्दति नास्तिकत्वात्। युद्धायेति· युद्धविषयकं सन्नहनपूर्वकं निश्चयं करोतीत्यर्थः।

दास्येति· दासी सम्प्रदानकं रतिफलकं दानमिति बोधः॥ इति तृतीया॥ दानस्येति· दाधात्वर्थ
स्येत्यर्थः। इदमुपलक्षणं क्रियामात्रस्य कर्मणेति· सम्बद्धमिति शेषः ॥ ६ ॥

पत्ये शेते इति· पतिमुपसृत्य शेते इत्यर्थः। कर्मणेत्यत्र कर्मपदं न यत्किञ्चित्क्रियाकर्मपरम्। किन्तु चारितवाक्यघटकधात्वर्थक्रियाकर्म
परम्। एवञ्च कर्मसम्बन्धवत्त्वेनेच्छाविषयो यस्तत्सम्प्रदानं स्यादिति सिद्धम्। अत एव अजां ग्रामं नयतीत्यत्र न ग्रामस्य सम्प्रदानत्वं तत्र ह्य
जा ग्रामसम्बन्धो जायतामित्येवेच्छा न तु ग्रामो ऽजासम्बन्धो जायतामित्याकारेच्छा। पदानुसंयोगानुकूलव्यापारमात्रं धात्वर्थः ग्रामसं
स्कारार्थञ्चाजां नयन्नत्र ग्रामायाजां नयतीति भवत्येव। कर्मणेति तृतीयोपपत्तये आह· सम्बद्धमिति·॥ ७ ॥ ॥

मै· सत्वादीति· आदिनास्वामित्वपरिग्रहः। स एव· सम्प्रदानत्वप्रसक्तिमानो। ननु कर्मणेति न कर्तव्यम्। यमभिप्रैतीत्युक्त्यापि उद्देश्यस्य लाभात्। क्रियाग्रहणञ्च न कार्यमित्यपरमत्र कुत्र भविष्यतीत्याशयेनाह· कर्मणेति किमिति· उद्देश्यतया धात्वर्थफलाश्रयत्वेनेच्छाविषयत्वादुद्देश्यत्वम्। अतएवान्तरङ्गत्वमप्यमतोऽस्य धात्वर्थफलाश्रयत्वप्रकारकेच्छा ततो विप्रादेस्तत्सम्बन्धित्वप्रकारकेच्छेति। कर्मणा योऽभिप्रैतीति कर्मणाऽभिप्रैतीत्युक्ते व्याख्यातार्थकर्तुरुपस्थितत्वाद्योऽभिप्रैतीत्यस्य लाभो भविष्यतीत्यभिप्रायः। न च यं सङ्गत्यस्याध्याहारो भविष्यतीति वाच्यम्·

अभिप्रैति· इच्छति कर्मणा सम्बन्धश्च सत्वादिरूपः सम्प्रदानत्वप्रसक्तिमान् सम्प्रदानचतुर्थ्यर्थः। स एवोद्देश्य इत्युच्यते· क्रियाकारकभावः सम्बन्धश्च तदर्थः विप्रसम्प्रदानकं दानमिति बोधः। कर्मणेति किम्· तदभावे हि कर्मणोप्युद्देश्यतयान्तरङ्गत्वात्तस्यैव सञ्ज्ञा स्यात् कर्मसञ्ज्ञाया तु पर्यायो भविष्यति यं सग्रहणं किम् तदभावे हि कर्मणा योऽभिप्रैति ब्राह्मणादिस्तस्यैव स्यात् कर्तृसञ्ज्ञात्वकर्मकविषये सावकाशा न च कर्तुः कर्तृत्वाभावे कथङ्गोः कर्मत्वम्। कर्मसञ्ज्ञायाङ्कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वात्॥ ९ ॥

अतपदार्थसम्बन्धेनैवाकाङ्क्षापूर्त्तेरध्याहारे मानाभावात्। ननु कर्तुरीप्सितं हि कर्म भवति। न हि तदा कर्तास्तीति कथं कर्मसञ्ज्ञेत्याह· न चेत्कर्तुरिति· स्वतन्त्रोपलक्षणत्वादिति· स्वातन्त्र्यञ्च धात्वर्थप्रधानीभूतव्यापाराश्रयत्वं तच्च प्रकृते कर्तृसञ्ज्ञाभावेप्यक्षतमेवेतिभावः। कर्तुः सम्प्रदानत्वेष्टापत्तिरिति तु न भणितव्यम्। उपाध्यायाय शिष्येण गौर्दीयत इति प्रयोगाय तत्र शिष्यायोपाध्यायस्य गौर्दीयत इति प्रयोगापत्तेः॥

मे॰ लौकिकहेतुरपिकरणमिति॰ व्यापारवदसाधारणङ्कारणङ्करणमितिलोकवत्प्रसिद्धेः। करणन्त्विति॰ कर्तृकरणयोरितिसूत्रघटकक
रणपदस्वार्थत्वमित्यर्थः। साधकतममितिसूत्रेणक्रियाजनकस्यैवकरणसञ्ज्ञाविधानात्। वैषम्यान्तरेति॰ लौकिककरणत्वस्यहेतुत्वा।
पत्तस्येत्यादि। भिन्नैवेति॰ हेतुत्वव्याप्तिः॰ हेतुत्वरूपोधर्मः। सचाखण्डोपाधिर्हेतुर्हेतुरितिपुण्यादिष्वदृष्टेव्यापाररहितेपिव्यवहारादिति।

ननुलौकिकहेतुरपिकरणमित्यत आह॰ द्रव्यादीति॰ आदिनागुणक्रियेसाधारणमिति॰ तज्जनकेपिवर्त्ततइत्यर्थः।क
रणन्तुक्रियाजनकमेवेतिभावः। वैषम्यान्तरमाह॰ निर्व्यापारेति॰ करणन्तुव्यापारवदेवेतिभावः। एवञ्चकरणत्वव्याप्तेर्भि
न्नैवहेतुत्वव्याप्तिरत्रतृतीयार्थइतितात्पर्यम्॰ स्फुटप्रतिपत्तयेकरणेवैलक्षण्यमाह॰ करणन्त्विति॰ हेतुहेतुमद्भावए
वतृतीयार्थः दिष्टेव्यापारसत्वेपिक्रियाजनकत्वाभावान्नकरणत्वम्॰ पुण्येक्रियाजनकत्वेपिनिर्व्यापारत्वान्नतत्वम्॰ फ
लमपीहेति॰ इहैतत्सूत्रोदाहरणेक्वचित्फलमपिहेतुत्वेनविवक्ष्यतइत्यर्थः। तस्यापिस्वज्ञानद्वाराजनकत्वात्। एत
च्चप्रत्ययइत्यादिसूत्रेषुकैयटेस्पष्टम् ॥ भावः। तथाचनेदंसूत्रङ्कर्तृकरणयोरितिसूत्रेणगतार्थम्। एवम्व्याख्यानेहेतुत्वविव
क्षायांबीजमाह॰ तस्यापीति॰ जनकत्वात्। क्रियासाध्यकप्रवृत्तिजनकत्वात्। इत्थंहिलौकिकः। क्रमः। फलज्ञानम्। ततः फले
च्छा। ततस्तदुपायज्ञानम्। अथोपायधर्मिकफलसाधनताज्ञानम्। ततस्तदुपायेच्छा। ततः क्रियांसाधयितुम्प्रवृत्तिरिति। गम्यमा
नापीत्यस्यानुसन्धीयमानाध्याहृतेत्येवम्व्यवह्रियमाणेतिनार्थः ॥

भे पार्थ्यपदस्य चेति सूत्रेणागतार्थतानमवतान्यथाविप्रम्योपयितुमित्याद्यर्थकल्पनाऽस्य सूत्रस्य तेन सूत्रस्य तेन सूत्रेणगतार्थेनास्यात् ॥
॥ अतएव सम्प्रदानसंज्ञासत्वात् एव यत्तु चतुर्थीसमासे कारकपूर्वपदत्वात् अन्तिकारकोपपदादिति सूत्रं तद्विषयेप्रवर्त्ततेइति तन्न तादर्थ्ये चतुर्थ्यैवसिद्धे चतुर्थी सम्प्रदानइति सूत्रं रुच्यर्थानामित्यादिविषये चतुर्थ्यर्थमिति भाष्यात्तद्विषये कारकपूर्वपदकस्वराभावस्यापि कल्पनसम्भवात्। पूजार्थत्वेत्विति एतेनप्राचवोधवैलक्षण्यं सूचितम्। हरिर्भक्तिमभिलष्यतीत्यत्र रुच्यर्थानामिति सूत्रेण चतुर्थ्यत्र

अतएवतादर्थ्यचतुर्थ्याम्दान कर्मणोगवादेस्सम्प्रदानार्थत्वेपिदानक्रियायास्तदर्थत्वाभावेन चतुर्थ्यनार्थस्यदानक्रियान्वयानापत्तिरितिहेलाराजः। तादर्थ्यचतुर्थ्यैवसिद्धे चतुर्थी सम्प्रदानइति सूत्रं रुच्यर्थानामित्यादिविषये चतुर्थ्यर्थमिति भाष्येस्पष्टम् पशुनेति कर्मतृतीयार्थः सम्प्रदानद्वितीयार्थः। एतच्च दानार्थकयज धातु विषयम्। पूजार्थत्वेयष्टेः करणत्वन्मायसिद्धम् इदन्छान्दसमिति केयटः। अन्यकर्तृकइति अभिलष्यतिकर्त्रपेक्षयान्यदभिलष्यतिकर्मतत्कर्तृकइत्यर्थः। यत्किञ्चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयोभिलष्यतिकर्त्ताहरिर्भक्तिमभिलष्यतीतिमत्यन्यथात्। यत्किञ्चिन्निष्ठप्रीत्यनुकूलःप्रीतिव्यधिकरणोयोव्यापारस्तदाश्रयोरोचतेः कर्त्तेति अभिलषतेरुच्यर्थत्वाभावान्नतद्योगेसम्प्रदानत्वमितिभावस्तदाह हरिनिष्ठेति ॥

वृत्त्यर्थमर्थभेदन्दर्शयति अभिलष्यतीत्यादिना प्रीतिव्यधिकरणमिति एतेनकर्मसंज्ञापवादभूतेयंसम्प्रदानसंज्ञा। नचप्रीधातोरप्येवंसतिसम्प्रदानसंज्ञाप्रयोजकत्वंस्यादितिहरिम्प्रीणयतीत्यनुपपन्नमितिवाच्यम्। प्रीयमाणइतिनिर्देशेनप्रीधातुयोगेसम्प्र।

भे· कारकाधिकारादाह· क्रियाजनकत्वमात्रेति· षष्ठीविषये। इत्यस्याप्यापत्तेरिति· अत्र कर्मसञ्ज्ञाधिकरणसञ्ज्ञावदवधिकारस्यादिति भाव·। ज्ञीप्स्यमान इत्यत्र ज्ञाधात्वर्थकर्मणि चेत्तन्नयत्तु दात्त्रा न विषयस्यानेन सम्प्रदानसञ्ज्ञा। णिजन्तार्थकर्मणि चेत्क्रियते तदा ज्ञानाश्रयस्य बोध इति भाव्योर्भेदे नार्थभेदन्दर्शयति· श्लाघादेरिति· आत्मानुरागमिति· एवंर्थकर्मणि सत्यपपक्षेऽइदम्। ज्ञाधात्वर्थकर्म

यथीति· न च प्रीयमाणपदाभावे तत्र स्य क्रियाजनकत्वमात्रविवक्षायां सञ्ज्ञान्तरप्राप्तिविषये चारितार्थेन परत्वादधिकरणसञ्ज्ञा यावाधसिद्धेः कथमेतदिति वाच्यम्· देवदत्तं रोचते इत्यस्याप्यापत्तेरित्याशयात्· तन्मात्वेतु अस्य कर्मसञ्ज्ञापवादत्वान्न दोषः। गोपीस्मरात्कृति· श्लाघादेः स्तुत्यादिना बोधनमर्थः स्मरादिति हेतौ पञ्चमी स्तुत्यात्मानुरागङ्कृष्णम्बोधयतीत्यर्थः स्तुतिश्च कृष्णस्यैव एवं ह्नुत्वा कृष्णं स्वानुरागम्बोधयतीत्यर्थः। ह्नुतिः सपत्न्यादिभ्यः कृष्णस्यैवा। एवं स्थित्या शपथेन च कृष्णं स्वानुरागम्बोधयतीत्यर्थः। पद्मा ह्नुत्या स्तुत्या च कृष्णं स्वसखीजनम्बोधयति स्थित्या शपथेन च कृष्णं तम्बोधयतीत्यर्थः ज्ञीप्स्यमानपदे एवंर्थकर्मणः सकलार्थकर्मणश्च न ग्रहणादित्यन्यत्र विस्तरः। स्तुत्यादिमात्रार्थत्वे कृष्णं श्लाघते कृष्णं ह्नुते इत्येव ज्ञीप्स्य मान इति ज्ञानवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानच् ॥

णिप्रत्ययपक्षे आह· यद्वेति· सन्नन्तार्थकर्मत्वमुभयोरपि सम्भाव्यत इति विनिगमनाविरहादन्यतरस्यैवेति न नियम इति भावः। उभयथापि कर्मसञ्ज्ञापवादोऽयम्। ज्ञाप्यमान इत्येव नोक्तम् किन्तु ज्ञीप्स्यमान इत्यतोऽर्थभेद इति तत्त्वम्। एतेन ज्ञाधातोः प्रथमोपस्थितत्वमेव विनिगमकमित्यपास्तम्· यत्तु ण्यन्तार्थकर्मण्येव प्राधान्यादत्र प्रत्यय इति तन्न· सन्नुपादानस्वारस्यविरोधात् ॥

मै· धारेरितिसूत्रेधञ्जोणिजन्तस्यग्रहणमितिभ्रमवारणायाह· धृङ·वस्थानइतीति· व्याख्यानादिति· यदिधृञ्जेहेतुमण्यन्तस्यायन्निर्देश इत्यु
च्यते तदामोक्षधृञ्धात्वर्थकर्तृत्वासम्भवः॥ किञ्चधृतः सकर्मकतयामोक्षस्यकर्मत्वन्नस्यात् धृङस्त्वकर्मकतयाऽणयन्ततायाङ्कर्तृ
त्वम्मोक्षस्यास्तीतिहेतुमतितत्तोणिचिमोक्षस्यगतिवुद्धीतिसूत्रेणकर्मत्वंसम्भवतीतिभक्तायधारयतिमोक्षंहरिरितिप्रयोगउपपद्यतेइ
त्येतद्दर्शनमूलकादित्यर्थः।भक्तस्यकारकत्वमुपपादयति· प्रेरणायाइति· नन्वत्रमोक्षस्यकरणत्वञ्चेत्तदाभक्तस्योत्तमर्णत्वनत्वामि
त्वादुपपत्स्यतेत्तत्रैवन· करणंहिनामयत्रसजातीयदानमङ्गीकृत्यपरदत्तद्रव्यादात्तदुत्तरकालिकगृहीतद्रव्यसजातीयद्रव्यदानन॥

धारेरुः· धृङ्· अवस्थानेइतिण्यन्तस्यग्रहणंव्याख्यानात्।भक्तायेति·ध्रियमाणंस्वरूपेणावतिष्ठमानम्मोक्षंहरिःप्रयुङ्क्तेइ
त्यर्थः।प्रेरणायाभक्तासत्वेऽभावात्तस्यापिप्रेरणाजनकत्वेनकारकत्वम्बोध्यम् अवष्टम्भदेयत्वेनमोक्षेऽपिकरणत्वम्बो
ध्यम्· प्रकर्षविवक्षायान्त्विति· फलाश्रयत्वेनविवक्षायामित्यर्थः॥ एषोऽदृष्टविशेषः।प्रकृतेमोक्षस्यैवंविधकरणत्वाभावेनै

तत्त्वामिनोभक्तस्योत्तमर्णत्वासम्भवादत आह· अवष्टम्भदेयत्वेनेति· स्पृहेरीप्सितइतिसूत्रेयदीप्सितपदन्तदिच्छाविषयपरम्।पुष्पेभ्यःस्पृ
हयतीत्युदाहरणेस्पृहिरिच्छामात्रवाची।पुष्पपदार्थस्यचविषयितायाञ्चतुर्थ्यर्थेऽन्वयः।क्रियाजनकत्वञ्चविषयत्वेनैवेति।प्रकर्षात्तुप्र
कर्षस्यप्रकृतधातूपात्तव्यापारजन्यफलाश्रयत्वस्यविवक्षातदाकर्मसञ्ज्ञेतिमूलग्रन्थात्प्रतीयते।अतएवस्पृहणीयगुणैःस्पृहणीया
श्शोभेत्यत्रकर्मण्यनीयर।कुमार्यइववकान्तस्यत्रस्यान्तिस्पृहयन्तीत्यत्रतुइच्छासम्बन्धित्वमात्रस्यविवक्षानतुक्रियाजकत्वरूपकारक

त्वस्यापीत्यतः षष्ठीत्याशयेनाह· फलाश्रयेत्वेनेति॥

भै अतएव कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वादेव कर्तुरपादानत्वेपीति सार्थं एनं त्यजति। अयञ्च सार्थाद्धीयत इति हानसम्प्रत्ययः स
र्थश्च मनुष्यसमुदायः समुदायश्च समुदायावयवाभिन्नोयमपि तत्समुदायावयव इति सार्थे सापादानत्वेपि निरुक्तस्वातन्त्र्यन्तस्यास्तीति
भावः। अकर्मकक्रियोद्देश्यस्य पत्ये शेत इत्यादौ पत्यादेः। ननु कर्मकक्रियास्थले ऽतिप्रसङ्गनिवारणाय कृतस्य क्रियया यमभिप्रैतीति वच
नस्य कर्मण्यतिप्रसङ्ग इत्यत आह कर्मरहितेति इदञ्च व्याख्यानन्त्वापूर्वमित्याशयेनाह सकर्मकेष्विति तदर्थात् सम्प्रदानत्वेना
भिप्रेतो यो विप्रादिस्तस्मादिव याजकतया विप्रार्थत्वात् दास गोघ्नाविति तदर्थमिति सम्प्रदाने कारके तेन सूत्रेण दाश गोघ्न
योर्निपातनात् अतएव मूले दाशन्ति तस्मै दाशः गां हन्ति तस्मै गोघ्नः ऽतिथिरिति तयोर्थं वक्ष्यति ननु सम्प्रदानपाद ॥

अतएव सार्थाद्धीयत इत्यत्र कर्तुरपादानत्वेपि कर्मणि लकारः सिद्धः। ननु कर्मणोप्युक्तावकर्मकक्रियोद्देश्यस्य सम्प्रदानत्वन्न
स्यादत आह क्रिययेति कर्मरहितक्रिययेत्यर्थः। सकर्मकेषु कर्मसञ्ज्ञास्या बाधिकेत्याशयेनाह पत्ये शेत इति न च दानादी
नान्तदर्थत्वात्तादर्थ्ये चतुर्थ्येव सिद्धे किमनया सञ्ज्ञयेति वाच्यम् दाश गोघ्नौ सम्प्रदान इत्यर्थत्वात् तत्सम्प्रदानकं दानमिति
बोधार्थन्तदावश्यकत्वाच्च ॥

स्य सम्प्रदीयते यस्मै पश्वादिकामनया इत्यर्थः :कल्प्यते ऽतो। ननु तत्सूत्राव्युपपत्तिरत आह तत्सम्प्रदानकमि
ति सम्प्रदानसञ्ज्ञायाः सत्वे विप्राय गां ददाति दानीयो विप्र इति वाक्याद्धि सम्प्रदानकं दानमिति दानसम्प्रदानाभिन्नो विप्र इत्यादिरीत्या बो
धो भवति तादर्थ्ये एव चतुर्थीविधाने तदा यूपाय दार्विति प्राक् यथा यूपार्थं दार्विति बोधो भवति तथा विप्राय गां ददातीत्यादि प्राक्द्वादि
प्रार्थं गां कर्मकं दानमित्याद्येव बोधः स्यादिति भावः। किञ्च सम्प्रदानत्वेन तेभ्यः प्राक्भ्यो बोधश्चेत् स्वीक्रियते तदा कर्मणा यमेति सूत्रस्य क्रि

श॰ शे॰ भै॰ क्रुधद्रुहएषामर्थइवार्थोयेषामित्यर्थः।क्रोधश्चामर्षरूपोमनसोवृत्तिविशेषः।उत्कर्षविरोधिधर्मारोपानुकूलव्यापारात्मकः।द्रोहश्चापका
टी॰ भै॰ ररूपः।सचतदीयगुणेदोषारोपानुकूलव्यापारइतितयोर्भेदः।ईर्ष्याचाक्षमा।साचपरकीयपाण्डित्यादिगुणानामसहनन्तच्चगुणादिज्ञानजन्यद्वे
५२१ षात्मकम्।असूयाचगुणेषुदोषतादात्म्यारोपइतिद्रोहादस्यभेदः।द्रोहविषयेनैतेदेवदत्तस्यगुणाःकिन्तुदोषाएवेतिज्ञानम्।असूयाविष
येदेवदत्तोदुष्टइत्याकारकज्ञानम्।कोपश्चदेवदत्तीयविपरीताचरणज्ञानजन्योवृत्तिविशेषइत्येतेषांकोपप्रभवोपपत्तिः।वस्तुतस्तुच
क्षुरादिविकारानुमेयःप्ररूढःकोपएवक्रोधः।द्रोहश्चापचिकीर्षारूपः।मूलोक्तमपकारपदमप्यपचिकीर्षापरम्।तत्रान्नक्षमनेइति।

भार्यामीर्ष्यतीति·नात्रभार्यांप्रतिकोपःकिन्तुपरैर्दृश्यमानान्तान्नसहतेइत्येवाएवञ्चात्रनकोपजन्येर्ष्याकिन्त्वन्यपुरु
षदर्शनजन्येतिभावः।हरेःक्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात् क्रिययायमभीत्यनेननसिद्धिः नह्यकुपितःक्रुध्यतीति
भाष्येणप्ररूढकोपएवक्रोधइतिबोधनात्कुपेस्तदर्थत्वाभावेननतद्योगेइदङ्कुप्यतिकस्मैचिदित्याद्यसाध्वेव· ॥

अत्रक्षमाचपरपुरुषदर्शनप्रयोजकदेशविशेषस्थितिरूपफलानुकूलव्यापारानुकूलव्यापारएवा।अतएवतामितिकर्मत्वम्।ईर्ष्या
चतदभावः।ननुक्रिययायमित्यनेनैवसिद्धेःसूत्रस्यवैयर्थ्यमतआह·हरेरिति·कुपधातुयोगेकर्मसञ्ज्ञांवारयति·नह्यकुपितइ
ति·क्रुध्यतीति· बोधनेनेतिशेषः तदर्थत्वाभावेन·क्रोधार्थत्वाभावेन·नतद्योगइदम्।कुपधातुयोगेसम्प्रदानत्वन्नकिन्तुतद्योगे
कर्मसञ्ज्ञेतिशेषः।अतएवभाष्यकैयटोक्तम्याकुप्येतेतिकर्मप्रयोगोमनोरमोक्तउपपन्नोभवति।यदिचपुनिरशनिश्चतमुच्चैर्निह
निकुप्यसिनरेन्द्रयस्मैत्वम् यस्मैप्रसीदसिपुनःसभात्युदारोऽनुदारश्चेतिकाव्यप्रकाशस्थप्रयोगानुपपत्तिरितिविभाव्यतेतदामहाकविप्रयोगद

मे· नचचित्तदोषार्थानामित्येवसूत्रमस्त्विति वाच्यम्· द्विषधातुयोगेऽतिप्रसङ्गात्। अतएवौषधन्द्वेष्टीतिप्रयोगउपपन्नोभवति क्रोधादयश्चेतनविषयाए
वद्वेषस्तुचेतनाचेतनविषयइति· ननूपसृष्टपदस्यसोपसर्गयोरितिव्याख्यानङ्कथमतआह· वैयाकरणेति· निकाये· गृहेऽथवास्वरूपे। अतएव· पूर्वोक्त
रीत्याराधधातोरकर्मकत्वस्वीकारादेव। धात्वर्थैकदेशेफलपदार्थान्वयः। प्रश्नविषयशुभाशुभाश्रयत्वेनकर्मत्वङ्गम्यतेतिसकर्मकोयन्धातुरितितुनश

उपसृष्टयोरित्यस्यार्थमाह· सोपसर्गयोरिति· वैयाकरणनिकायेएव एतदर्थकत्वेनप्रसिद्ध· पूर्वसूत्रापवादोयम्· यदीयइति· यदीय
शुभाशुभसम्बन्धीत्यर्थः। राधीक्ष्योःप्रश्नविषयपर्यालोचनमर्थः। कर्मणःप्रश्नविषयस्यधात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ· अ
तएवपूयत्रराधोऽकर्मकावेतुतौ· फलसम्प्रदानकंशुभाशुभपर्यालोचनमर्थः। प्रत्याङ्भ्याम्· व्याख्यानात्प्रत्येकन्निमित्तत्व
मित्याशयेनोदाहरति· गामभिगृणातीति· अनयोःप्रवर्त्तनापूर्वकोऽभ्युपगमोऽर्थः। तत्रविप्रस्यकर्तृप्रयोजकत्वेनहेतुत्वेप्राप्ते
वचनम्· अनुप्रतीतिभिन्नपदंलुप्तपञ्चम्यन्तम्· गृणइतिश्नान्तानुकरणात्षष्ठी· पूंसितुः शंसनविषयहर्षानुकूलव्यापार
लक्षणप्रोत्साहनमनयोरर्थः॥

कथम्। तस्यफलस्यप्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यत्वाभावात्। व्याख्यानादिति· द्विवचननिर्देशा
दर्थानमूलकव्याख्यानादित्यर्थः। अनयोः। तत्तदुपसर्गपूर्वकयोः। अत्रविप्रपदाच्चतुर्थी आश्रयत्वमर्थः। तस्यप्रवर्त्तनायामन्वयः। वस्तुतस्तु
सम्प्रदानत्वप्राप्तिमत्त्वेनैवान्वयइति। अनुप्रतीतिसूत्रेऽनुप्रतिभ्यामितिसमासः। यद्वाप्रकृतिवदित्यतिदेशेनलुकृतदाह·। लुप्तपञ्चम्यन्तमि
ति· प्रत्येकमितिशेषः। अतएवप्रत्येकन्निमित्तत्वम्। तस्मादाह· अनयोरिति· ॥

भे॰ पुंसनस्येत्यर्थ इति।उपस्थितत्वात्। करणत्वस्य व्यापारनियतत्वं स्पष्टयन्नाह॰ व्यापारश्चेति॰ तादर्थ्ये॰ तस्मै इदं तदर्थम्। तस्य भावस्तादर्थ्यम् अ
स्मात्चतुर्थ्या उपपदविभक्तित्वेनेयं विशेषणादेव॰ उपकारकत्वमत्र न साक्षादेव किन्तु परम्परयापि। अत एव॰ मुक्तये हरिं भजतीत्यत्रेव ब्राह्मणा
यपायसमितिवद्धीत्यत्रापि चतुर्थी सिध्यति। ब्राह्मणायेत्यत्रापि तादर्थ्य एव। क्लृपीत्यत्रेकानिर्देशमभ्रवारणायाह॰ सप्तमीति॰ अर्थग्रहण

पूर्वव्यापारस्येति॰ पुंसनस्येत्यर्थः। प्रोत्साहयतीति॰ प्रोथामेत्यादिशब्दैरिति शेषः। प्रतायेति॰ करणस्यैव सम्प्रदानत्वेन भानम
त्रात द्व्यापारश्च दानरूप एवेति बोध्यम्॰ तादर्थ्ये॰ तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः। यदा तादर्थ्यस्य सम्बन्धत्वेन भा
नन्तदा षष्ठी॰ गुरोरिदं गुर्वर्थमित्यत्र भाष्ये स्पष्टम्॰ क्लृपीति सप्तमी। अर्थग्रहणस्त्वात्र। सम्पत्तिरुत्पत्तिः। क्लृप्यर्थकधातुयोगे उत्प
द्यमानार्थे वर्तमानाच्चतुर्थीत्यर्थः। हितयोगे च॰ चात्सुखयोगेपि। क्रियार्थोप॰ क्रिया अर्थः फलं यस्य तत् क्रियार्थम्॰ तेन स्व
वाचकं लक्ष्यते क्रियाफलकार्थवाचकमुपपदं यस्येत्यर्थः। सोऽर्थश्च प्रत्यासत्त्या क्रियारूप एव॰ स्थानिप्रशब्दश्चाप्रयुज्यमानवा
चीवैयाकरणानान्निकायप्रसिद्धः क्रियार्थक्रियोपपदत्वञ्च तुमुनादेरेवेत्याह॰ क्रियार्थाक्रियेति॰ फलेभ्योपातीत्यादौ फल
कर्मकाहरणफलकं यानमिति बोधः॥ मिति॰ जायत इत्यादियोगे चतुर्थीदर्शनमूलकाद्व्याख्यानात्। न्यूनतां वारयति॰ सुखयोगेपी
ति॰ यथा तस्मै हितमिति निर्देशाद्धितशब्दयोगे चतुर्थी तथा च तुर्थी तदर्थार्थेति सूत्रेण चतुर्थ्यन्तस्य सुखशब्देन सह समासविधानाज्ज्ञाप
कात्सुखयोगेपि भवतीति। क्रियार्थमिति॰ नपुंसकत्वमत्रोपपदापेक्षया। अत एव लुप्तस्पष्टणायात तथा च यत्सिद्धं तदाह॰ क्रियाफलकार्थेति॰ फले

नै· प्रकृतसूत्रचारितार्थ्यमाह· इदं सूत्रमिति· क्रियाजनकत्वमात्रेत्यत्र मात्रपदेन तादृशफलाश्रयत्वव्यवच्छेदः। स्वीयसिद्धान्तरीत्या प्राग्बोधमाह· पुष्पसम्प्रेति· यत्र तु षष्ठी तत्र विशेषमाह· कुमार्यद्वेति·। क्रियासम्बन्धित्वमात्रेति· मात्रपदेन क्रियाजनकत्वव्यवच्छेदः। यत्तु प्रकृतसूत्रेण सम्प्रदानसञ्ज्ञा क्रियासम्बन्धित्वविवक्षायामेव। अत एव षष्ठ्यपवादत्वमस्यादिति व्यवहारः। एवं सति कुमार्यद्वेत्यत्र कथं षष्ठीत्याकाङ्क्षायामध्याह्रियमाणपदार्थान्वयविवक्षयेत्याकूतं तन्मतमाह· अन्ये त्विति· भोगायेत्यध्याहृत्येति· अत्र शब्दाध्याहा

परत्वादिति· इदं सूत्रं विषयतया क्रियाजनकत्वमात्रविवक्षायां चरितार्थमिति भावः। पुष्पसम्प्रदानिकेच्छेति चतुर्थीसमभिव्याहारे बोधः कुमार्यद्वकान्तस्य त्रस्तनि स्पृहपनिचेत्यत्र क्रियासम्बन्धित्वमात्रविवक्षायां षष्ठी अन्ये तु भोगायेत्याध्याहृत्य कान्तायेति विभक्तिविपरिणामेन वा व्याख्येयमित्याहुः। स्पृह धातुरिच्छामात्रवाची फलावच्छिन्नेच्छावाची वा द्येसम्प्रदानत्वमन्यत्कर्मत्वम्· ईप्सितत्वञ्च धात्वर्थजन्यफलाश्रयत्वम्· न तु फलस्य धात्वर्थत्वपर्यन्तमाग्रहः। कर्मसञ्ज्ञायां तु य

॥ यातद्याभत्तथोक्तम्॥

रः। यदि तु स्पृहयति योगविवक्षैव तदाप्याह· कान्तायेनीति· आहुरित्यस्वरसबीजं तु अस्य सूत्रस्य कारकाधिकारीयत्वात् क्रियासम्बन्धित्वमात्रविवक्षायामित्यस्यासङ्गतेः। वदतो व्याघातात्। किञ्च कुमार्यद्वेत्यत्र शब्दाध्याहारे विभक्तिविपरिणामे वा गौरवम्। सूत्रस्यैतस्य कर्तुरीप्सिततममित्यस्य च विषयविभागश्चोक्त एव· अस्पष्टमनिपन्नये सिद्धान्तमाह· स्पृह धातुरिति फलावच्छिन्नेति· अत्र फलमिच्छाया एवानन्तानन्तो विलक्षणविषयतारूपमेवाभीप्सितो। अत एवोत्कृष्टप्रकर्षविवक्षायामिति। एवञ्च कर्मसञ्ज्ञायाः शेषषष्ठ्याश्चापवादयमित्युक्तिः प्रयुक्ता। त्रयाणां सूत्राणां परस्परपरिहारेणैव प्रवृत्तेः॥ ६ ॥

शा·शे·भै· वाचनिकमेवेदमिति· अतएवतत्रचरीयत इत्यत्रयस्यचभावेनेतिसूत्रविहितसप्तम्यपेक्षयाऽधिकरणसप्तम्यावलवत्त्वे· यदेनोक्तंसङ्गच्छ
टी·भै· ते। केचित्·भाष्यतत्त्वविदः। अन्तरान्तरेणेतिसूत्रस्थकैयटोक्तन्दूषयितुन्तन्मतमाह· क्रियाकारकयोरिति· अन्तरङ्ग·इति· तयोः परस्पराकाङ्क्षा
४२३ याउत्थितत्वात्। यथाप्रकृतेकृधात्वर्थःस्वनिष्ठायकृष्टत्ववोधानुकूलोव्यापारस्तस्यैवनमःशब्दोद्योतकतयोपकारकः। तद्घटकवोधश्चकिन्निष्ठइ
त्याकाङ्क्षादेवाश्चकिम्फलाश्रयाकाङ्क्षाअत्रद्रष्टव्या। यद्विचप्रकृतेनमःशब्दोवाचकःस्यात्तदानमःशब्दार्थोऽत्रतादृशवोधानुकूलव्यापारमात्र

इतिसूत्रेणेति· भावेयप्रत्ययावश्यन्तेतेक्रियार्थायाङ्क्रियायामुपपदेभविष्यतिस्युरितितदर्थः। यागायेति· यागफलकंयान
मित्यर्थः। उपपदविभक्तेरिति· वाचनिकमेवेदम्भाष्येपठितमितिकेचित्·क्रियाकारकयोःसम्वन्धोऽन्तरङ्ग·उपपदार्थेनतुप
त्किञ्चित्क्रियाकारकभावमूलकःसम्वन्धइतितन्निमित्ताविभक्तिर्वहिरङ्गेतिअन्तरान्तरेणेतिसूत्रेकैयटः॥ ॥ ॥

म। व्यापारश्चकृधात्वर्थस्तयोःशीघ्रम्परस्पराकाङ्क्षयाऽन्वयोऽन्तरङ्गस्तेनानांप्रधानीभूतव्यापारप्रयोज्यकृधात्वर्थफलाश्रयत्वविरहात्कर्मत्वन्नस्यात्। नमः
पदस्यद्योतकत्वेतुधात्वर्थव्यापारप्रयोज्यफलाश्रयत्वात्तन्निर्वाहः। एवञ्चक्रियाकारकयोःसाक्षात्सम्वन्धोजन्यजनकभावरूपोनिपाताकाङ्क्षाप्र
योजकः। नमःपदस्यद्योतकत्वेतुधात्वर्थव्यापारप्रयोज्यफलाश्रयत्वात्तन्निर्वाहः। एवञ्चक्रियाकारकयोःसाक्षात्सम्वन्धोजन्यजनकभावरूपोनि
पाताकाङ्क्षाप्रयोजकः। नमःपदेनसम्वन्धश्चस्वद्योत्यव्यापारप्रयोज्यवोधाश्रयत्वरूपइतिवहिरङ्गइत्येवाएवमेवसर्वत्रोपपदार्थेनसहान्वयस्यव

उपपदविभक्तेःकारकविभक्तिर्बलीयसी

मे॰ तदेतद्दूषयति॰ अत्राहुरित्यादिना॰ क्रियाकारकभावेनैवेति॰ नमस्यतीत्यत्र करणाद्यर्थे नमोवरिवश्चित्रङः क्यजिति सूत्रेण क्यचो विधानात्तत्र
क्यजन्तार्थान्वयेनैव नमःशब्दार्थान्वयो वाच्यः एवं सत्युभयविभक्त्योः समत्वादनरङ्गन्यायस्येहसम्भवाभावात्॰ एतेन प्रकृते उभयोरपि समत्वेन
सहयुक्तेऽप्रधाने इति सूत्रेऽप्रधानग्रहणं शक्यमकर्तुम्॰ नच पुत्रेण सहागतः पितेत्यत्र पितुरपि तृतीयापत्तिः। उपपदविभक्तेरितिन्यायेन
प्रथमा भविष्यतीत्युक्तं तत्र प्रथमायाः। येनाभिप्रायेण कारकविभक्तित्वमुक्तं तदाविष्कर्तुमाह॰ कारकविभक्तित्वमिति॰ कर्त्रादिषट्कान्यतमे

अत्राहुः। एवं सति नमस्यति देवानित्यादौ नमःपदार्थे क्रियाकारकभावेनैवान्वये परत्वाच्चतुर्थीमाशङ्क्यानेन वारणस्य भाष्योक्तस्या
सङ्गतिः। एतेन प्रधानत्वात् क्रियायास्तत्सम्बन्धनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तम्॰ कारकविभक्तित्वञ्च क्रियाजनकत्वस
मानाधिकरणकर्त्रादिषट्कान्यतमार्थकत्वम्॰ अन्याभिहितानुक्तकर्त्राद्यन्यतमार्थत्वम्प्रथमाया अपि। अभिहिते प्रथमेति वा
र्तिकस्वारस्यादतः प्रथमापि कारकविभक्तिरिति बोध्यम्॰ द्वावित्यादौ द्वित्वादेरिव देवदत्तः पचतीत्यादावुभाभ्यामेकस्यैव क
र्तृत्वस्य बोध इति न तद्बाधा इति॥ ९ त्यत्र कर्त्रादिपदं कर्तृत्वादिशक्तिपरम्॰ अतस्तत्सामानाधिकरण्योपपत्तिः। अभिहितकर्तृत्वादेः प्रथ
मास्वीकारेऽपि कर्तृत्वादेर्वारद्वयं शाब्दबोधे भानापत्तिं वारयति। द्वावित्यादाविति॰ नच स्वनिष्ठापकृष्टत्वबोधानुकूलव्यापारस्य नमःशब्दार्थत्वे देवो
द्देशेन यत्र नमस्कारः कृतस्तत्र तादृशफलस्य बोधस्य शूद्रादावपि सत्त्वाच्छूद्रं नमस्करोमीत्यपि प्रयोगापत्तिः स्यादिति वाच्यम्॰ फलतावच्छेदकस
म्बन्धेन फलाश्रयत्वस्यैव द्वितीयाप्रयोजकत्वात् प्रकृते च स्वविषयापकर्षावधित्वसामानाधिकरण्यविशिष्टसमवायस्य फलतावच्छेदकस
म्बन्धत्वमनेन सम्बन्धेन फलाश्रयत्वन्नोद्देश्यातिरिक्त इति॰॥ ॥ ॥

मि॰ अयमर्थो नमस्करोमीत्यत्र धातोरेव॰ नमःशब्दस्तु द्योतक इत्यभिप्रायेणोक्तं नमस्कारफलस्येति विशेषणेन नमइत्यादौ तु नमःशब्दो निपातः। सचोक्तार्थ निरूक्तसमवायविशिष्टतादृशबोधानुकूलव्यापारे शक्त इत्यतस्तत्रापि न शूद्राय नम इत्याकारको द्विजकर्तृकः प्रयोगः। नमस्करोतीत्यत्र गतित्वं साक्षात्प्रभृतिषु पाठान्नेति न युक्तम्। साक्षात्प्रभृतिषु च्व्यर्थवचनं कर्तव्यमिति वार्तिकविरोधात् आह॰ उर्यादिष्वेवेति॰ प्राचीनोक्तं खण्डयति॰ एकस्याएवेति॰ यथा मासे दीयत इत्यत्राधिकरणसप्तमी यस्य च भावेनेति सप्तम्यपेक्षया बलवत्त्वात्प्रवर्त्तत इति कैयटेनोक्तम्॰ पर्याप्त्यर्थानामिति

नमस्करोति देवानिति उत्कर्षनिष्ठाय स्वनिष्ठापकृष्टत्वबोधसत्त्वानुकूलव्यापाररूपनमस्कारफलस्य तादृशबो- धस्याश्रयतया देवानां कर्मत्वम्। स्वशब्देन प्रयोक्ता॰ नमःशब्दस्य साक्षात्प्रभृतिषूर्यादिषु वा पाठेन गतित्वात्सत्त्व म्॰ एकस्याएवोपपदविभक्तित्वे कारकविभक्तित्वे चायं न्याय इति तु न युक्तम्। नमस्यति देवानित्यत्रैतत्परिभाषो- पन्यासपरभाष्यविरोधात् सहयुक्ते इत्यादिसूत्रस्थभाष्यविरोधाच्च॰ अलमिति॰ अलमित्यनेन पर्याप्त्यर्थानां ग्रहण

अत्र पर्याप्तिः सामर्थ्यम्। तदभिप्रायेण मूले दैत्येभ्यो हरिरलं प्रभुः समर्थ इत्युक्तम्॰ व्याख्यानादिति॰ भूषणवार ((णाम्व्याख्यानादित्यर्थः णार्थकालंशब्दस्य कन्यामलङ्करोति हरिरिनभोजनमलङ्करोतीत्यादौ क्रियावाचकधातुसमभिव्याहारे प्रयोगात्तत्रोपपदविभक्तेरिति न्यायेन द्वितीयैवेति प्राचीनकृतव्याख्यानादित्यर्थः। अत्र तस्मै प्रभवति सन्तापादिभ्य इति निर्देशादर्थविवक्षा अलंशब्दविषये व्यवस्थार्थैकसोऽर्थो भू- षणाद्यर्थकालंशब्दप्रयोगेन प्रतीयत इति न तत्र चतुर्थी किन्तु षष्ठ्येवेति व्याख्यातुं शक्यते॥

भे॰ फलान्याहर्त्तुमित्यकारकबोधश्चोच्चारितः शब्द इति नियमान्न सम्भवतीति शङ्कानिवारणायाह॰ यथा वाक्यार्थ इति॰ यत्तु प्रकृतसूत्रबलादेतत्सूत्रो
दाहरणघटितवाक्यात्सदानुपस्थितस्याप्याहरणस्य शाब्दबोधविषयत्वङ्कल्प्यते। पदजन्यपदार्थोपस्थितिरेव शाब्दबोधे हेतुरित्यस्यौत्सर्गिकत्वादत्रत्या
गएवेति तन्न॰ उक्तरीत्या भाष्याविरोधेन सत्याङ्गतावेवङ्कल्पनस्यानुपयोगात्। नमस्कुर्म इत्यत्र नमःशब्दयोग्यार्थे नृसिंहशब्दार्थान्वयेन नमःस्वस्तीति सू
त्रेणैव चतुर्थीसिद्धावस्य सूत्रस्य वैयर्थ्यमत आह॰ नमःस्वस्तीत्यनेनेति॰ कर्मणि स्थानिन इत्येतावन्मात्रस्यैवोपादानमस्त्वित्यत आह॰ पिण्डीमित्या
दाविति॰ तुमशब्दस्तुमुन्प्रत्ययपरस्तद्वाचकस्यापि भाववचनस्यार्थे इत्यत आह॰ तुमशब्देनेति॰ भाववचनग्रहणसामर्थ्यात्सूत्रविशेषस्य ला

यथा वाक्यार्थे वाक्यैकदेशप्र— योगस्थले प्रविश पिण्डीमित्यादौ तस्यैव पदस्य सम्पूर्णवाक्यार्थशक्तता तथास्य समुदायस्या
हरणघटितोक्तार्थशक्तिरेतच्छास्त्रबला त्स्थानिन इत्युक्तेः तत्प्रयोगेनेति बोध्यम्॰ अयमेवार्थोध्याहारः। नमस्कुर्मो नृसिंहा
येति॰ नमःस्वस्त्यनेन तु न सिद्धिः। उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः पिण्डीत्यादावप्रयुज्यमानभक्षणक्रियाकर्म॰
णि चतुर्थीवारणाय क्रियार्थोपपदस्येति॰ तुमर्थात्॰ तुमशब्देन तदर्थो लक्ष्यते सोऽर्थो यस्येत्यर्थः॥ ((भेस्य प्रतिपत्त्यै तस्य सूत्रस्या

र्थमाह॰ भावेय इति॰ यागाय यातीत्यादौ फलप्रयोजकत्वरूपसम्बन्धो विभक्त्यर्थः। तादर्थ्ये चतुर्थीत्यनेन तु नैतत्सूत्रोदाहरणविषये चतुर्थीसिद्धिः
घञादिना तादर्थ्यस्योक्तत्वेनोक्तार्थानामप्रयोग इति न्यायेन चतुर्थ्याः प्राप्तेः। एवञ्च प्रातिपदिकार्थेति सूत्रेण प्रथमाबाधनार्थमिदं सूत्रम्। द्वि
षां विघाताय विधातुमिच्छतेत्यादिस्थले तादर्थ्ये एव चतुर्थी। अन्यथा तुमुन्नन्तस्य प्रयोगात्स्थानिन इत्युक्तत्वाच्चतुर्थी न स्यात्॰। न चोक्तार्थानामि
ति न्यायात्तादर्थ्ये चतुर्थ्यपि कथमिति शङ्क्यम्। विधानक्रियातादर्थ्यस्येच्छानिष्ठस्योक्तत्वेऽपि विधानक्रियानिष्ठं यद्विघाततादर्थ्यं तस्यानुक्तत्वात्

भे॰ अपकृष्टसादृश्यप्रतिपादनेयत्रतात्पर्यन्तत्रन्यूनगुणेषुसादृश्यप्रतिपादनस्यलोकप्रसिद्धत्वाद्यद्यपितिरस्कारस्तथापिसूत्रेकुत्सितइत्येववक्त
व्येऽनादरइत्युपादानादतिशयविशिष्टानादरस्ययत्रप्रतीतिस्तत्रैवसूत्रप्रवृत्तिरित्यभिप्रायः।तादृशानादरप्रतीतिश्चनत्वान्तृणम्मन्यइत्यादौस्फु
टैव·नत्वान्तृणम्मन्येतृणायवेत्यत्रोभयोरपिविभक्त्योः कर्मत्वशक्तिविशिष्टएवशक्तिः।नतुपकाव्याख्यानादिति· अनभिहिताधिकारस्वारस्यमूल
काद्याख्यानादित्यर्थः।मूलकारस्यन्यूनताम्परिहरति·श्यन्नुपलक्षणमिति·दैवादिकस्यधातोर्ग्रहणमित्यर्थोपलक्षणमित्यर्थः।लिटादावपीति

नत्वपकृष्टसादृश्यरूपस्यप्रतीतिश्चनञ्समभिव्याहारएव· तृणतुल्यमपिनमन्यइत्यर्थः।तृणायमत्वारघुनन्दनोऽपिइत्या
दौनञोऽध्याहारस्तदाह· नत्वान्तृणमिति·कर्मात्रचतुर्थ्यर्थः।श्यनेति· नतुयकाव्याख्यानादितिभावः।श्यन्नुपलक्षणन्ते
नलिडादावपिभवतितद्ध्वनयन्नाह· नानादिकयोगेनेति· नौकाकेति· भाष्येयेषुप्राणिषुनेष्यतेतेनावाद्योभविष्यन्तीतिये
ष्वितिबहुवचनेनतदन्युदाहरणबलेनचैष्वेवानिष्टनिर्णयइतिभावः।गत्यर्थकर्म· कर्मात्रचतुर्थ्यर्थः।गत्यर्थेतिकिम्· ओद
नम्पचति·कर्मणीतिकिम्· अश्वेनगच्छति।चेष्टायामिति· धात्वर्थस्यक्रियारूपत्वात्प्रश्नः॥ ॥यथाकामाधिक्यादशक्तः स्याति

नत्वान्तृणयमेनेइत्यादावितिस्त्रीणांवाक्ये·नासाङ्गमाधिक्यम्बाहारोद्विगुणः स्त्रीणाम्बुद्धिस्तासाञ्चतुर्गुणा षड्गुणोव्यवहारश्चकामश्चाष्टगुणः
स्मृतइत्यत्रप्रसिद्धम्· नौकाकान्नशुकशृगालवर्जेष्वितिमूलकारोक्तापरिगणनमिदमितिप्रतीयते।तच्चनयुक्तम्· भाष्येऽनावादिष्वितिवक्ष्यामि
नत्वान्नावमन्ये।नत्वामन्नम्मन्यइत्युक्त्वायेषुप्राणिषुनेष्यतेतेनावाद्योभविष्यन्तीतिकथनात्।यद्विभाष्यीयमुदाहरणमत्रमूलन्तदाशृगाल ४२५
शब्दोपादानमधिकमितितुनशङ्क्यम्·भाष्योदाहरणेषुशृगालशब्दानुपादानेपितत्रत्यबहुवचनाद्धन्त्यादिप्रामाण्याच्चैवमुपादानात्तदेतदाह·

र्भे· नौकाकेति· गतिरिति वाच्यम्· गतेः कारकस्येत्येव सिद्धमित्याशयेनाह· कर्मणीति किमिती॥ ॐ॥ शारीरेति· परस्पन्दादिधात्वर्थभूता इत्यर्थः। अ
र्थपर इति· कर्मणीत्यनेन सामानाधिकरण्यात्। कर्मसंज्ञा हि शास्त्रेणार्थस्यैव विधीयते· व्याख्यानादिति· अध्वन्यर्थग्रहणमिति वार्तिकमूलकत्वं स
मकालिकेति· एतच्च फलेऽन्वेति। आस्थितप्रतिषेधो वक्तव्य इति वार्तिकसत्त्वमस्मिन्व्याख्याने मूलम्· ननु जनैर्यदा यत्र गम्यते स एवाध्वा लोकप्र
सिद्ध इतीति स्त्रियं गच्छतीत्यत्रानध्वनीति प्रतिषेधो न प्राप्नोतीत्यत आह· अध्वपदेनेति· स्पष्टं चेति· आस्थितप्रतिषेध इत्यादिनेत्यर्थः· उत्पथा
दिति ल्यब्लोपे पञ्चमीत्याशयेनाह· उत्पथं समनुज्य इति· इष्यत इत्येतद्यन्मूलेकथितं तल्लब्धमर्थस्य प्रतिपत्तये आह· नत्वेति· उत्पथेनेति

शारीरक्रियाया एव ग्रहणमित्युत्तरम्· पन्थानमिति· अध्वशब्दोऽर्थपरो व्याख्यानादिति भावः। अधिष्ठित इति· शब्दप्रयोग
समकालिकगन्तृव्यापारजन्यफलाश्रय इत्यर्थः। अध्वशब्देन गन्तृप्राप्योऽर्थ उच्यते तेन गन्तृयुक्तः स्त्रियं स्त्रियं गच्छतीत्यादौ·
न· स्पष्टं चेदं भाष्ये· उत्पथादिति· उत्पथं समनुज्येत्यर्थः। इष्यत इति· नत्वाकान्त इत्यर्थः। उत्पथेनेति· गन्तुमशक्त इति शेषः॥

करणे तृतीया गच्छतीत्येतन्निरूपिता चेत्कर्मकरणयोरैक्योपपत्तेः कर्मत्वानुपपत्तिः। यदि पथः शब्दार्थ उत्पथात्तिर ॥ इति चतुर्थी॥ ॐ ॥
स्कृतदोत्पथस्य करणत्वानुपपत्तिरित्येतच्छाङ्कानुत्थानायाह· गन्तुमशक्त इति शेष इति· अत्रेदमवधेयम्· गत्यर्थकर्मणि चतुर्थी चेति मन्यकर्म
ण्यनादर इत्यस्यानन्तरं त्वपथ्यानाम्श्वहृगालामनध्वनीति वाकृतोन कृतमिति। यत्तु द्वितीयाग्रहणं कर्मणि प्राप्तायाः षष्ठ्या मा भूदित्येतदर्थं तत्र तद्बाधनार्थं
मिति तन्न· सन्दर्शनादिक्रियया गत्यर्थक्रियायाः कृत्रिमकर्मत्वं कर्मणायमभिप्रैतीति यामस्य सम्प्रदानत्वेन चतुर्थ्या। गत्यर्थकर्मत्वेन हि तृती
याया अपि सिद्धिमाश्रित्यैतस्य प्रत्याख्यानपरभाष्यप्रामाण्येन भाष्यमते षष्ठीस्वीकारवत्सूत्रकारमतेऽपि कृदन्तेन योगे षष्ठ्युत्पत्तौ विष्टापत्तेः स्वीका

श·शे· भै॰ नचसूत्रारम्भेउभाभ्यामपिविभक्तिभ्यांकर्मत्वशक्तिमत्त्वेनैवार्थस्यशाब्दबोधभानम्प्रत्याख्यानपक्षेतुकर्मत्वसम्प्रदानत्वाभ्यान्तत्तच्छाब्दबोधेभानं
टी·भै· स्वीकार्यमितिवाच्यम्पार्थभेदात्कथमेतत्प्रत्याख्यानमितिवाच्यम्·अर्थभेदेपीष्टापत्तिमाश्रित्यैवभगवताप्रत्याख्यानात्।यथोत्तरम्मुनीनाम्प्रामाण्यात्
४२६ नचग्रामायगच्छतीत्यत्रगमधातोरुत्तरदेशसंयोगानुकूलव्यापारमात्रमर्थश्चेत्तत्ताद्रशक्रियायाः कर्मत्वमितिताद्रशव्यापारविषयकसन्दर्शन
ङ्गमधातोर्धातोरनेकार्थत्वाद्वृत्तिःस्वीकार्याएवञ्चोत्तरदेशसंयोगरूपफलस्यप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यत्वाभावेनकथङ्ग्राम
स्यकर्मत्वप्राप्तिरितिवाच्यम्·अर्थभेदेपिप्रत्याख्यानेइष्टापत्तिवदेकस्मिन्नेवार्थधातोर्यदावृत्तिस्तदाग्रामङ्गमायवागच्छतीत्यस्यानभिधान
एवेष्टापत्तेःस्वीकारात्·नचैवमर्थभेदेपिचेदत्रद्वितीयाचतुर्थ्योःस्वीकारस्तदाघटङ्करोतीत्यत्रकृधातोरप्यर्थभेदमाश्रित्यघटङ्कटावयवान्क

॥ ध्रुवम·ध्रुवंस्थिरम्।अपायोविभागजनकोव्यापारस्तदनाश्रयमितियावत्·॥ ❁ ॥

रोतीतिप्रयोगापत्तिरितिवाच्यम्·लक्ष्यानुरोधेनैताद्रशेविषयेताद्रशार्थभेदेनविवक्षायाअस्वीकारइतिस्वीकारात्·तदुक्तंहरिणा·भेदाभेदवि
वक्षाचस्वभावेनव्यवस्थितेति॥ ❁ ॥ इतिचतुर्थीविवरणम्॥ ❁ ॥ ध्रुवमपाये·ध्रुधातोःस्थैर्यार्थकात्कुटादेःपचाद्यचिनिष्पन्नोध्रुवशब्दः
स्थैर्यार्थकइत्यभिप्रायेणाह·ध्रुवंस्थिरमिति·अपायोविभागइति· नचनाशस्यापायपदार्थत्वंलोकप्रसिद्धमितिकथमेतद्व्याख्यानमितिवा
च्यम्·विभागजनकव्यापारस्यस्वजनकविभागजनकत्वसम्बन्धेनोत्तरदेशसंयोगनाशसम्बन्धितयाऽपायपदस्यतस्मिन्व्यापारेलक्षणा ४२६
स्वीकारात्·पतनमात्रन्तुनापायः।वृक्षमजहदपिभूमिंस्पृशतिपक्षेभूमिम्पततीतिप्रयोगात्·॥ ॥ ॥ ॥

मे· अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यमिहापि यथा स्यात्· अलं मल्लो मल्लाय। प्रभुर्मल्लो मल्लायेति भाष्यमप्यत्र मानम्· अत एवालं श्रमेणेत्र भवति। यथा
पर्याप्त्यर्थकशब्दयोगे तस्मै प्रभवतीति निर्देशाच्चतुर्थी तथानादरो विषये सत्त्वामिति निर्देशात्षष्ठ्यपि भवतीति मूलोक्तम्· आशीर्विषयत्वेति· स्वस्त्यर्थस्या
विषयत्वविवक्षायामित्यर्थः। यदुक्तं मूले परामपीति तच्च परस्परविषयपरिहारेण समवतीत्याशयेन तथा दर्शयति· स्वस्तियोगे इत्यादिना स्वस्तिशब्दा
र्थश्च मङ्गलम्। यथा स्वस्ति गोभ्यो भूयादित्यादौ स्वस्त्यर्थस्याशीर्विषयत्वमेवेति तु न नियमः। अत एव स्वस्ति वृषलायेत्यत्र तत्त्वकथनेऽपि चतुर्थी भवति

तत्र ज्ञापकमप्याह· तस्मै प्रेति· षष्ठ्या अपि साधुत्वे बीजमाह सत्त्वामिति· आशीर्विवक्षायामिति· आशीर्विषयत्वविवक्षाया
मित्यर्थः। स्वस्त्यर्थः कुशलं मङ्गलं वा। स्वस्तियोगे च चतुर्थ्या अवकाशः स्वस्ति जाल्माय यास्यतीति तत्त्वकथनम्· कुशलार्थैरा
शिषीत्यस्यावकाशः स्वस्तिभिन्नाः कुशलार्थाः स्वस्तिशब्दोऽव्ययमपि। प्रतिगृह्णामि ते धेनुं कुटुम्बार्थे विशेषतः। स्वस्ति
र्भवति मे नित्यं सुखं चानुत्तमं तथेति विभविष्योत्तरे प्रयोगात्। मन्यकर्मणीति तिरस्कार इति· अनादरो नादराभावमात्रमपि
तु नञोऽधर्मादाविव प्रतिपक्षवाचित्वात्तिरस्कार इति भावः। तत्रानादर इति मन्यकर्मविशेषणेन द्योतकं यत्कर्मेत्यर्थः। ते
न युष्मच्छब्दाच्चतुर्थी न· तिरस्कारश्च व्याख्यानादपकृष्टनिरूपितोपमेयत्वस्याप्यभावरूप उपमेयेऽत्र गृह्यते॥ ॥

सूत्रे पूर्वोत्तरसाहचर्यात्स्वस्तिशब्दोऽव्ययसंज्ञक एव गृह्यते तदेतदाह· स्वस्तिशब्द इति· मन्यकर्मणीति सूत्रव्याख्यानवेलायां यदुक्तं मूले तिर-
स्कार इति तत्साधोपायमाह· अनादर इति· व्याख्यानादिति· तिरस्कारग्रहणं कर्तव्यमिति वार्तिकमूलकात् तिरस्कारश्चापकृष्टनिरूपितोपमेय-
त्वाभावो यत्र प्रतिपाद्यते तत्र स्पष्टं प्रतीयते·॥

भै·यथाऽसतोविवक्षाभवतीति।यदिप्रकृतभाष्यङ्कैयटरीत्याव्याख्यायेततदासिद्धान्तभाष्याक्षराणामस्वारस्यन्नोपपद्यतेप्रधानव्यापा
राश्रयत्वरूपस्यत्वदभिमतस्याध्रौव्यस्यात्रकदाप्यसत्वात्तस्माच्छेखरोक्तरीत्याव्याख्यानमेवोचितम्·लोकप्रसिद्धातिरिक्तेति·लोकसिद्धःलो
कप्रसिद्धोयोध्रुवपदार्थोनिश्चलत्वरूपस्तदतिरिक्तइत्यर्थः।शक्तिरिति·नचोक्तरीत्यालक्षणैवकल्प्यतइतिवाच्यम्·प्रसिद्धशक्यार्थमादायप्रा
प्तबोधसम्भवेलक्षणायाअनुचितत्वात्·सूत्रार्थमाह·तस्मादित्यादि·स्वरीत्याशङ्कासमाधानभाष्यंयोजयति·त्रासादेरिति·आदिनाधावनपरि

भाष्यानुसारिणस्तुएवंहित्रासादश्वात्पतितोधावतःपतितइत्यादौध्रुवत्वाभावादपादानत्वन्नस्यादित्याशङ्क्याध्रौव्यस्याविव
क्षितत्वमत्रायतःसतोप्यविवक्षाभवतीतिसमाहितम्भाष्येतदसङ्गतंस्यात्·त्वदुक्ताध्रुवत्वस्यपतधात्वर्थव्यापाराश्रयत्वा
त्यात्रासत्वेनसतोऽध्रौव्यस्याविवक्षेत्यस्यासङ्गतेः।सिद्धान्तेपित्वदुक्तध्रुवपदार्थकथनमेवोचितमितितदसङ्गतिश्च
लोकसिद्धातिरिक्तेऽर्थेध्रुवशब्दस्यशक्तिकल्पनेगौरवञ्च·अतदावेशादित्यस्यहरिकारिकायान्तदावेशाविवक्षणादित्यर्थः
तस्मादपायेगतिविशिष्टेसतियद्ध्रुवमवधिभावोपगमाश्रयत्वेसतितदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयन्त

ग्रहः।ननुयदिकैयटोक्तरीत्याध्रुवमपायइत्यस्यार्थोवर्ण्येततदाकर्तृवारणायध्रुवमपायइतिचरितार्थम्·((दपादानमितिसूत्रार्थः॥
तन्मतेऽपायेगतिविशेषेयद्ध्रुवन्तदाश्रयइत्यर्थाद्ध्रुवग्रहणाभावेऽपायात्मकक्रियाजनकमित्यर्थेकर्तरिसूत्रप्राप्तेरेववाच्यतयाकर्तृसञ्ज्ञाया
इयमपवादःस्यात्।परन्त्वेवन्ध्रुवग्रहणाभावेसूत्रार्थोवक्तुमशक्यः।ध्रुवग्रहणङ्किमर्थम्।ग्रामादागच्छतिशकटेनेतिकरणेऽतिप्रसङ्गापादानप
रभाष्यविरोधात्।नहिकरणंविभागजन्यसंयोगजनकक्रियात्मकापायजनकम्।किन्तुतादृशापायघटकविभागजनकत्वेनकरणस्यकारकत्वा

दपादानसञ्ज्ञायाःप्राप्तिरितिभाष्यस्याभिप्रायो ४२२

मे॰ एवञ्चोत्तरभाष्येणकरणसञ्ज्ञात्रबाधिकाभविष्यतीत्यनेनयथापरत्वात्करणसञ्ज्ञायाबाधकत्वन्दर्शितन्तथाग्रामादायातीत्यत्रग्रामे
चरितार्थमपादानसञ्ज्ञाङ्कर्तृसञ्ज्ञाबाधिकाभविष्यतीतिनकर्तृवारणन्ध्रुवग्रहणप्रयोजनमित्याशयेनाह॰ ध्रुवमपायइतित्विति॰ इदञ्च
प्रयोजनमपायघटस्याएतदभावेध्रुवङ्कारकमित्येवोक्तौवृक्षस्यपर्णम्पततीत्यत्रवृक्षस्यपथाऽपादानत्वप्राप्तिस्तथाह॰ वस्तुतइत्यादि॰ अत्र

त्रासादेरवधित्वोपयोगित्वाश्रयेणशङ्का वृक्षात्पर्णमित्यादौतस्यासत्वात्रतदुपयोगित्वन्तस्य॰प्रकृतेतुविद्यमानस्यापित
स्याविवक्षितत्वान्नतदुपयोगित्वन्तस्येत्युत्तरम्॰ ध्रुवमपायइतितुवृक्षस्यपर्णम्पततीत्यादौवस्तुतस्तस्यपर्णद्वारापातजन
कत्वात्प्राप्तापादानत्ववारणाय॰एवञ्चापायेइतिकारकेइत्यस्यक्रियाजनकत्वेनविवक्षितइत्यर्थस्तात्पर्यग्राहकम्बोध्यम्॰
ध्रुवग्रहणनुकारकान्तराणामिवापादानस्यावधिभावोपगमातिरिक्तव्यापाराश्रयत्वाभावबोधनायेत्याहुः।अपादानत्वश
क्तिश्चप्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभिव्याहारेविभागोपिधात्वर्थइतिबोध्यम्॰एवञ्च
वृक्षात्पततीत्यादौतदपादानकविभागपूर्वकःसंयोगःपर्णवृत्तिरितिबोधः।वृक्षाद्भूमिम्पततीत्यादौवृक्षापादान-
कविभागपूर्वकःसंयोगानुकूलोव्यापारइतिबोधः॥ ॥ १ वृक्षस्यक्रियायामेवान्वयोनतुपर्णेतथासतितस्यकारकत्वा
भावसम्भवःस्यात्।ध्रुवग्रहणप्रयोजनमाह॰ ध्रुवग्रहणन्त्विति॰ तथाचतदभावपूर्वोक्तस्थलेकरणेऽतिप्रसङ्गः।अतिरिक्तव्यापाराभावे
ति॰ सचवृक्षस्यपर्णमित्यत्रवृक्षेनास्तीतिभावः।वृक्षात्पततीत्यादाविति॰ अत्रविभागजन्यःसंयोगोऽर्थःपतेः।वृक्षाद्भूमिम्पततीत्यादाविति॰
अत्रविभागजन्यसंयोगानुकूलव्यापारःपतधात्वर्थः॥

शा॰प्र॰ मै॰ ननुपरस्परस्मान्मेषावपसरतइत्यत्रमेषपदोपात्तयोरेवपरस्परशब्दार्थतयातयोरेवविभागोपगमातिरिक्तव्यापाराश्रयत्वाभावेनकथमपादान
टी॰ भै॰ त्वमतआह॰ परस्परेति॰ वाचकशब्दरूपोपाधिगतभेदस्यवाच्यार्थआरोपेणतयोरप्यर्थयोर्भेदात्कर्तृत्वापादानत्वयोरुपपत्तिरितिभावः। अन्यत्र॰ उद्योते। कै

४५८ परस्परस्मान्मेषावपसरतइत्यादौमेषपदोपात्तयोरेवक्रियाश्रयत्वात्कर्तृत्वम्परस्परपदोपात्तयोरेवविभागाश्रयत्वादपादानत्वम्॰ मेषपदोपात्तेनतद्विवक्षणात्प्रयोगानुसारित्वाद्विवक्षायाः। विभागपूर्वकमुत्तरतोगमनंह्यपसरणम्॰ आत्मानमात्मनेत्यादावन्तःकरणाद्युपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाभ्युपगमेमानाभावात्॰ शब्दालिङ्गितार्थभानस्यैवसत्त्वाच्चेत्यन्यत्रविस्तरः। यत्तुपसरतइतिसृधातुनागतिद्वयस्याप्युपादानादेकनिष्ठाङ्गतिम्प्रतिइतरस्यापादानत्वमविरुद्धमिति तन्न॰ वस्तुतस्तन्निष्ठव्यापारयोर्भेदेपिसृधातुनानिवृत्तभेदस्यैवापायस्योपादानादुभयोरपितत्क्रियाश्रयत्वेनपरत्वात्कर्तृत्वापत्तेः। अतएवैकशेषसूत्रेभाष्येउक्तम्॰ वैतिङन्तानेकशेषारम्भप्रयोजनंक्रियाया एकत्वादिति धनुषाविध्यतीत्यत्रनिःसरच्छरजन्यवेधनार्थत्वाद्धधेरपादानत्वाकरणत्वोभयप्राप्तौपरत्वात्करणत्वम्बोध्यम्॰ ग्रामादायातीति॰ आयातेर्विभागपूर्वकोत्तरदेशसंयोगानुकूलोव्यापारोऽर्थः। वृक्षस्त्यजतीत्यादौव्यापारव्यधिकरणविभागस्यैवधात्वर्थत्वेनकर्मसंज्ञयापादानत्वस्यबाधः॥

यदादिमतन्दूषयति॰ यत्त्विति॰ अतएव॰ निष्पन्नस्यैवा णमः
पादानादेव॰ ननुव्यधधात्वर्थेपिविभागस्यप्रवेशात्तद्योगेधनुषाविध्यतीत्यत्राप्यपादानसंज्ञाप्राप्नोतीत्यतआह॰ धनुषेति॰ ननुत्यजधातोर्विभागानुकू ४५८
लव्यापारार्थकत्वात्तद्योगेप्यपादानत्वंस्यादतआह॰ वृक्षमिति॥

मै· तत्र विशेषमाह· विभागश्चेति· स्वसिद्धान्तमाह· भाष्यानुसारिणस्त्विति· स्वदुक्ता ध्रुवत्वस्य। तद्धात्वर्थव्यापारानाश्रयत्वस्वरूपस्य· एवं हि तत्र भाष्ये उक्तम्· गति
युक्तेष्वपादानसंज्ञा नोपपद्यते ऽध्रुवत्वात्। रथात्प्रवतात्पतितः। अश्वात्त्रस्तात्पतितः। सार्थाद्गच्छतो हीन इति। अत्र त्रासो मानसो धर्मः। नहि तेनाश्वस्याध्रुवत्व
हानिरिति शङ्कामपनेतुमाह कैयटः। त्रासपूर्वके परिस्पन्दने ऽनेकार्थत्वाद्धातूनां त्रसिर्वर्तते त्रस्तस्याश्वस्य पातस्य निमित्तमिति पूर्वमश्वस्य त्रस्तत्वेन सम्बन्धः प
श्चात्पतित इत्यनेनेति ध्रुवत्वमश्वस्य नास्तीति तत्समाधानम्भाष्ये न वा ऽध्रौव्यस्याविवक्षितत्वात् न वा एष दोषः। किं कारणम् अध्रौव्यस्याविवक्षितत्वात्· नात्राध्रौव्यं
विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव। किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिकल्पितोऽपि। माथुराः पाटलिपुत्रकेभ्य आढ्यत
रा इत्यादौ बुद्धिकल्पितापायाश्रये ऽपि च भाष्ये पञ्चमीसाधनात्· कर्तृवारणाय ध्रुवमिति। अन्यथा कर्तृसंज्ञापाद इयमपवादः स्यात्· अ
पायविषये परत्वात्कारकत्वद्रूपक्रियाजनकत्वादपादानमित्यर्थसम्भवात्कर्तृसंज्ञानुपपत्त्या द्वियोगे चरितार्थो हरिरप्याह· अपाये यदुदा
सीनं चलं वा यदि वाचलम्। ध्रुवमेवातदावेशात्तदपादानमुच्यते इति। स्पष्टं चेदं पदादौ· ॥ विवक्षितम् किन्तर्हि ध्रौव्यम्· अत्र कैयटः। ध्रुवमेकरूपम्
तच्च ध्रौव्यमपायविषयमपायमाश्रीयते न त्वनवच्छिन्नम्· अपाय इति· प्रत्यासत्तेरिति भावः। अपायेति· विभागजसंयोगानुकूलो गतिविशेषो ह्यपायः स
च प्रधान एव प्रत्यासत्तेः स चात्र पतिनोपात्तः न च तदाश्रयोऽश्वस्तथात्वे कर्तृत्वापत्तेः। न त्वनवच्छिन्नमिति· अनिरूपितमित्यर्थः। ततो भाष्ये शङ्का ― सतो
नामविवक्षा स्यात् सतोऽप्यविवक्षा भवति। तद्यथा· अलोमिका एडका। अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुण्डिका― विन्ध्यो वर्धितक
मिति। एतद्भाष्ये ऽसतश्च विवक्षेति निदर्शनार्थमुपात्तम्· ॥

मे॰ कर्म चात्र ग्लानिविषय एव स चाध्ययनादिः। परापूर्वको जिधातुश्च क्वचिदभिभवे वर्त्तते। यथा शत्रून्पराजयत इति इह बलसोढग्रहणान्न्यूनीभावार्थ
कः। न्यूनीभावश्च शक्तिवैकल्यादिरूपः। अध्ययनाच्च षष्ठ्याम्प्राप्तायामिदं वचनम्। ग्लायतीत्यस्य शक्तिविकलो भवतीत्यर्थः धातोरकर्मकत्वे एवै
तन्सूत्रोदाहरणम्। यदा त्वयं सकर्मकस्तदा प्रत्युदाहरणम्॰ उदाहरणे पराजयत इत्यत्र कालो न विवक्षितः। तेनाध्ययनात्पराजिष्यत इत्यत्रापि सि
द्धम्॰ यवेभ्यो गां वारयति कूपादन्धं वारयति दुराचारादनुकम्प्यम्वारयतीत्यादि सकलसाधारण्येन वारयतेरर्थमाह॰ भक्षणेत्यादिना॰ आदिनाक्षया

एवञ्च पराजेरकर्मकत्वे उदाहरणलक्षनदाह॰ ग्लायतीत्यर्थ इति॰ अभिभवतीति॰ तिरस्कारानुकूलो व्यापारो धात्वर्थ इतिभा
वः। प्रवृत्तिविघात इति॰ भक्षणसंयोगादिजनकव्यापाराभावानुकूलो व्यापार इत्यर्थः। ईप्सित इति॰ वारणार्थधात्वर्थफलाश्र
य इत्यर्थः। उदाहरणे च तद्धात्वर्थव्यापारजन्यसंयोगादिरूपफलाश्रयत्वाद्यवानामपादानत्वमीप्सित इत्यनेन प्रधानाप्रधा
नान्यतरव्यापाराश्रयमात्रस्याक्षेपः। कर्मलक्षणे तु तमप्ग्रहणात्प्रकृतधात्वर्थप्रधानभूतव्यापारप्रयोज्यप्रकृतधात्वर्थ
फलाश्रयस्य ग्रहणमिति भावः। अन्तर्द्धौ॰ अन्तर्द्धिरन्यकर्त्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशस्थितिरूपस्तद्धेतुकं
यत्कर्त्तृकदर्शनाभावमिच्छति तदपादानमित्यर्थस्तत्फलितमाह॰ व्यवधाने सतीति॰॥ ९९ नानुकूलव्यापाराभावानुकूलव्यापारसम्
न्बन्धः। धात्वर्थफलाश्रय इति॰ प्रधानीभूतव्यापारप्रयोज्याभावप्रतियोगिव्यापारजन्यभक्षणसंयोगाद्याश्रय इत्यर्थः। अप्रधानेति॰ अभावप्रति
योगिभूत॰ एवञ्च तद्व्यापारजन्यफलाश्रयत्वाद्यवादेः। ईप्सित इत्यत्र कर्मणि क्तः। आश्रयमात्रस्य। कर्त्तुः। ननु कर्मसञ्ज्ञापत्ति ४२९
रत आह॰ कर्मलक्षण इति॰ कर्त्तुरीप्सिततममित्यत्रेत्यर्थः। तद्धेतुकमिति॰ प्रत्यासत्त्या यमेव येनेत्यत्र यच्छब्दार्थः। सा चान्तर्द्धिर्यद्यपीच्छति शब्द।।

मे॰ घटकारकत्वात्तादर्थ्यकर्तृनिष्ठा तथापि दृष्टेशास्त्वेति वदन्नद्दृविति सप्तमी। उपपदविभक्तेरिति न्यायात्· न तु सति सप्तमी॥ ॥ ननु मातुर्निलीयत इ-
त्युदाहरणे व्यवहितदेशस्थितेर्धातुप्रतिपादनेपीच्छायाः कथं लाभ इत्यत आह· आक्षेपलभ्येति· इच्छाया प्रयत्नप्रयोजकत्वादाक्षेपः। ननु दृष्ट-
क्षत इत्यत्र सन्नन्तादर्शनेच्छालाभेपि येनादर्शनमित्यर्थालाभात्कथमपादानत्वप्राप्तिरत आह· इच्छामात्रस्येति· विशिष्टस्येति· चोरकर्तृकस्वक-

येनेत्यत्र कर्तृकर्मणोरिति षष्ठी न सौत्रत्वात्· आत्मन इति प्रत्यासत्तिलब्धम्· मातुर्निलीयत इत्यादावाक्षेपलभ्येच्छा बोध्या·
चोरानिति· चोरकर्मकदर्शनेच्छाभाव इति शाब्दोऽर्थः। स च चोरकर्तृकस्वदर्शनाभावायेति प्राप्तिः। इच्छामात्रस्याक्षेपलभ्य-
त्वेऽपि विशिष्टस्याक्षेपलभ्यत्वेऽपि स्यादिति भावः। प्रकृतेनान्तर्द्धिरिति निर्देशः। येनेत्यस्याभावे हि स्वकर्मकदर्शनाभावं यद्
इच्छतीत्यर्थे कर्तुरेव स्यात्तत्राह· इच्छतिग्रहणाद्धिमिति· अन्तर्द्धौ सति यत्कर्तृकदर्शनस्याभावस्तदपादानमित्यर्थोऽस्येति भा-
वः। सत्यपीति· अदर्शनेच्छया तदनुकूलव्यापारकरणे दैववशाद्दर्शने सत्यपीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादि-
ति भावः। नियमेति· उपयोगशब्दस्य तत्रैव रूढेः। नियमो ब्रह्मचर्यादिः। नटस्येति· नटजन्यश्रवणमिति बोधात्कारकत्वं नियमपू-
र्वकविद्यावक्तृत्वाभावान्नेत्युत्तरम्· जनिकः प्रकृतिरुपादानकारणम्· ब्रह्म च मायाशबलं जगदुपादानकारणम्· हेतौ हेतु-
परमप्युपादानकारणपरमेवेति बोध्यम्॥

॥ र्मकदर्शनाभावरूपविशिष्टस्येत्यर्थः। यदिच्छतीत्यर्थ इति· इच्छतिशब्देन क-
र्तुरुपस्थितत्वात्कर्तृलाभ इति भावः। उपयोगशब्दस्य प्रयोजनादिपरत्वभ्रमनिरासायाह· उपयोगशब्दस्येति· नटजन्यमिति· क्वचित्तु गाथामिति
पाठः स चायुक्तः। षष्ठ्यन्तार्थस्य स्वान्वययोग्यनामसमभिव्याहारे तत्रैवान्वयस्योत्सर्गतया कारकत्वानुपपादनात्· प्रकृतिरुपादानकारणमिति॰

श॰शे॰ भै·अस्मिन्नेवार्थेप्रकृतिशब्दस्यलोकप्रसिद्धेः।मूलासङ्गतिपरिहारायाह·हृत्ताविति·मेवेति·वेदान्तसिद्धान्तात्॥ःः॥ननुब्रह्मशब्दार्थस्यगुणत्वाभा
टी॰भै॰ वात्कथंविभाषेत्यस्यप्राप्तिरतआह·तत्रहीति·भुवःप्रभवइतिसूत्रघटकप्रभवशब्देऽधिकरणेऽविसाशयेनाह·तदधिकरणमिति·जन्महेतौ·जन्मभू
४३० मौ।अतिप्रसङ्गंवारयति·प्रकाशतइतिसूत्रेप्रशब्दोपादानात्प्रथमप्रकाशार्थकधातुयोगएवेदमितिभावः।ननुल्यप्लोपविधायकशास्त्रस्यानुपल
विभाषेत्येवसिद्धेरिदमपादानत्वेनवोधनार्थम्·तत्रहि·गुणेऽस्त्रियामितिप्रायिकंवाहुलकग्रकृतेस्तनुदृष्टेरितिवार्तिकप्रयो
गात्·भुवःप्र·प्रभवनम्प्रथमःप्रकाशः।प्रग्रहणात्·तदधिकरणमपादानमित्यर्थः।प्रभवोजलमूलेस्याज्जन्महेतौपराक्रमेज्ञान
स्यचादिमस्थानइतिविश्वः।प्रकाशतइत्यस्ययोगेतुन·प्रथमप्रकाशार्थत्वाभावान्नदाह·तत्रप्रकाशनइत्यर्थइति·ल्यप्लो
पइति·ल्यवन्तशब्दात्तानइत्यर्थः।कर्मणीतिप्रत्यासत्याल्यवन्तधात्वर्थस्येतिभावः।प्रासादादिति·फलेभ्योयातीत्यत्रेववो
धप्रक्रिया·आजघ्नेविषमविलोचनस्यवक्षइत्यत्रकर्मणःशेषत्वविवक्षयाषष्ठी·वक्षइत्यस्यप्राप्येतिशेषः।गम्यमानापी
ति·विशिष्यतद्वाचकशब्दानुपात्तापीत्यर्थः।कस्मात्त्वमित्यादौफलेभ्योयातीत्यत्रेववोधप्रक्रिया·अन्यत्यर्थेति·तदर्थश्चभे
दवान्।अतएवघटाद्भिन्नइत्यादिसिद्धिः॥ ९ म्भात्ल्यप्लोपइत्यनुपपन्नमतआह·ल्यवन्तशब्दात्तानइति·वोधप्रक्रियेति·वाक्यैक ४३०
देशन्यायेनेत्यर्थः।नन्वाजघ्नइत्यत्रयथाश्रुतान्वयेऽकर्मकत्वस्याङ्कत्वयोरभावेनकथमात्मनेपदमतआह·आजघ्नइति·कर्मणः।विषमवि
लोचनशब्दार्थस्यवक्षइत्यस्यानन्वितत्वंवारयति·प्राप्येतिशेषइति·एवञ्चात्रप्राप्येतिशब्दाध्याहारेणल्यवन्तशब्दात्तानसत्वाल्ल्यप्लोपइ
तिपञ्चम्यापत्तिरितिभावः।इत्यत्रेवेति·वाक्यैकदेशन्यायेनेत्यादिः।अतएव·अन्यशब्दस्यभेदविशिष्टार्थकत्वादेव॥। ॥ ॥

भे· स्पन्देर्विभागानुकूलव्यापारार्थत्वेनतद्योगेप्राप्तामपादानसंज्ञां वारयति· स्पन्देस्त्विति· कर्मप्रत्ययान्तेति· अतएवदेवदत्तः सार्थंजहातीत्यत्रनापा
दानत्वम्। सार्थस्यज्ञापकेनापादानत्वेपिकर्मसंज्ञामुपपादयति· कर्मसंज्ञायामिति· धावतइत्यत्रोभयमतेप्यपादानत्वमुपपादयति· क्रियाविशिष्टस्ये
स्पन्देस्तुनविभागोर्थइतिवृत्तः स्पन्दतइत्येव· चलतेस्त्वासनाच्चलितइतिप्रयोगादस्येवविभागार्थत्वम्· सार्थाड्डीयतेइत्यत्रसा
र्थस्यधात्वर्थप्रधानव्यापाराश्रयत्वेप्यपादानेचाहीयरुहोरितिज्ञापकात्कर्मप्रत्ययान्तहीयधातुयोगेपादानत्वम्· कर्मसंज्ञाया
श्चकर्तृपरत्वंस्वतन्त्रोपलक्षणमितिकर्मणिलकारः सार्थेनत्यज्यतेदेवदत्तइत्यर्थः। धावतइति· क्रियाविशिष्टस्याप्यश्वस्यग्रह
तधातूपात्तगत्यनावेशाद्धावनस्याविवक्षणाद्वा ध्रुवत्वम्बोध्यम्· जुगुप्सेत्यादि· जुगुप्सादीनांयद्विषयकत्वेनविवक्षातदापा
दानम्· तस्यैवविषयस्यक्रियाजनकत्वरूपकारकत्वेनाविवक्षायांसम्बन्धित्वेनचविवक्षायाम्पापस्यजुगुप्सतइतिषष्ठीभवत्ये
वसत्यभिधाने· एवमुत्तरसूत्रेष्वपिबोध्यम्· एषान्धातूनांस्वार्थपूर्वकबौद्धविश्लेषजनकनिवृत्तिलक्षणयासूत्रेणैवसिद्धेर्दवा
र्तिकमुत्तरसूत्राणिचप्रत्याख्येयानिइतिभाष्येस्पष्टम्· भयमभीत्राणेत्रासदाह· भयार्थानामिति· हेतुतृतीयवादोयम्· अरण्ये
इति· भयाद्यर्थानांयोगेकारकमपादानमित्यर्थः विशेषात्सर्वसंज्ञापवादोयंस्यादितिभावः। पराजेः। असोढोग्लानिविषयः
ति· भीत्रार्थेतिसूत्रेभययहेतुरित्यस्योपादानादाह हेतुतृतीयेति· असोढोग्लानिविषयइति· अत्रासोढपदार्थविशेषणीभूतग्लानिरसहनम्· कि
श्चिद्विषयकदुःखरत्वज्ञानमितियावत्· असोढइत्य त्रकर्मणिक्तः॥

श्री·शे· भै· अतएव· अवयविवाचकादेवत्तापकेनपञ्चम्यभावस्वीकारस्येव· अस्मादिति· भागविशेषादित्यर्थः।अत्रपूर्वशब्दः पूर्वकालावच्छिन्नपरः।त——— ॥
टी·भै· स्य· अञ्चूत्तरपदस्य। प्रत्ययग्रहणादिति· प्रत्ययशब्दस्यप्रत्यायकपरतया श्रूयमाणत्वलाभः। श्रूयमाणएवहि प्रत्यायको भवति· भाष्ये स्पष्टमिति· तत्रत्ये
४३१ वमुक्तम्· प्रत्ययग्रहणं किं· मर्थम्। इहमाभूत्। प्राग्ग्रामात्। प्रत्यग्ग्रामात्। अञ्चुत्तरपदस्याप्येतत्प्रयोजनमुक्तम्। तत्रान्यतरच्छक्यमवक्तुमिति।का

अतएवास्मादयम्पूर्वभागः कायस्येति सिद्धम्· अवयवे पूर्वत्वन्त्ववयवान्तरापेक्षया प्राथमकालिकोत्पत्तिकत्वेन बोध्यम्· अ
ञ्चूत्तरपदस्येति· दिक्छब्दसाहचर्येण तस्य दिग्वाचकस्यैव ग्रहणम्· तेन सध्र्यङ्· इत्याद्यर्थन्तन्नेति भावः। बाधितुमिति· परत्वा
त्प्राप्तामित्यादिः। यदितु षष्ठ्यतसर्थे सत्र प्रत्ययग्रहणात्तस्य श्रूयमाण प्रत्यय एव प्रवृत्तिस्तदेदम्मास्त्विति तत्त्वमिति भाष्ये स्प
ष्टम्· दक्षिणाग्रामादिति· दक्षिणस्यान्दिश्यत्यर्थे दक्षिणादाजाहि च दूरे इत्याजाही। षष्ठ्यतसर्थेत्यस्यापवादः। प्रभृतियोग इति·
प्रभृत्यर्थयोग इत्यर्थः। अपादाने पञ्चमीति सूत्रे यतश्चाध्वकालनिर्माणन्ततः पञ्चमी कार्तिक्या आग्रहायणी मास इति वा
र्तिकप्रत्याख्यानायेदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्तिक्याः प्रभृत्याग्रहायणी मास इति भाष्येण प्रभृतिशब्दाभावेपि तदर्थ
सत्तामात्रेण पञ्चमीत्यर्थकेन प्रभृत्यर्थयोगे पञ्चमीति वचनस्य त्वस्य भगवता बोधितत्वादन्यथा प्रभृतिशब्दाभावे पञ्चम्यर्थं व
चनावश्यकत्वेन तत्प्रत्याख्यानासङ्गतिरिति भावः। एवञ्चान्तरर्थकारभ्यशब्दयोगेपि पञ्चमी यथा अवीचिमारभ्य मेरुपृष्ठ
पर्यन्तम्भूलोको मेरुपृष्ठादारभ्य ध्रुवपर्यन्तङ्गगनस्यत्र तारागणचित्रितोन्तरिक्षलोक इति पातञ्जलभाष्यप्रयोगे·॥ ॥ ४३१

र्तिक्याः प्रभृतीति भाष्यप्रयोगात्प्रभृतिशब्दयोगे पञ्चमीति भ्रमनिवारणायाह· प्रभृत्यर्थेति· अन्यथा· प्रभृतिशब्दयोगे न त्वत्र पञ्चम्यङ्गीकार एवं सति

भे॰ यत्फलितन्तदाह॰ एवञ्चेति॰ प्रभृत्यर्थयोगे पञ्चमी सर्थस्वीकारे चानन्वेवमर्वाचीमारभ्येत्यत्रापि पञ्चमी कुतो नेत्यत आह॰ अर्वाचीमार
भ्येति॰ प्रभृतीत्यारभ्येत्यर्थकमव्ययम्॥ ॥ एतदर्थकतापि अवधिमात्रापेक्षसर्थतापि अपिना गृहीत्वेत्यर्थकतायाः सङ्ग्रहः। मेरुपृष्ठादारभ्ये
तिवाक्यस्योपपत्तिमाह॰ नन्वर्वाचीमारभ्येत्यस्य कथमुपपत्तिरित्यत आह॰ आरभ्येत्यस्येति आर्वा च नरकविशेषः इत्यादाविति॰ अत्रादिनाप्रा

प्रभृतीत्यस्य चावधिमात्रापेक्षत्वम्। आरभ्येत्यस्यैतदर्थकतापि। अवधौ च पञ्चम्युक्तार्थस्याभेदेनान्वयः। तद्विशेष
णत्वेपि न द्वितीया। प्रभृत्यर्थयोगे पञ्चमीति भाष्यकृद्बोधितवचनात्॰ आरभ्येत्यस्य गृहीत्वेत्यर्थे नार्वाचीमार
भ्येत्यादौ द्वितीया॰ वस्तुतोऽवधित्वन्तस्य समभिव्याहृतपदार्थनिरूपितं गम्यमानक्रियापेक्षमित्युपादानत्वा
देवात्र पञ्चमी सिद्धा कार्तिक्या विभक्तेः॰ अत एव कार्तिक्यवधिके आग्रहायणीघटितमासे कार्तिकीमादा
यगते आग्रहायणीति बोधः। भवात्प्रभृति आरभ्य वेत्यत्र भवकालाद्विभक्तौ। अत एव भवावधिके मरणान्तेका
ले भवकालमादाय हरिः सेव्य इति बोधः। एवमन्यत्राप्यूह्यमित्यलं विस्तरेण॰ ज्ञापकादिति॰ पञ्चम्यन्तेन समास
विधानाज्ज्ञापकादित्यर्थः। अयम्भावः॥ ८८ ततः कालमारभ्य पठतीत्यादिसङ्ग्रहः। ज्ञापनं विनापि कार्तिक्याः प्रभृतीति प्रयोगोपपत्तिमाह॰
वस्तुत इति॰ समभिव्याहृतपदार्थो मासादिः। गम्यमानक्रियापेक्षमिति॰ गम्यमानाया क्रियागमनादिरूपा तदपेक्षमित्यर्थः। तदेवोपपादयति॰ कार्त्तिकीतर
ति॰ नन्वयपरिवहिरञ्चव इति सूत्रस्थ पञ्चम्या इत्यस्यापादियोगे चारितार्थ्यात् सञ्चम्यन्तेन समासविधानाज्ज्ञापकादित्य स्यानुपपत्तिरत आह॰ अयमभा

मे॰ सिद्धः समासइति॰ एवञ्चपञ्चम्याउत्पत्त्याभावेपितृतीयान्तस्यसुपेत्यस्याभावेपितृतीयान्तस्यसुपेत्यस्यानुवृत्त्यैवेष्टसिद्धिरित्यर्थः। अञ्चूत्तरपदस्यपञ्चम्यन्तेनसमासार्थमपिनपञ्चम्याइतीत्याह॰ तत्साहचर्यादिति॰ पञ्चम्याअपित्रापनार्थमिति॰ एतेनपञ्चम्येत्यस्यापादियोगेचरितार्थ्यात्समर्थ्येनासुवन्तेनषष्ठ्यन्तेनचासमासोऽस्त्विति परास्तम्॰ ननुज्ञापकेनवहिः शब्देनयोगेपञ्चमी चेत्स्वीक्रियतेतदापञ्चमीप्रकरणेअन्यारादितरर्तेइतिसूत्रएववहिर्योगेचेतिकर्तुमित्यत आह॰ सापीति॰ अपिनाषष्ठीसमुच्चयः। सम्बन्धः। प्रतियोगित्वादिरूपः। अस्मादेवेति॰ यस्मादितिनिपात

परस्परसाहचर्यात्तत्रापपरीवर्जनार्थौकर्मप्रवचनीयावेवतद्योगेपञ्चम्यपाङ्परिभिरितिवचनात्त्वत्रलक्षणप्रतिपदोक्तपरिभाषयायपरिनिमित्तकसुवन्तस्यैवग्रहणाच्चपञ्चम्यैवसिद्धः समासस्तत्साहचर्यादुक्तपरिभाषयाचाञ्चूत्तरपदेनापितन्निमित्तपञ्चम्यैवसिद्धः समासइतिव्यर्थन्तद्वहिः शब्देनपञ्चम्यन्तेनसमासविधानद्वारातद्योगेपञ्चम्या अपित्रापनार्थमितिद्वदमपपरिवहि रितिसूत्रेभाष्येस्पष्टम्। पञ्चमीति॰ सापीत्यर्थः। तेनकरस्यकरभोवहिरितिसिद्धम्॰ प्रतिनिधिप्र॰ यस्मादितिपञ्चम्यर्थः सम्बन्धः। अस्मादेवनिपातनात्षष्ठ्यर्थेपञ्चमी। प्रतिनिधिप्रतिदानशब्दौकर्मकिभावल्युडन्तौ। प्रतिनिधिप्रतिदानेयत्सम्बन्धिनी ततः कर्मप्रवचनीययुक्तात्पञ्चमीत्यर्थः। प्रतिनिधिः सदृशः प्रतिदानन्दत्ततुल्यमूल्यस्यवस्तुनः प्रत्यर्पणम्॰ कर्तृवर्जितमिति॰ कर्तृसञ्ज्ञारहितमित्यर्थः॥ १९ नादित्यर्थः॥ मूलेएतत्सूत्रवृत्तौवहुवचनम्प्रयोगमेदात्॰ दत्ततुल्येति॰ दत्तस्यैवप्रत्यर्पणंसर्वत्रनसम्भवतीत्येवमुक्तिः। कर्तृवर्जितमित्यस्यकर्तृत्वावच्छिन्नप्रतियोगिता कभेदवदित्यर्थः प्रतीयतेसचासङ्गतः। शतपदार्थस्यापित्वस्वरूपधारणात्मकव्यापाराश्रयत्वेन कर्तृत्वादतआह॰ कर्तृसञ्ज्ञेति॰॥ ॥

भि॰ मूलोक्तरीत्याः स्यशब्दस्यार्थपरत्वेनव्याख्यानस्यप्रयोजनमुक्त्वा स्वमतमाह· परेत्विति· भेदस्यापीति· अपिना पूर्वोक्तार्थसङ्ग्रहः। ननुतस्यनधात्वर्थत्व
मतआह· भिदिरिति· अतएव· तस्यापितस्मिन्सूत्रेऽपायशब्देनग्रहणादेव· तस्य· नअर्थभेदवतः। ननुमूलोक्तरीत्याघटादेकइतिभवति। अन्यशब्दस्यार्थ
परत्वाभावेन त्वसिद्धेरतआह· घटादेकइति· अतएव· अर्थपरत्वादेव· अतएव· घटाद्भिन्नइत्यादौ ध्रुवमपायइतिसूत्रेणैवपञ्चम्युपपत्तेरेव· ननु

परेतुध्रुवमितिसूत्रेऽपायशब्देनभेदस्यापिग्रहणम्· पञ्चमीविभक्तेइत्यत्रविभागार्थकविभक्तपदेनभेदस्यैवव्याख्यानात्
भिदिर्विदारणेइत्यत्रभेदज्ञानविषयत्वमपिविदारणम्· एकत्वेनगृहीतस्यतथावोधेबुद्धिविदारणस्यनवापिसत्त्वात्· अत
एवघटाभेदइतिसिद्धम्· तद्योगेऽप्यपादानत्वात् तस्यैवसम्बन्धत्वेनविवक्षायांघटीयोभेदइत्यपि· अन्यशब्दस्याक्रियात्वा
त्तद्योगेएतद्विधानम्· अतएवघटःपटोनेत्यादौनपञ्चमी· नञोभेदवदर्थकत्वेपिअक्रियात्वात्· घटादेकइत्यादित्वसा
ध्वेव· अतएवेतरग्रहणञ्चरितार्थम्· अतएवभाष्येऽर्थग्रहणन्नोक्तमित्याहुः। आरादूरसमीपयोः। एतद्योगेदूरान्तिका
र्थैरितिप्राप्तम्· नन्वयन्देशवाचीनदिक्शब्दोऽतआह· दिशिदृष्टइति· शब्दग्रहणादितिभावः। तेचरूढ्यादिग्वि
शेषवाचकाः पूर्वादयएवगृह्यन्ते नैन्द्रीककुवारयोव्याख्यानात्· अवयववाचीति· तद्वाचिपूर्वादियोगेऽवयवि
वाचकान्नेत्यर्थः। ज्ञापकस्यसजातीयापेक्षत्वात्॥ ९९॥ चैत्रात्पूर्वइत्यत्रपूर्वशब्दःकालवाचकोनदिक्शब्दइतिकथम्पञ्च

ञ्चमीत्याशयेनावतारयति· नन्वयमिति· नन्वेवमेन्याद्दिशब्दयोगेपिप्राप्नोतीत्यतआह· तेचेति· व्याख्यानादितितेषांयत्रयोगस्तत्रपञ्च
म्यदर्शनमूलकाद्व्याख्यानादित्यर्थः। तद्वाचीति· अवयववाचीत्यर्थः॥ ॥ ॥ ॥ ॥

मे· क्वप्रकृतम्। अपादानेपञ्चमीति। अनधि ।कारात्। अनधिकारः सः। अधिकारेहि द्वितीयाषष्ठीविषयेप्रतिषेधोवक्तव्यः। दक्षिणेनग्रामन्दक्षिण
तोग्रामस्य· एवन्तर्हि अन्यतरस्याङ्ग्रहणसामर्थ्यात्पञ्चमीभविष्यतीतिभाष्यदर्शनेनसमुच्चयार्थत्ववर्णनात्। निपातानामनेकार्थत्वात्समुच्च
यार्थत्वञ्चनानुपपन्नम्। नचैवम्पञ्चमीद्वितीयेऽनुवर्त्तेतइतिमूलेयदभिहितन्तदसङ्गतिरितिवाच्यम्· अनुवृत्त्यभिधानस्यतद्भाष्योत्तरभाष्यग्र
न्थेनानुवृत्तिरप्यभिहितेत्यभिप्रायादितिनसन्दर्भविरोधः। एतेन· उक्तभाष्यविरोधेन। अन्यतरस्यामित्यस्यशब्दस्येतरदर्थकत्वेऽन्यतरस्या

एतेनान्यतरस्यामङ्गीकारइत्यर्थकम्पदद्वयमेतदित्यपास्तम्· विकल्पविषयेप्यर्थासङ्गतेश्च· परेतुद्वितीयासमुच्चयेन
फलंविनावातंविनावर्षमित्यादावृतेशब्दयोगइवततोऽन्यत्रापिदृश्यतइत्यनेनद्वितीयासिद्धेः। अतएवभाष्येद्वितीया
समुच्चयोनोक्तः। पञ्चम्या अधिकारेद्वितीयाषष्ठीविषयेप्रतिषेधोवक्तव्यः। दक्षिणेनग्रामन्दक्षिणतोग्रामस्येतिप्रकृत
सूत्रस्थभाष्येणएनपाद्वितीयेतिसूत्रंषष्ठ्यतसर्थेत्यतः प्रागितिचसूचितम्। अन्यथासौत्रक्रमत्यागेन्याय्यविपरीतपू

मित्यत्राप्ययमेवार्थोवाच्यस्सचासङ्गतः। अभावस्यविधेयप्रतियोगिकस्यतत्रानुपस्थितत्वे ((र्वनिपातकरणेचबीजानापत्तेः
नतत्रान्यतरशब्देनभावस्याभावस्यचग्रहणसम्भवात्। तन्मतेभाष्यान्तरविरोधमप्याह· विकल्पविषयइति· प्राचीनमतन्दूषयन्स्वसिद्धान्त
माह· परेत्विति· विनावर्षमिति· केनेमौपातिनौद्रुमावितिशेषः। द्वितीयासमुच्चयोनोक्तइति· अन्यतरस्याङ्ग्रहणसामर्थ्यात्पञ्चमीभवि
ष्यतीत्येवम्भाष्येउक्तम्। अनेनद्वितीयायाःसमुच्चयकथनन्दूषयित्वाऽनुवृत्तिकथनमप्यसङ्गतमित्याह· पञ्चम्या अधिकारइति·
प्रागितिचेति· एवञ्चषष्ठ्यतसर्थेतिसूत्रेद्वितीयाया असम्बन्धवत्प्रकृतसूत्रेपिसम्बन्धोनभविष्यतीतिध्वनितम्॥ ॥ ०

मे॰ अतएव प्रकृतसूत्रे तदसम्बन्धादेव· यद्यत्र द्वितीयासमुच्चयः स्यात्तदा करणे चेति सूत्रेऽपि पञ्चमीसमुच्चयार्थम्प्रकृतान्यतरस्याङ्ग्रहणस्यस
म्बन्धावश्यकत्वेन तत्रापि द्वितीयासमुच्चयः स्यादिति भावः। करणे च स्तोके ति सूत्रे कतिपयस्येति षष्ठ्यनुपपत्तिः। प्रत्ययविधौ पञ्चम्या युक्तत्वा
दत आह· षष्ठीगायोऽगितिवदिति· अद्रव्यवचनेभ्य इत्यस्य द्रव्यवचनभिन्नेभ्य इति नार्थः स्तोकादिशब्दानां शुक्लादिशब्दवद्गुणगुणिनिश-
क्तत्वाद्द्रव्यवचनभिन्नत्वाभावादत आह· द्रव्यभिन्नवचनेभ्य इति· एवञ्च यदा धर्ममात्रपराणां स्तोकादिशब्दानाम्प्रयोगस्तदोदाहरण

अतएव करणे चेति सूत्रे द्वितीयासमुच्चयो नेत्याहुः। करणे च स्तो· करणे तृतीयायाः सिद्धत्वेन पक्षे पञ्चम्यर्थमिदम्· च
कारस्तृतीयान्यतरस्यामित्यनुकर्षणार्थः। षष्ठी तु गायोऽगितिवत्· अद्रव्येति· द्रव्यभिन्नवचनेभ्य इत्यर्थः। द्रव्यपदेना
त्र सर्वनामपरामर्शयोग्यं लिङ्ग· निरूपितविशेष्यम्। स्तोकशब्दो यद्धर्मावेशाद्द्रव्ये स्तोकव्यवहारस्तद्धर्मपरः स च धर्मो
ऽल्पादिशब्दप्रवृत्तिनिमित्तमेव। शुक्लादिवच्चैते धर्मवचना अपि। करणत्वञ्च परम्परया ईदृशार्थत्वे च साधुत्वं सूत्रब।
लादिति स्पष्टमलुगुत्तरपद इत्यत्र कैयटः· करणे किम्· स्तोकम्पचति। असत्त्वभूतफलसमानाधिकरणत्वादत्र स्तोकशब्द
स्यासत्त्ववचनत्वमिति दिक्।

म्· धर्मिपरत्वे प्रत्युदाहरणम्· ननु धर्मवचनत्वे करणत्वमनुपपन्नमत आह· करणत्वञ्चेति॥
ननु स्तोकम्पचतीत्यत्र धर्मिपरत्वात्कथमद्रव्यवचनत्वमत आह· असत्त्वभूतेति· ननु पचधात्वर्थे फलं विक्लितिस्सा साविक्लिति
रित्येवं रीत्या सर्वनाम्ना परामृश्यत एवेति कथमसत्त्वमिति चेन्न· विक्लितिशब्देन यदा सोऽर्थ उच्यते तदा तस्य सर्वनाम्ना परामर्शेऽपि

मे॰ धातुप्रतिपाद्यत्वावस्थायान्तस्यसर्वनाम्नापरामर्शाभावात्। विकल्पशब्दार्थविकल्पस्यवाशब्देनप्रतिपाद्यत्वावस्थायामसत्वेन ॥ ॐ ॥ ननुव्यवहितसमुच्चयः प्रागेवनिरस्तइतिकथमत्रतृतीयार्थत्वकथनमतआह॰ व्याख्यानादिति॰ व्यवहितसमुच्चयार्थकचकारोपादानमूलकव्याख्यानादित्यर्थः। ननुदूरान्तिकार्थेभ्योविहितानान्द्वितीयातृतीयापञ्चमीनाम्प्रातिपदिकार्थमात्रेप्रवृत्तौकिम्मानमतआह॰ व्याख्यानादिति॰ दूरान्तिकार्थैःषष्ठ्यन्यतरस्यामितिसूत्रानन्तरन्तेभ्योद्वितीयाचेत्येवसिद्धेदूरान्तिकार्थेभ्यइत्युपादानन्तत्सूत्रविहितविभक्तीनाम्पूर्वविहिताभ्योवैलक्षण्यसूचनाय॰ एवञ्चविशिष्यार्थानुक्तेरनिर्दिष्टार्थाः प्रत्ययाः स्वार्थेभवन्तीत्यनेनताःप्रातिपदिकार्थमात्रेभ

दूरान्ति॰ अत्रदूरान्तिकार्थैःषष्ठ्यन्यतरस्यामित्यतस्समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्यैवार्थाधिकारात्पञ्चम्याः सिद्धौचकारोव्यवहिततृतीयासमुच्चयार्थव्याख्यानादित्याह॰ चादित्यादि॰ प्रातिपदिकार्थमात्रइति॰ व्याख्यानादिति भावः॥ इतिपञ्चमी॰ ॥ षष्ठीशेषे॰ शेषउक्तादन्यः। सचतत्तद्रूपेणस्वत्वादिः सम्बन्धत्वेनरूपेणच॰ ॥

वन्तीतिलभ्यतेइतिव्याख्यानादित्यर्थः॥ ॐ ॥ इतिपञ्चमीविवरणम्॰ ॥ ॐ ॥ षष्ठीशेषइति। सूत्रेयच्छेषपदन्तत्रशेषइत्युच्यतेकः शेषः कर्मादिभ्योयेऽन्येऽर्थाः सशेषइतिभाष्येउक्तन्तन्मूलकव्याख्यानादाह॰ उक्तादन्यइति॰ तत्तद्रूपेण॰ स्वत्वादिरूपेण। सम्बन्धत्वेनरूपेणचेति। वाच्यइतिशेषः। राज्ञः पुरुषोस्तीतिवाक्यजन्यशाब्दबोधानन्तरम्पुरुषोराजस्वत्ववान्नवेतिसन्देहोनभवतीति यथाविशेषरूपेवाच्यताकल्प्यते। तथाराजसम्बन्धीनवेतिसन्देहानुत्पत्तेः सामान्येनसम्बन्धत्वेनरूपेणचवाच्यताकल्प्यते॰ ॥

भेः एवञ्च कर्तृसंज्ञायाः क्रियायोग एव प्रवृत्त्या शताद्बद्ध इत्यत्र या बन्धनक्रिया तद्योगनिमित्तककर्तृसंज्ञाभावस्य तत्र सत्त्वाददोषः हेतुतृ-
तीयापवादभूतेयम्पञ्चमी। ननु तृतीयावाच्यकोटिनिविष्टमिति। अत एव ऋणत्वेन शाब्दबोधविषयत्वं प्रकृतसूत्रोदाहरणे शताद्बद्ध इत्यत्र
शतस्य हेतुत्वविवक्षैव तत्कर्तृसंज्ञा प्रत्युदाहरणे शतेन बन्धित इत्यत्र तत्प्रयोजको हेतुश्चेति सूत्रेण शतस्य हेतुसंज्ञा कर्तृसंज्ञा च। विभाषा
गुणेऽस्त्रियामिति सूत्रे योगविभागस्य पदमङ्गपूर्वोक्तस्यापि दर्शनादाह बाहुलकमिति इत्युक्तेति अस्योणादय इति सूत्रभाष्य इत्यादिः। प्रकृतसू-
त्रोदाहरणे जाड्यादित्यत्र जाड्यस्यान्तःकरणविशेषावच्छिन्नशरीरनिष्ठधर्मस्य बन्धनक्रियाकरणत्वं सम्भवति गुणत्वञ्च तस्य संज्ञाक्रि-

ऋणत्वं वस्तुसन्निमित्तं न तु तृतीयावाच्यकोटिनिविष्टम् हेतुभूतमिति तेन करणत्वविवक्षायान्तृतीयैवेति भावः। वि-
भाषा गुणे योगविभागादिति बाहुलकम्प्रकृते सदनुदृष्टेरित्युक्तवार्तिकप्रयोगाद्गुणेऽस्त्रियामिति प्रायिकमित्यन्ये
धूमादिति धूमपदं स्वज्ञाने ऽग्निमत्पदस्य ज्ञानविषये लाक्षणिकम्बोध्यम् समुच्चयार्थमिति स्पष्टञ्चेदम्भाष्ये ॥

याजातिभिन्नत्वात्सम्भवति। धूमादग्निमानित्यत्र धूमपदस्य जात्याश्रयवाचकतया कथं ऋणत्वम् कथञ्चाग्निमन्निरूपितं हेतुत्वं धू-
मपदार्थस्य तत्करणत्वाभावादत आह धूमपदं स्वज्ञान इति एवञ्च धूमपदस्याग्निज्ञाने ऽनुमितिरूपे कारणतायाः प्रसिद्धत्वान्न सूत्रोदा-
हरणत्वानुपपत्तिरिति भावः। स्पष्टञ्चेदमिति न चान्यतरस्याङ्ग्रहणस्य विकल्पार्थत्वेपि तृतीयाया अभावे प्रकृतसूत्रे पञ्चमी हि द्वितीयाया
अनुवर्तनादेव तयोः पर्यायेण प्रवृत्तिर्भविष्यतीति किं समुच्चयार्थत्ववर्णनेनेति वाच्यम् पृथगादिसूत्रे पञ्चमीविधानम्। पृथगादिषु पञ्च-
मी विधेया। पृथग्देवदत्तात्। किङ्करणम् न प्रकृतपञ्चमीग्रहणमनुवर्तते॥

भि॰ श्रुतायामश्रुतायां। वाक्रियायामभिधीयतेइतिहर्युक्तेराह· यद्वेति कारिकायाङ्कारकपदङ्कर्मत्वादिशक्तिपरम्· तन्मूलकसम्बन्धश्च
विशेषणविशेष्यभावएव· इयञ्चषष्ठीविशेषणत्वेनविवक्षितादेवा। नचसम्बन्धेषष्ठीसम्बन्धश्चद्विष्ठइतिसाविशेषणत्वेनविवक्षितादे
वभवतिनविशेष्यत्वेनविवक्षितादित्यत्रकिंविनिगमकमितिवाच्यम्· विशेषणवाचकस्यराज्ञइत्यादेः परस्यकेवलस्यप्रयोगेपिवि
शेषणत्वंस्वसामान्यनिरूपितम्प्रतीयतेतच्चविशेषणत्वंसम्बन्धसाकाङ्क्षमितिविशेषणादेवसा· तदुक्तम्भाष्ये· षष्ठीशेषइतिचेद्वि
शेष्यस्यप्रतिषेधः। षष्ठीशेषइतिचेद्विशेष्यस्यप्रतिषेधोवक्तव्यइति· तत्रप्रथमाविधिः। तत्रषष्ठीम्प्रतिषिध्यप्रथमाविधेया· राज्ञः पुरु
षइति। उक्तम्पूर्वेण। किमुक्तन्त्ववावाक्यार्थत्वादिति। पदत्राधिक्यंवाक्यार्थः सः। अत्रकैयटः। राज्ञइत्येतत्पदसन्निधानेपुरुषसम्ब

यद्वाक्रियाकारकभावमूलकसम्बन्धस्यैवविवक्षायान्नतुतद्विवक्षायामित्यर्थः॥ ॥

न्धित्वम्प्रतीयतेनान्यथा। पुरुषइतिप्रतिपादकन्तुस्वार्थमात्रेवर्त्ततेइतिप्रथमासिध्यतीत्यर्थः। ततोग्रेभाष्येशङ्कितम्· कुतोनु
खल्वेतत्पुरुषेपदाधिक्यंवाक्यार्थइतिनपुनराजनिपदाधिक्यंसवाक्यार्थः। स्यात्। पुरुषपदसन्निधानेएवराज्ञः सम्बन्धित्वावगमोना
न्यथेतिततःप्रथमाप्रसङ्गः। वाक्यार्थत्वञ्चपदान्तरसन्निधानेप्रतीयमानत्वन्तच्चोभयत्राविशिष्टमितिपुरुषनिष्ठविशेष्यत्ववद्राजनिष्ठवि
शेषणत्वमपिवाक्यार्थएवभविष्यतीतिपुरुषपदादिवराजन्शब्दादपिप्रथमाप्रसङ्गइतिभावः। ततः समाधानम्भाष्ये। अन्तरेणापिपुरुषश
ब्दप्रयोगंराजन्निसोर्थोगम्यते। अन्तरेणेति। राज्ञइतिकेवलेपिपदेउच्चार्यमाणेसम्बन्धित्वमपिनियतप्रतियोगिलङ्घ्यते तस्माद्राज्ञापरोप
कारित्वेनविवक्षितोनस्वनिष्ठत्वेन॥

मे· अत्रसम्बन्धित्वंविशेषणत्वरूपम्· अनियतप्रतियोगीत्यस्यानियतविशेष्यनिरूपितमित्यर्थः। अतएवोक्तंराजापरोपकारित्वेनविवक्षि
तइति· नस्वनिष्ठत्वेना। नस्वार्थनिष्ठविशेषणतयेति· हरिणाप्युक्तम्· द्विष्ठोप्यसौपरार्थत्वाद्गुणेषुव्यतिरिच्यते। तत्राभिधीयमानश्चप्राधान्येप्युप
युज्यतइति· असौसम्बन्धः। परार्थत्वात्। परंविशेषणत्वमर्थः प्रयोजनंयस्यतत्त्वाद्विशेषणतानियामकत्वादित्यर्थः। भेदेसतिविशेषणतयाविव
क्षितस्यसम्बन्धंविनाविशेषणत्वासम्भवेनतदाकाङ्क्षितत्वात्तत्रसम्बन्धोव्यतिरिच्यतेउद्भूततयाप्रतीयतइतितत्रैवषष्ठीत्यर्थः। विशेष्यस्यस्वनि
ष्ठत्वादेवनविशेष्यतानियामकसम्बन्धाकाङ्क्षेतिभावः प्रधानेप्युपयुज्यते। तस्यद्विष्ठत्वस्वभावत्वाद्राजादिनिरूपितविशेष्यतायाराजादिपद
कर्त्तुरपितथाविवक्षाक्तस्यचवर्त्तमानइतिसूत्रेछात्रस्यहसितमित्यादौभाष्यस्पष्टा· संयोगसम्बन्धावच्छिन्नाधारस्यनतथा
विवक्षा। अतएवघटवद्भूतलमितिप्रयोगसाधकमतुप्सूत्रेऽस्मिन्नितिचरितार्थमितितत्रैवभाष्येस्पष्टम्· लोहितोष्णीषाइत्यादाव
पिसप्तम्यर्थेवहुव्रीहिर्वोध्यः। एधोदकस्येति· एधःकर्तृकर्त्तावा· दकस्योदकस्येत्यर्थः।। ११ सन्निधानेप्रतीयमानायाउपकारकोभ
भवतीत्यर्थः। ननुकर्मादीनामपीतिग्रन्थेनयथातेषांसम्बन्धत्वेनविवक्षाप्रतिपादितातथाकर्तुर्नप्रदर्शितेतिकर्तुस्तथाविवक्षानभ
वतीतिकश्चिद्भ्रम्येदतः कर्त्तुरपिविवक्षामाह· कर्त्तुरपीति· कर्मादीनामित्यनेनसंयोगसम्बन्धावच्छिन्ना धारस्यापितथावि
वक्षेतिभ्रमनिवारणायाह· संयोगसम्बन्धेति· तेनभूतलस्यघटइतिनप्रयोगः। तत्रभाष्यमपिसाधकमाह· अतएवेति· ननुतर्हिलोहितोष्
णीषसादौषष्ठ्यर्थेवहुव्रीहिर्नस्यादतआह· लोहितइति· यदुक्तमेधःकर्तृकर्त्तावातदुपपत्तयेआह· एधशब्दइति· उदकस्येत्यर्थइति·।
भुवनममृतेज्जीवनीयन्दकञ्चेतिहेलायुधकोशात्रमानम्·

पा· प्रौ भै· यदुक्तम्मूले हेतौ घोस इति तत्फलमाह· हेतुहेतुमद्भावेनेति· हेतुपदार्थस्य स्वनिष्ठहेतुत्वनिरूपितहेतुमत्त्वसम्बन्धेनेतरान्वय इत्यर्थः। हेतुवाचका
टी· भै दिति· हेतुवाचकत्वञ्च विशेषणविशेष्ययोरुभयोरपि वाचकयोरिति हेतुशब्दादन्यशब्दाच्च षष्ठीत्यर्थः। षष्ठी हेतोरिति वक्तव्ये प्रयोगग्रहणं स्व
४३६ त्र हेतुबोधनाय हेतुशब्दस्य प्रयोगस्तत्र हेतुवाचकसामान्यात्तस्मिन्वाक्ये षष्ठी यथा स्यादिति। अत एवाल्पस्य शोभनस्य हेतोर्वसतीति भवतीति

एधशब्दोऽदन्तः पुल्लिङ्गः कारक इति सूत्रे भाष्ये प्रयुक्तः। एधाः पचन्तीति। सान्तः क्लीबोऽपि। हेतौ घोस इति· हेताविति वर्त्तते। हे
तुहेतुमद्भावेनेतरान्वये इत्यर्थः। तेनान्नहेतुमच्छ्रयेसादौ न· षष्ठीति· हेतुवाचकादित्यर्थः। निमित्तेत्यादि· निमित्तादिप्रयोगे तेभ्य
स्तत्समानाधिकरणशब्देभ्यश्चेत्यर्थः। किन्निमित्तमिति प्रथमान्तन्द्वितीयान्तम्वा। प्रायग्रहणादिति· एवञ्च षष्ठी हेतुप्रयो
गे सर्वनाम्नस्तृतीया चेति सूत्रे व्यर्थे इति बोध्यम्· षष्ठ्यतसर्थ दिक्छब्दत्वात्पञ्चम्याम्प्राप्तायामिदम्। ततः पश्चादित्यत्र तु
सार्वविभक्तिकः षष्ठ्यन्तात्तसिः। षष्ठ्यपीति· स्पष्टञ्चेदम्वृत्तौ· भाष्ये तु न दृश्यते। विपरीतं षष्ठ्यतसर्थेति सूत्रात्पूर्वमनपेक्ष्यस्य पा
ठ इति पृथग्विनेति सूत्रे उक्तम्। दूरान्तिकार्थैः। यदपेक्षन्दूरत्वादिकन्ततः षष्ठीत्यर्थः॥ ९९ दिक्· सर्वनाम्नस्तृतीया च· अत्र सर्वना

म्न इति प्रयोगापेक्षया षष्ठी। पञ्चम्यान्तु हेतुशब्दात्पञ्चमी तृतीये न स्याताम्· निमित्तादिप्रयोगेभ्य इति· अत्राप्यर्थे प्रयोगशब्दोपादानमेव
मानम्· सूत्रे व्यर्थ इति· अनेनैव सूत्रद्वयसाध्यप्रयोगस्य सिद्धेः। मूलादिदूषणायाह· भाष्य इति· नन्वप्रतिषिद्धमनुमतम्भवतीति न्यायेनोक्तम्भा
ष्यकारसम्मतमेवेत्यत आह· विपरीतमिति· स्त्र्यधिकारात्परेणेत्यादौ यथायथं शास्त्रेणेत्यादिविशेष्यानुरोधात्तृतीया। प्रत्यासत्तिन्यायेनाह· प

मे· तन्मूलक इति· कर्तृत्वनिरूपकक्रियात्वमथवाक्रियानिरूपितकर्तृत्वम्मूलं यस्य तस्मिन्विवक्षित इत्यर्थः। स्वस्वामिभावादिरित्यस्य स्वस्वामिनोर्भा
वः स्वत्वं स्वामित्वं वा सम्बन्धः षष्ठ्यर्थ इति प्रतीयते परन्तु तस्य तद्रूपेण षष्ठीवाच्यता नयुक्ता। राज्ञः पुरुष इत्यत्र षष्ठ्यर्थः स्वामित्वञ्चेत्तस्याभिधेय
तासम्बन्धेन राजसम्बन्धित्वेपि पुरुषावृत्तित्वात् स्वनिरूपितस्वत्वाश्रयत्वसम्बन्धेन स्वामित्वम्पुरुषेप्यस्तीति तु न। तस्य वृत्त्यनियामकतया पुरु
षवृत्तितानियामकत्वस्य वक्तुमशक्यत्वात्। यदि तु स्वत्वं सम्बन्धस्तदा तस्य राजवृत्तित्वाभावेन सम्बन्धत्वं वक्तुमशक्यम्· स्वनिरूपितस्वामि

कारकविभक्तीनाङ्क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेण बोधकत्वन्तत्रापि तन्मूलके सम्बन्धे विवक्षि
तेषष्ठी तदाह· कारकेति· स्वस्वामिभावादिरिति· स्वत्वस्वामित्वसमूहः सम्बन्ध इत्यन्यत्र विस्तरः। एवं सर्वत्र बोध्यम्· ष
ष्ठ्यर्थस्य संसर्गविधयैव भानम्· कारकविभक्तिभ्योपि क्रियाकारकभावस्य संसर्गविधया भानमित्युक्तम्· सम्बन्ध
मात्रविवक्षयामिति· सम्बन्धत्वेन भाने इत्यर्थः॥ ११

त्वसम्बन्धेन राजवृत्तित्वन्तु वक्तुमशक्यम्। तस्य वृत्त्यनियामकत्वा
दत आह· स्वत्वस्वामित्वसमूह इति· अन्यत्र· मञ्जूषादौ· न वसम्बन्धो हि सम्बन्धिभ्याम्भिन्न उभयसम्बन्धीत्युक्तम्। एवं सर्वत्र· अ
वयवावयविभावजन्यजनकभावादौ। सं र्ग विधयैवेति· अत्रैवकारेण षष्ठ्यर्थस्य प्रकारत्वम्व्यवच्छिद्यते। अत एव प्रकृतसूत्रे भाष्ये
राज्ञः पुरुष इत्यत्र राजा विशेषणम्पुरुषो विशेष्य इत्युक्तम्। अन्यथा सम्बन्धं विशेष्यतया विशेषणतया ब्रूयात्। एतदेकवाक्यतया क्रि
याकारकभावसम्बन्धस्य वाचिका द्वितीये तिभाष्योक्त्याह· कारकविभक्तिभ्य इति· प्राचीनमतेनाह· सम्बन्धत्वेन भान इति· सम्बन्धः का
रकेभ्योन्यः क्रियाकारकपूर्वकः॥

भै॰ नग्रहणमिति॰ किन्तु जसु हिंसायामिति चौरादिकस्येति शेषः। ननु हेतुमति चाजासीतिनिर्देशोपपत्तिर्भविष्यतीत्यत आह॰ हिंसामि
त्युक्तेरिति॰ अनुकरणत्वात्सत्वाप्राप्तेराह॰ सौत्रत्वादिति॰ मूलादिकं दूषयति॰ परे त्विति॰ अयमाक्रथधातुः। नन्वयं चुरादौ न दृश्यत इत्यत आह॰
रोगकर्तृकमिति च। रोगोत्र ह्स्यादिः। भावकर्तृकाणाङ्कि॰म्। श्लेष्मणश्चौररुजा श्लेष्मात्र न भावः। सर्पिषो नाथनमिति॥
सर्पिर्मे भूयादित्याशासनमित्यर्थः। जासिनि॰ जसुमोक्षणे इति दैवादिकस्य न ग्रहणं ज्जासीति निर्देशाद्धिंसायामित्युक्तेश्च॰
निप्रोपसृष्टो हनो निप्रहणः शब्दपरत्वेपि सौत्रत्वाद्धन्तेरिति णत्वम्॰ चुरादिरिति॰ घटादेस्तु न ग्रहणं दीर्घनिर्देशात्॰ क्रा
थनमिति॰ घटादेः क्रथेः क्राथेति निपातनाद्वृद्धिरिति वृत्तिः। परे तु एतत्सूत्रप्रामाण्याल्लटसाहचर्याच्चायमपि चुरादिर्वा
ध्यस्तस्याकृतिगणत्वात्॰ निपातनस्य शेषषष्ठीसन्नियोगशिष्टत्वेन कर्मत्वेन विवक्षायां चौरस्य क्राथनमित्यस्यानाप
त्तिः। सामान्येन निपातने चित्समुत्विषये क्रथकं क्रथमित्यादेः क्रथयतीत्यादेश्चानापत्तिरित्याहुः। समर्थयोरिति॰ समप
र्यायसंशब्देन समासः शकन्ध्वादित्वात्पररूपम्वा॰ व्यवहरणपणनमिति॰ आपप्रत्ययो वैकल्पिकत्वान्न कृतः। उदाहरणे
स्तु तावेवेनियमादपि न॰ दिवस्तत्कर्मणि षष्ठी स्यादिति॰ शेष इति त्वत्र न सम्बध्यते। व्याख्यानात्॰ ॥ ॥ ॥
नस्येति॰ निपातनस्येति॰ अस्यान्यथेत्यादिः। सामान्येन। शेषषष्ठीसन्नियोगशिष्टत्वानङ्गीकारे लाभकारान्तरमप्याह इति सूत्रभाष्ये कि
मुदाहरणमतिरीव्यन्ति। पूर्वेणाप्येतत्सिद्धम्॰ इदन्तर्हि ग्रामस्य तरहः सभायान्दीव्येयुरित्युदाहरणेन क्तरत्नेन योगेनस्य प्रवृत्त्यस्वीकारादिति॰

मे· अतएव·दिवस्तदर्थस्येति सूत्रे शेषपदसम्बन्धादेव नित्यषष्ठीप्राप्ताविति· दिवस्तदर्थस्येत्यनेन नित्यषष्ठीप्राप्तावित्यर्थः। तिङ्न्तमिति· यदि शेष
पदासम्बन्धेनेदं सूत्रमपि समासनिवृत्तिफलकम्भवेत्तदा यत्र समासस्य प्राप्तिसम्भावना तत्र दृश्यतेऽस्त्रं एवोदाहृतं स्यादिति भावः। पूर्वोक्तमेवार्थं
शङ्कासमाधानाभ्यां द्रढयति· यद्यपीत्यादिना· अतएव· अत्रापि शेषपदासम्बन्धादेवाकृत्वोऽर्थ इति सूत्रे शेष इति मण्डूकानुवृत्त्या सम्बध्यते इत्यत्रवी

अतएव द्वितीया ब्राह्मण इति सूत्रं ङ्गामस्य तदहः सभायां दीव्येयुरित्यत्र नित्यषष्ठीप्राप्तौ द्वितीयार्थमिति भाष्ये उक्तम् तद्धून
यन्तिङन्तमुदाहरति· शतस्य दीव्यतीति· यद्यपि पूर्वसूत्रे दिवस्पठित्वा तदर्थस्येति नित्यं कर्तुं शक्यते तथापि योगविभाग उत्तरार्थः
शेष इत्यस्यासम्बन्धार्थश्च विभाषोप· अत्रापि शेष इति न सम्बध्यते· तदर्थस्येति च वर्त्तते तदाह· पूर्वयोगेति· अतएव पञ्चा
द्विभाषेति न वेति सूत्रे भाष्ये स्पष्टम्· कृत्वोऽर्थ शेषे किमिति· दिवस्तदर्थस्येत्यादिना विच्छेदाद्धिकरणकारक एव षष्ठी
विधानं युक्तमिति प्रश्नः· द्विरहनीति· वृत्त्यादिप्रामाण्यान्मण्डूकप्लुत्यानुवृत्तिः स्वीकार्येत्युत्तरम्· अधीगर्थेति सूत्रे कर्मादीनाम
विवक्षा शेष इति भाष्ये बहुवचनेनात्रापि शेषपदसम्बन्धबोधनाच्च· वस्तुतस्तु कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणा
मकर्मकबहुवचनमिति वार्त्तिकप्रत्याख्यानाय शेष इति वर्त्तते इति भाष्यकृतोक्तेः परेण शेषश्च कर इति एष्टे शेषषष्ठीति सूत्रो
क्तकर्मादीनामविवक्षा शेष इति सिद्धान्तिनास्मारितम्· ॥ ॥ ११ जन्दशीयति· अधीगर्थेति सूत्र इति· बहुवचनेति· अधिक
रणस्य सङ्ग्रहे हि बहुवचनं युक्तम्भवतीति भावः स्वसिद्धान्तमाह· वस्तुतस्त्विति· सूत्रोपात्तेति· यद्यप्येवमानुपूर्वी भाष्ये वार्त्तिकस्य नास्ति तथा
पि केयट व्याख्यानवशात्फलतीति प्रकृत एवमुक्तम्॰ ॥ रामदशरथः ॥ ॥ ॥ ॥ ॥ ॥

भै॰ तथाहि· अधीगर्थेतिसूत्रेकर्मादिष्वकर्मकवद्बहुवचनम्। कर्मादिष्वकर्मकवद्भावोवक्तव्यः किम्प्रयोजनम्। अकर्मकाणाम्भावेलो
भवतीतिभावेलोयंथास्यात्। मातुःस्मर्यतेपितुःस्मर्यते। एतद्वार्तिकेकर्मादिष्वित्यत्रादिशब्दःकर्मव्यतिरिक्तस्याभावादनुपपन्नइत्या
शङ्कानिवारणायाह· कैयटः। आदिशब्दोऽत्राश्रयवाचीति· यथा। विष्णुरादिःपृथासूनोर्भीष्मादिश्चसुयोधनः। तेजयन्तिरणेशत्रून्येषांवि
ष्णुःसमाश्रयइति· तेनह· उदाहरणइति· व्याख्यानादिति· उत्तरसूत्रद्वयस्यपाणिनिपठितानुपूर्वीकस्योपादानसामर्थ्यमूलकव्याख्या
नादित्यर्थः। अयम्भावः। यद्यत्रशेषइत्यस्यसम्बन्धस्तदाविभाषोपसर्गइत्यत्रशेषपदसम्बन्धोऽस्तिनवा। आद्येदिवइतिसूत्रेणसमासाभाव
स्यसिद्धौविभाषोपसर्गइतिसूत्रवैयर्थ्यम्· नचयदानानेनषष्ठीतदाषष्ठीशेषइतिसूत्रेणषष्ठीतदासमासप्रवृत्तिरेवफलमस्त्विनिवाच्य
म्· नोपसर्गइतिन्यासेनदिवसूत्रस्यनिषेधेशेषषष्ठ्यांसमासविकल्पेनरूपद्वयसिद्धौविभाषाग्रहणस्यतथापिवैयर्थ्यानुद्धारात्। द्विती
येविभाषेतिसूत्रस्यकर्मण्येवविकल्पेनषष्ठीविधायकतयाछन्दस्यापाद्यमानरूपाभावाद्ब्राह्मणेविभाषेतिसूत्रविहितषष्ठीभावेकर्मणि
द्वितीयेतिसूत्रेणद्वितीयायाःसिद्धौब्राह्मणइतिसूत्रवैयर्थ्यंदुर्वारमेव· नचतन्निरुपसर्गेद्वितीयामर्थमस्त्वितिवाच्यम्· कर्मत्वविवक्षा
यान्दिवसूत्रस्याप्राप्तेस्तत्रकर्मणिद्वितीयेतिसूत्रेणद्वितीयायाःसिद्धौतस्यसूत्रस्यवैयर्थ्यानुद्धारात्। द्वितीयाब्राह्मणेइतिसूत्रेशेष॰
पदसम्बन्धेनशेषत्वविवक्षायान्द्वितीयार्थन्तदितिनुवक्तुमशक्यम्· विभाषोपसर्गइतिसूत्रेणविच्छिन्नस्यशेषपदस्यपुनस्तत्रस
म्बन्धासम्भवात्· नचकृदन्तेनयोगेद्वितीयाब्राह्मणइतिसूत्रेविभाषापदसम्बन्धेनपक्षेदिवइतिसूत्रसिद्धषष्ठ्याःपुनर्विधानेन

मे· तस्या एवेति· पञ्चम्या एवेत्यर्थः शिष्टकृतव्याख्यानमत्र शरणम्· व्याख्यानादिति· जानातेरिति· मातुर्गुणस्मरणमिति गुणेन स्मरणमित्य
र्थः। इह गुणस्य शेषत्वविवक्षायामपि अनेन सूत्रेण षष्ठ्यभावे षष्ठी शेष इति सूत्रेण षष्ठ्यां समासो भवत्येव एतत्सूत्रविषयेऽपि तेन सूत्रेण ष
ष्ठ्यां सिद्धायामेतत्सूत्रं नियमार्थमिति हि प्रसिद्धो मार्गः। अत एव· नियमार्थत्वस्य स्पष्टत्वादेव। एतेषां नियमार्थत्वे वार्तिकमपि साधकमित्याशये
नाह· प्रतिविधानेति· तद्वार्तिकमपि नापूर्वं किं तु नियमसिद्धमेवेति भावः। रुजार्थानामिति सूत्रे उपात्तत्वात् रुजाशब्दो यद्यपि व्याधौ रूढस्तथाऽ
पञ्चमी चेति· तस्या एव समुच्चयो न तु द्वितीयातृतीययोरपीति भावः। ज्ञोऽवि· अत्र सूत्रेऽविदर्थस्येति छेदो व्याख्यानात्· सर्पिषो
ज्ञानमिति· जानातेः प्रवृत्तिरर्थः। सर्पिःसम्बन्धिनी प्रवृत्तिरित्यर्थः। अधीगर्थ· अधीगर्थः स्मृतिः। कर्मणीति किम्· मातुर्गुणस्मरण
म्· करणे शेषे नेन षष्ठ्यभावे समासो भवत्येव। अत एवात्र सूत्रे भाष्ये शेष इति वर्त्तत इत्युक्तम्· प्रतिपदविधाना षष्ठी न समस्यत
इत्येतैः षष्ठीसमासनिषेधात्। एधोदकस्येति· एध इति पृथक्पदम् दकशब्द उदकवाची। रुजार्थानाम्· रोगार्थानां धातूनामित्यर्थो
व्याख्यानात्· धातोर्भाववचनत्वाव्यभिचारेण सामर्थ्याद्वचन इति कर्त्तरि ल्युट्। भावशब्देन सिद्धरूपोऽर्थ उच्यते ल्युट्प्रकृत्यर्थोऽ
विवक्षितस्तदाह· भावकर्तृकाणामिति॰॥ ॥ ११ पिप्रकृतेरोगमात्रं विवक्षितमित्याशयेनाह· रोगार्थानां धातूनामिति· अत्ररो
गशब्दे प्रकृत्यर्थमात्रं विवक्षितम्· व्याख्यानादिति· भावकर्तृकाणामित्यस्य नदीकूलानि रुजतीति प्रत्युदाहरणं भाष्ये उक्तं न न्मूलकादि
त्यर्थः। ल्युट्प्रकृत्यर्थोऽविवक्षित इति। भावकर्तृकादिति भाष्यीयव्याख्यानात् भाष्ये भावकर्तृकादिति ल्यब्लोपे पञ्चमी। भावकर्तृकमाश्रि

प्रा·शे भै· नैतावतेति· षष्ठी शेषइतिसूत्रवदत्रापिसूत्रेआदिशब्दउपात्तइतिभावः। प्राचीनव्याख्यायान्दोषमप्याह· किञ्चेति· एतद्भाष्यबलादिति· अव्यवहितोक्त
टी·भै भाष्यबलादित्यर्थः। अन्यथेति· दिवइतिसूत्रेशेषपदासम्बन्धइत्यर्थः। वार्तिकरीत्येति· तत्रहियतःकर्मादिष्वकर्मकवद्वचनमित्युपात्तम् अत्रकैयटेनप्रेष्य
५३६ ब्रुपर्यन्ताइत्येवोक्तन्नतुकृत्वोर्थप्रयोगइत्येतत्पर्यन्तमिति तेनकृत्वोर्थइतिसूत्रेशेषपदासम्बन्धोलभ्यते। दिवइतिसूत्रेशेषइत्यस्यसम्बन्धइदमेवभा
ष्यम्मानम्· दिवइतिसूत्रस्यापितन्मध्यपातात्· अत्रप्रेष्यब्रुपर्यन्तइत्युपादानेनकैयटपर्यन्तंवासइत्यत्रेवाग्रेशेषपदासम्बन्ध इतिस्पष्टमेवलभ्यते। एत

नैतावताकृत्वोर्थइत्यत्रसम्बन्धोलभ्यते· किन्त्वेतद्भाष्यबलाद्दिवइतिसूत्रेविशेषपदसम्ब।न्धआवश्यकः। अन्यथावार्तिकरीत्याशतस्य
दीव्यतइतिभावेइष्टस्यप्रयोगस्यासिद्धिः। अतएववार्तिकव्याख्यायामधीगर्थादयःप्रेष्यब्रुपर्यन्ताःकर्माश्रयपदेनोच्यन्तइतिकै
यटः। एवञ्चशेषइत्यनुवृत्त्यावार्तिकप्रत्याख्यानवदेतत्सूत्रद्वयप्रत्याख्यानेएवभाष्यतात्पर्यम्· द्वितीयाब्राह्मणइतिसूत्रस्थप्रत्याख्यानं
वार्तिकरीत्या· किञ्चयदाकर्मविवक्षितम्भवतितदाषष्ठीनभवति स्मराम्यहम्मातरमितिभाष्यउक्तम्· त्वद्रीत्यापदाकर्मादिविवक्षि
तम्भवतीतिवदेत्· एवञ्चज्ञोविदर्थस्येत्यत्रापितदसम्बन्धएव एवञ्चतद्योगेनकदापितृतीया॥ ९. सूत्रद्वयेति·विभाषोपसर्गेद्वितीयाब्रा
ह्मणेइतिसूत्रद्वयेइत्यर्थः। नन्वेवंद्वितीयाब्राह्मणइतिसूत्रभाष्यगामस्यतदहस्सभायान्दीव्येयुरित्यत्रशेषपदासम्बन्धेनदिवइतिसूत्रेणप्राप्तषष्ठी
बाधनार्थमेतत्सूत्रमित्युक्तन्तस्यकागतिरित्यतआह· द्वितीयाब्राह्मणइतीति। वार्तिकरीत्येति· वार्तिककारेणहिशेषपदानुवृत्तिर्नोक्ता किन्त्वक
र्मकवद्भावएवोक्त इतिभावः। सिंहावलोकनन्यायेनाह· किञ्चेति· एवञ्च· पूर्वोक्तव्यवस्थासिद्धौचातदसम्बन्धः। ज्ञोविदर्थस्येतिसूत्रेशेषप
दासम्बन्धः। तथासतियत्फलितन्तदाह· एवञ्चेति· तद्योगे· अज्ञानार्थकज्ञानातियोगे॥

मे· शतन्दीव्यतीत्यादिचेति· दिवस्तदर्थस्येतिसूत्रेपूर्वोक्तरीत्याशेषपदासम्बन्धेसतिपदासम्बन्धित्वेनविवक्षातदाषष्ठीपदात्तुकर्मत्वशक्तिमत्त्वेनवि
वक्षानराद्वि   तीयेतिरूपद्वयसिद्धिरितिभावः। ननुज्ञोविदर्थेतिसूत्रेशेषपदासम्बन्धः धीगर्थेतिसूत्रेकथंशेषपदसम्बन्धोभाष्यउक्तइत्यतआह· अ
धीगर्थेत्यादाविति· कर्तृकर्मणोः अत्रसूत्रेशेषपदासम्बन्धेसाधकमाह· सूत्रवैयर्थ्यापत्तेरिति· षष्ठीशेषइतिसूत्रेणैवतस्याः सिद्धेः। तद्विदंसूत्रमपिज्ञो
विदर्थस्येतिसूत्रवत्समासनिवृत्तिफलकम्मविष्यतीत्यतआह· कृद्योगाषष्ठीति· कर्तृसाहचर्यादिति· कर्तृपदार्थोयथानाभेदेनक्रियान्वयीतथाभेदेने

शतन्दीव्यतीत्यादिचसिध्यति। अधीगर्थेत्यादौचमण्डूकानुवृत्तेरितिसुधियोविभावयन्तु· कर्तृकर्मणोः। अत्रशेषइतिनसम्बध्यतेसू
त्रवैयर्थ्यापत्तेः कृद्योगाषष्ठीसमस्यतइतिवार्तिकेनतत्रसमासस्येष्टत्वात्· कृतिरिति· भावेक्तिन्। कृत्स्नः कर्ता। जगतइति· कर्मेदम्
कर्तृसाहचर्यात्कर्मापिधात्वर्थभेदेनान्वय्येवगृह्यते। तेनलोकम्याकरस्यादौनक्रियाविशेषणान्नषष्ठी· किन्त्वक्रियाविशेषणे
नलोकम्याचकइत्यादौनसमानाधिकरणसमासोनापिसुप्सुपेत्यादिः। सुबन्तार्थस्यविशेष्येणानन्वयेनासमर्थ्यात्·॥ ॥

तरसम्बन्धावच्छिन्नविशेषणविशेष्यभावेनक्रियान्वयियत्कर्मतद्बोधकमेवकर्मपदमितिभावः। लोकम्याकरइति· फलस्यव्यपदेशिवद्भावेनफ
लाश्रयतयाकर्मत्वेमनत्राभेदेनान्वितोयः लोकपदार्थः सोपिकर्मैवेतिभावः। अत्रविशेषमाह· किन्त्वेति· असामर्थ्यादिति· सुबन्तार्थविशेष्यान्वयेसं
माससञ्ज्ञाविधायकतयाऽनयोश्चारितार्थ्यादितिभावः। ननुलोकम्याकरइत्यत्रैवसमासाभावेप्रदर्शनीयेलोकम्याचकइतिप्रयोगान्तराभिधान
ङ्किमर्थमितिचेन्न· ओदनस्यपाचकइत्यत्रतृजकाभ्यामितिसूत्रोदाहरणविषयेयथाषष्ठीक्रियाविशेषणवाचकाद्भवतितथालोकम्याचक
इत्यत्रापिस्यादितिशङ्कावारणायप्रयोगान्तराभिधानस्यकृतत्वात्॥

मे॰ षष्ठीतुल्लोकम्याक इत्यत्रेवल्लोकम्याचक इत्यत्रापिधात्वर्थेऽभेदेनान्वयान्नभवतीतिपूर्ववद्यद्यपिसम्भवतितथापिवार्तिकविरोधादपिभवतीत्या
ह·अतएववक्ष्यतिएतदेवभाष्य मित्यादि·ननुकष्टंश्रितःकष्टश्रित इत्यत्रापिसुवन्तार्थविशेष्येणश्रयणकर्मीकष्टमित्यस्यानन्वयात्कथंसमास इत्याश
ङ्कायामाह·द्वितीयाश्रितेत्यादेस्त्विति·सामर्थ्यात्·सूत्रारम्भसामर्थ्यात्·उक्तरीत्या·यथाप्राप्तोदकेत्यत्रवृत्तिविग्रहवाक्ययोःसमानार्थत्वोपपत्तयेप्रा
प्तिकर्त्रुदककर्मेतिबोधःस्वीक्रियतेतथाश्रयणकर्त्तृरिकष्टकर्मणेद्वितीयान्तार्थस्यान्वयेनकष्टकर्मकाभिन्नश्रयणकर्तेत्यर्थकल्पनेसुवन्तार्थ
विशेष्येणाप्यन्वयोवक्तुंशक्यइतिभावः।उक्तार्थेभाष्यसम्मतिमप्याह·अतएवेति·तेनान्वयाभावेनसमासाभावादेव·भाष्यइति·पूजनात्पूजित

द्वितीयाश्रितेत्यादेस्तुसामर्थ्याद्व्ययवद्दारकेसामर्थ्येप्रवृत्तिः।द्वितीयाप्रकरणोक्तपरेतुमतरीत्यावासामर्थ्यम्·अतएवपूज
नात्पूजितमितिसूत्रेदारुणंयथाभवतितथाध्यापक इत्यर्थकस्यदारुणाध्यापक इत्यस्यसिद्ध्यर्थम्मलोपवचनमारब्धम्भाष्ये·
अन्यथासमासेनसिद्धेतद्व्यर्थंस्यात्।एतदेवभाष्यन्ततःषष्ठ्यभावेपिमानन्त·॥ ॥ ४ ४ ४ ४ ॥

मित्येतावदेवसूत्रमित्याशयेनवार्तिककारेणोक्तम्पूजितस्यानुदात्तत्वेकाष्ठादिग्रहणम्·पूजितस्यानुदात्तत्वेकाष्ठादिग्रहणङ्कर्त्तव्यम्·
काष्ठादिभ्यःपूजनादितिवक्तव्यम्।इहमाभूत्।शोभनोध्यापकः।मलोपवचनञ्च।दारुणाभिरूपकः।तत्रकैयटः।क्रियाविशेषणत्वा
दृशब्दोद्वितीयान्तंयथाग्रामङ्ग·तद्स्मादौगुणभूतायाअपिक्रियायाःसाधनयोगस्तथाविशेषणेनापितत्रवैयधिकरण्यात्समासाभाव

मे· समासाभावार्थन्नदस्त्विति वाच्यम्· द्वितीया ब्राह्मणे कर्माश्रयाः द्वितीयाविधितिभिन्नभावेनोपात्तः सकर्मका अधीगर्थादयः प्रेष्यद्ब्रुवर्थ
न्तः कर्मादिशब्देनोच्यन्ते। द्वितीयाविधिनि भिन्नभावेनेति· अत्र द्वितीयाशब्दो लक्षणया द्वितीयापवादषष्ठीपरः। तेन षष्ठीनिमित्तभावेनेति फ
लितम्· द्विधातुविषये विभाषोपसर्गे द्वितीया ब्राह्मणे इति सूत्रद्वयारम्भाच्छेषपदासम्बन्ध इत्यतो वार्तिकारम्भः। तत्र हि वक्तव्यत्वं वक्तव्यम्·
अविवक्षिते कर्मणि षष्ठी भवतीति किम्वक्तव्यमेतत्। न हि कथमनुच्यमानं लभ्यते। शेष इति वर्त्तते। शेषश्च कः। कर्मादीनामविवक्षा विशेषः। य
दा च कर्म विवक्षितम्भवति तदा षष्ठी न भवति। स्मरत्यहम्मातरम्। स्मराम्यहम्पितरमिति भाष्ये उक्तम्· अत्राविवक्षितकर्मणीत्यनेनाकर्मक
त्वाद्भावे लादयः सिद्धा भवन्तीति दर्शितम्। ततोऽविवक्षितकर्मकत्वेनाकर्मकत्वप्रदर्शनाय शेषपदानुवृत्तिः प्रदर्शिता। शेष इति वर्तते
इति· नन्वेवं षष्ठी शेषे इति सूत्रेणैव षष्ठ्यां सिद्धायामेतत्प्रकरणम्व्यर्थमत आह· कैयटः प्रकरणन्त्विदं समासप्रतिषेधार्थमिति· अत्र
प्रकरणे पदोपादानेन मण्डूकानुवृत्तेरयुक्तत्वात्सर्वत्र शेषपदसम्बन्ध इति दर्शितम्। स्मारितम्। यथा षष्ठी शेषे इति सूत्रे कर्मादीनां क्रिया
कारकभावेन सम्बन्धमविवक्षितङ्कृत्वा सम्बन्धित्वमात्रविवक्षया षष्ठी भवतीत्युक्तं तथेहापि कर्मादीनामविवक्षया भावे लादयो भविष्य
न्तीति दर्शितमित्यर्थः। कर्माश्रयषष्ठीविषय इत्यनेनाधीगर्थेत्यादिद्विसूत्र्येति सूत्रसमुदायो गृह्यते·॥ ॥ १७ ॥

मे॰ अतएव॰ धातुतएवकारकान्वयितावच्छेदकत्वेनोपस्थितिसत्वादेव॰ एतेन॰ उक्तप्रकारेणानन्वयाख्यदोषनिरसनार्थं अधिकमितिसू
त्रेणाधिकशब्दस्यव्युत्पादनादस्मन्मतेऽधिकारवारीद्रेणेनेतिप्रयोगोपपत्तिर्भवति।यदि धातुतएवतेनरूपेणोपस्थितिरितिनियमोभव
न्मतेतदाकथनादृशप्रयोगइत्यतआह॰ अधिकेति॰ ननुकृतीयेकर्तृकर्मणोरितिषष्ठीत्येवम्व्यवस्थार्थङ्कृद्ग्रहणमस्त्वित्यतआह॰ धातो
श्चद्वयइति॰ तदुक्तम्भाष्ये॰ नत्वकर्मकर्त्रर्थेनार्हिकृद्ग्रहणङ्कर्तव्यम्॰ कृतीयेकर्तृकर्मणीतत्रयथास्यात्।अन्यस्ययेकर्तृकर्मणीत॰

अतएवहिरुगादियोगेनकर्मादिसञ्ज्ञाः एतेनदेवदत्तेनशान्त्योऽश्वइत्यादौषष्ठीनिवृत्त्यर्थङ्कृद्ग्रहणमित्यपास्तम्॰अ
धिकारवारीद्रेणेनेत्यत्रहेतौतृतीयाक्रियायोगाभावान्कर्तुः कर्तृत्वाभावेजनकत्वरूपहेतुत्वसत्वात् धातोश्चद्व
येप्रत्ययास्तिङः कृतश्चतत्रतिङ्योगेनलोकेतिनिषेधात्कृद्योगएवभविष्यतीतिकिन्तेन॰ नलोकेतिसूत्रेकृदव्ययस्यैवग्रहणं॰
नु अव्ययार्थस्ययेकर्तृकर्मणीइतिव्याख्यानेनसिद्धम्।उभयप्राप्तावित्यत्रवहुव्रीहिसुएकाचोद्वइत्यादाविवान्यपदार्थस्याभाव
त्वेपिव्याख्यानाद्भविष्यति॰ ॥ ❖ ॥ ॥ ९९ त्रमाभूत्।नैतदस्तिप्रयोजनम्।धातोर्हिद्वयेप्रत्ययाविधीयन्तेतिङः कृतश्चतत्रकृत
प्रयोगइष्यतेतिङ्॰ प्रयोगेप्रतिषिध्यतेइति।अत्रद्वयेप्रत्ययाइतिभाष्यप्रयोगादेवद्वयइत्यस्यसाधुत्वम्।ननुकृतीसेतदुत्तरसूत्रेऽनुवर्त्यकृतिअ
व्ययेनेतिवचनव्यर्थत्वाऽकृदव्ययनिरासार्थन्तदस्त्वित्यतआह॰ नलोकेतीति॰ ननूभयप्राप्तावितिसूत्रेऽन्यपदार्थलाभार्थङ्कृतीत्यस्त्वित्यतआह॰ उभ
येति॰ व्याख्यानादिति॰ ओदनस्यपाकोब्राह्मणानाम्प्रादुर्भावइत्यादौभिन्नक्रियाकर्तृकर्मवाचकशब्दप्रयोगेउभयत्रषष्ठीदर्शनमूलकाद्व्याख्या
नादित्यर्थः।अयञ्चप्रयोगोऽत्रैवभाष्येदृश्यते

भे॰ एकदेशिनो न्नङ्कृतीत्यस्य प्रयोजनं खण्डयितुमाह॰ नच भेदिके त्यादि॰। भेदिके तत्र भिदेर्ण्यन्तात्पर्यायोदिषु ण्वुच्। अत्र णिजर्थव्यापारस्य
प्राधान्यात्प्रयोजककर्त्ता प्रधानम्॰ प्रकृत्यर्थस्य तत्प्राधान्यात्प्रयोज्यकर्त्ताऽप्रधानमिति प्रधानाप्रधानयोः सान्निधौ प्रधान एव कार्यमिति न्यायेन।
प्रधानात्तस्यादित्याशयः। कर्त्तृपरमिति॰ एवञ्च वाक्यभेदेन कृति कर्त्तरिपि तस्मादित्यर्थो भवतीति भावः। अत्राप्रधानस्य गतिबुद्धीति सूत्रस्य
नियमार्थत्वान्न कर्मत्वम्। तृतीयावदिति॰ यथा देवदत्तेन यज्ञदत्तेन पाच्यते तण्डुल इत्यत्रानुक्तयोर्भिन्नपदवाच्ययोः कर्त्रोस्तृतीयाविरो
धाभावाद्भवति तथात्र कृतेपि भविष्यतीति भावः। कृतीत्यस्य प्रयोजनमाह॰ तद्धित इत्यादिना॰ तद्धिते मा भूदित्यस्य कृदन्तात्तद्धिते सति मा

नच भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यादौ गुणीभूतेणिच्प्रकृत्यर्थकर्त्तरि षष्ठ्यर्थं कृग्रहणं कृतीति कृदिति कर्त्तृपरन्तदिति
वाच्यम्॰ तृतीयावत्तत्र षष्ठ्या अपि विनैव यत्नं सिद्धेरिति प्रश्नः। तद्धित इति॰ तद्धितान्तप्रकृतिमात्रप्रयोज्योपस्थितिविषयक्रिया
याः कर्त्तरि कर्मणि च मा भूदित्यर्थः ॥ भूदित्यर्थः। प्रतीयते तत्वयुक्त तण्डुलानाम्याचकतर इत्यत्र षष्ठीदर्शनात्तत्राह॰ तद्धिता।

न्तप्रकृतिमात्रेति॰ कृदन्तप्रकृतिग्रहत्वावच्छिन्नकारणतानिरूपितायोपस्थितिर्वृत्तिकार्यतातदवच्छेदिका या विषयता तद्वत्क्रिया
कर्त्तृकर्मणोः षष्ठीति पर्यवसितोर्थः। तादृशी च विषयता प्रत्ययार्थनिष्ठविशेष्यतानिरूपितप्रकारतारूपा बोध्या। एतच्च कृतीत्यपि कर्त्तृ
कर्मणी तत्र यथा स्यात् तद्धितस्य पे कर्त्तृकर्मणी तत्र मा भूदिति कृतपूर्वी कटम्। भुक्तपूर्वी ओदनमितीति भाष्याल्लभ्यते। कृतपूर्वीत्यत्र
यथा तद्धितान्तप्रकृतिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियानिरूपितत्वं कर्मत्वं तदुपपादयति ॥

प्रा॰ प्र॰ मे॰ उदाहरण इति॰ अत्र सकर्मकेत्यभिधानेन प्रसिद्धरीत्याभावे क्तप्रत्ययस्य भवने भाष्योपप्रयोगातिरिक्तहेत्वभावः सूचितः। तस्य भावक्तान्त
टी॰ भै॰ स्य। काप्यप्रयोगेण असोपदर्शितवृत्त्यतिरिक्तवाक्यत्वादिः। कृदन्तप्रातिग्रहप्रयोज्येति॰ कृदन्तमात्रप्रातिग्रहप्रयोज्येत्यर्थः। न चात्र त
५५२ था। न चात्र कृदन्तमात्रप्रातिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितत्वं कर्मत्वम्॰ यथा तण्डुलानाम्पाचक इति वाक्ये घटकस्य पाचक
उदाहरणे सकर्मकप्रकृतिकभावक्तान्तस्य वृत्तिमात्रविषयतया भाष्यसम्मतत्वेन तस्य केवलस्य काप्यप्रयोगेण त
द्धितान्तसमुदायवृत्तेर्वक्रियोपस्थापकत्वात्। कृद्ग्रहणात् कृदन्तप्रातिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्तृकर्मणो
र्ग्रहणं न चात्र तथा। तण्डुलानाम्पाचकतर इत्यादौ पाचकादेः पृथक्प्रयोगेण तच्छक्तिग्रहस्यापि सत्त्वेन कृदन्तप्राति
ग्रहप्रयोज्योपस्थितिविषयत्वं क्रियायाः अस्त्येवेति भवत्येव षष्ठी॰ अत एव तद्धिते माभूदित्येवोक्तं न तद्धिताधिके इति भा
ष्ये पितद्धितस्यैव कर्तृकर्मणी तत्र माभूत् कृतेऽपि कर्तृकर्मणी तत्रैव यथा स्यादित्येवोक्तम्॰ कृतपूर्वीति॰ अत्र कर्मविशेष
स्य तत्तद्रूपेण प्रागन्वयाविवक्षयाऽकर्मकत्वाद्भावे क्ते पूर्वादिनिरिनिति तद्धितस्तदन्तं न तत्र विशेषरूपेण कर्मयोगो भवत्येव
। तत्रोक्तरीत्या षष्ठ्यभावेऽनभिहितत्वाद्द्वितीया॰ एवं रीत्या साधुत्वेऽन्त्यभाष्यमेवमानम्॰ ॥ इत्यस्य वृत्त्यघटकस्य पाककर्त्त
रि प्रातिग्रहे सति तादृशप्रातिग्रहप्रयोज्याया पाककर्त्तुरुपस्थितेस्तत्प्रकारतयाभासमानायाय क्रियातन्निरूपितकर्मत्वस्य तण्डु
लपदार्थे सत्त्वाद्भवति तत्र षष्ठी॰ अत एव यथाकृतात तद्धित इति वाक्यात्मतीयमानस्यार्थस्यानभिप्रेतत्वादेव। नन्वस्य केवलस्य कृद
न्तस्य कथं न प्रयोग इत्यत आह॰ अत्र कर्मविशेषस्येति॰ भावे क्त इति॰ अविवक्षितकर्मणोऽप्यकर्मकपदेन ग्रहणस्येष्टत्वाद्भावे क्त इत्यर्थः

भै· अन्यथा· एतादृशविशेषणवाचकादपिषष्ठीस्वीकारे। उक्तसामर्थ्येपि· अवयवद्वारकसामर्थ्येपि। षष्ठीसमासस्यवैकल्पिकत्वात्तदभा
वेदारुणध्यापकइत्यस्यसिद्ध्यर्थम्मलोपवचनमस्त्वितिशङ्कते· नचेति· स्पष्टप्रतिपत्त्यर्थंवाक्यग्रहणेकर्त्तव्येतदकरणात्समासार्थमेतत्स्या
त्तथाचवचनम्व्यर्थमेवस्यादित्याशयेनसमासप्राप्तिविषयकमेवतद्वचनमित्याशयेनसमाधानमाह· तथासतीति· अतएव· वैयधि
करण्येनसमासप्राप्तिविषयकत्वादेव· ननुवैयधिकरण्येप्यवयवद्वारकसम्बन्धमादायसुप्सुपेतिवामपूर्व्वसकेतिवासमासोस्त्विति

अन्यथाषष्ठीसमासस्यतृजकाभ्याङ्कर्त्तरीत्यादिनिषेधेरुक्तसामर्थ्येपिप्रवृत्त्यातत्समासेनैवसिद्धौमलोपवचनव्यर्थमेवस्या
दितिबोध्यम्· नचभिन्नपदत्वेपितथाप्रयोगसाधुत्वार्थम्मलोपवचनमितिवाच्यम्· तथासतिवाक्येमलोपश्चवक्तव्यइतिवदे
त्· अतएवकैयटेनक्रियाविशेषणान्दारुणादयस्तत्रवैयधिकरण्यात्समासाभावान्नलोपोविधीयतेइत्युक्तम्· सुप्सुपे
त्यादिसमासोनसार्वत्रिकइतितदाशयइत्यलम्· कृतिकिमिति· कर्त्तृकर्मभ्याङ्क्रियासन्निधाप्यतेतद्वाचीचधातुरेव॥
कारकान्वययोग्यतावच्छेदकरूपेणसाध्यत्वेनधातुभिरेवतदुपस्थितेः। शत्योश्च आस्त्रिकइत्यादौनहितान्त
नेनरूपेणोपस्थितिरितिनतत्रकारकान्वय एतद्भाष्यप्रामाण्यात्॥ ॥ ९९ तआह· सुप्सुपेत्यादीति· तदाशयः॥त
द्भाष्याशयः॥परमतखण्डनपूर्वकम्प्रश्नबीजन्दर्शयति· कर्त्तृकर्मभ्यामिति· धातुरेवेति· अत्रैवकारेणप्रातिपदिकव्यवच्छेदः।ननुशत्य
आस्त्रिकइत्यादिशब्दानाङ्कथंखननादिरूपक्रियोपस्थापकत्वमस्त्येवेत्यतआह· शत्योश्चइति· तेनरूपेण· साध्यत्वेन। अतएवदेवदत्ते
नशत्योः श्व॥चैत्रोभूमिमास्त्रिकइतिनप्रयोगः। एतद्भाष्येति· कृतपूर्वीकटम्भुक्तपूर्वीओदनमितिविलक्षणस्थलएवकृतीत्यस्यप्रयोजन

प्र·प्रो· मै· यद्दिपद्येदद्देदुःखस्येत्यत्रानेनसूत्रेणचेद्दुःखपदानभिहितकर्मवाचकत्वेनषष्ठीतदाधाय्यैरामोदमित्यत्रापिकुतोनेतिशङ्कानुत्थानाय।
टी·मै· ह·दद्देदुःखस्येति·गृहीत्वेति·एवञ्चामोदमितिनधायैरित्यस्यकर्मेतिनषष्ठीप्राप्तिरितिभावः।एवञ्चदुःखस्येत्यस्यदेहलीदीपकन्यायेनोभा।
७७२ भ्यामन्वयान्नोभयकर्माकाङ्क्षेतिभावः।ज्वलेणः।कर्त्तरीतिशेषः।अत्रज्वलेर्णइत्यभिधानन्नज्वलइतिणप्रत्ययेनसाधनीयमित्यभिप्रा

दद्देदुःखस्यमादृग्भ्योधाय्यैरामोदमुत्तमम्·लिम्पैरिवतनोर्वातैश्चेतयःस्याज्ज्वलोनकइतिभट्टिपद्यम्·मादृग्भ्योदुःखन्ददद्धि
हृत्तममामोदम्पुष्पादीनाङ्गृहीत्वामादृशान्दत्तस्यदुःखस्यपोषकैर्मादृशांशरीरंलिम्पद्भिरिववातैःकोमादृक्विरहाग्निव्याप्त
श्चेतयन्ज्वलः।ज्वलन्निवनस्यादितितदर्थः।दाधातोःपोषणार्थाद्धाञश्चददातिदधात्योश्शःणोलिम्पश्शःज्वलेर्णइतिज
यमङ्गलाश्लोकव्याख्यायांतज्ज्ञातीयवतत्रेतिदिक्·तत्रधाय्यैरामोदमुत्तममित्यत्रगृहीत्वेत्याहृत्यतद्योगेद्वितीयावोध्या।उ
भयोःप्राप्तिर्यस्मिन्निति· तेनैकनिमित्तत्वलाभाद्दोदनस्यपाकोब्राह्मणानाञ्चप्रादुर्भावइत्यादौविभिन्नक्रियाकर्तृकर्म
णोःषष्ठीप्राप्तौनायन्नियमइतिभावः ॥ येण·किन्त्वस्यकैकस्यिकतयाएतद्भावेपचाद्यजित्यभिप्रायेण।एतदभिधानन्तुतस्याने
नस्मरणार्थमेव·अतएवकइत्यत्रप्रथमा·अत्रनपुंसकेभावेक्तइतिसूत्रविहितस्य।क्तस्याप्यकर्मकेभ्यएवप्रवृत्तीरितीवलादेवेतिनभ्रमि
तव्यम्·किन्तुतयोरेवेतिसूत्रेभावेचाकर्मकेभ्यइत्यनुवर्त्तते तच्चवाक्यभेदेनसम्बध्यते।चशब्दस्त्वर्थे।एवञ्चकृत्यादयस्तयोरेव।भावेत्वअ
कर्मकेभ्यएवेतिद्रष्टव्यम्· तेन·उभयोःप्राप्तिर्यस्मिन्नितिबहुव्रीहिसमासाश्रयणेन।प्रादुर्भावइति·अस्याश्चर्यमेतदितिशेषः ॥

भे· प्रयोग एवेति· प्रयुज्यमानादेव प्राप्तिर्भवतीति भावः। स्पष्टप्रतिपत्तये आह· स्त्रियामिति· भ्रमनिवारणायाह· नियमस्येति· केचिदिति नि
तथा च शेषविभाषेत्यस्याप्येवमुख्योऽर्थ इति ध्वनितम्· करणे ल्युडिति· तेनाचार्यपदार्थस्यानुक्तत्वमस्तीति शेषः। ननूभयप्राप्ताविति नियमात्क
र्थमोदनपदादत्र षष्ठीत्यत आह· उभयेति· लादेशादित्यस्य लस्यादेशादिति भ्रमनिवारणायाह· लकारसम्बन्धिन इति· एवञ्चादेशापादकस्य सम्बा
प्राप्तिपदेन चोभयोः प्रयोग एवायन्निषेध इति ध्वनितम्· स्त्रीप्रत्यययोरिति· स्त्रियाङ्क्तिन्नित्यधिकारविहितयोरित्यर्थः। ना
यन्नियम इति· तेनोभयत्रापि षष्ठी भवत्येवेति भावः। भेदिकेति· धात्वर्थनिर्देशे ण्वुल्· सन्नन्ताङ्गुरप्रत्ययादित्यप्रत्ययः। शे
ष इति· नियमस्यायम्विकल्पः इत्यके इत्येनलब्धमर्थं स्पष्टप्रतिपत्तये आह· केचिदिति· अकाकारभिन्ने कृन्मात्रे इत्यर्थः। अ
नुशासनमिति· अनुशिष्यन्तेऽसाधुभ्यो विविच्य बोध्यन्ते येनेति करणे ल्युट् मन इत्यादौ मतिबुद्धीति वर्त्तमाने क्तः। इदमे
षामिति· कर्त्तरि षष्ठी। सकर्मकेभ्यस्त्वधिकरणे क्ते कर्त्तृकर्मणोर्द्वयोरपि षष्ठी। इदमेषाम्भुक्तमोदनस्य। उभयप्राप्ताविति तु म
ध्येऽपवादन्यायेन कर्त्तृकर्मणोरित्यस्यैव नियम इति बोध्यम्· न लोका· लादेशा इति· लकारसम्बन्धिन इत्यर्थस्तेन ददिर्गाद्
तिसिद्धम्· केवललस्य क्वापि प्रयोगाभावादेवं व्याख्यातम्· ॥ न्धिनि लक्षणेति भावः। ददिर्गाद्ग इतीति· अत्रादृगमेति सूत्रेण किकि
नौ प्रत्ययौ तयोश्वलि ... द्वा वविधानेन लिट्प्रयोज्यद्वित्वप्रयोजकत्वरूपसम्बन्धवत्तयाऽस्ति लकारसम्बन्धित्वमिति भावः। न च लान्तस्य
त्येवास्तु लस्य स्थाने कृते पि स्थानिवद्भावेन लत्वव्यवहारादिति वाच्यम्· अल्विधित्वेन तदसम्भवात्। नन्वादेशापदम्मूलेऽधिकमत आ

श॰ शे॰ भै॰ स्फुटिङ्क्वीणोत्यत्र तत्तनुग्रहणेन निषेधसिद्धे रेतस्यलादेशोदाहरणत्वकथनमधिकमत आह॰ तत्तनुप्रत्याहारेति॰ तस्य॰ लग्रहणस्य॰ अस्मि
टी॰ भै॰ न्सूत्रे उकारोप्यत्र निर्दिश्यत इति भाष्यादुकशब्दात्पूर्वमुकारो बोध्यः स च प्रत्ययसाहचर्यात्प्रत्ययरूपस्य शब्दस्वरूपस्य विशेषणम्॰ उका
४४५ रोप्यत्र निर्दिश्यत इत्यत्र कारप्रत्ययस्य प्रयोगेण तस्य वर्णरूपत्वबोधनात्। वर्णग्रहणे च सर्वत्रेति तदन्तविधिः। तथा चोकारान्तो यः प्रत्य।

कुर्वन्निति॰ तत्र प्रत्याहारघटकत्वनायम्॰ तच्छब्दस्य तद्घटकत्वेपि शातृलद्घटकत्वाभावात्॰ लिडादेशकसादियोगे लिट्
सदृशा कि किनो योगे च निषेधार्थत्वस्यावश्यकत्वाच्च॰ उ इति॰ उकारेण व्याख्यानात्तदन्तविधिर्व्यपदेशिवद्भावेनोकारस्या
पि सनाशंसेति। अलङ्कुञिति च उ इत्युचौ। धातुक इति॰ लषपतपदेत्युकञ्॰ वृद्धिस्तत्त्वम्॰ कमेरिति॰ उकान्तस्येति पू
षः। इदञ्च भाषायामेव। भाषायामिति भाष्योक्तेः। निष्ठेति॰ एतदपवादत्तया भाष्यवार्तिकम्पठ्यते नपुंसके भावे क्तस्य योगे
षष्ठ्या उपसङ्ख्यानम्। छात्रस्य हसितमिति। इदञ्च प्रतिपदोक्तत्वान्नपुंसके भावे क्त इति सूत्रविहितक्तान्तयोग एव भ्रान्त
न्देशमित्यादौ गत्यर्थाकर्मकेत्यनेन क्तेनानेन षष्ठी नपुंसके भावे क्तस्तु नात्र तस्याप्यकर्मकेभ्य एवेष्टेः। अविवक्षितकर्मतयाऽ
कर्मकत्वेन क्तस्तु कृतपूर्वीत्यादिवृत्तिविषय एवेत्युक्तम्॰ ॥ यत्तदनेन योगे षष्ठी नेति फलितम्। तेन कन्यामलङ्करिष्णुरित्या
दावपि निषेधसिद्धिः। उश्च उकश्च उकौ लश्च उकौ चेत्यादिविग्रहः। व्याख्यानादिति॰ कन्यामलङ्करिष्णुरित्यादिप्रयोगदर्शनमूलकाद्व्या
ख्यानादित्यर्थः। उकान्तस्येतीति॰ उकप्रतिषेधे कमेर्भाषायामप्रतिषेध इति वार्तिकस्वारस्यात्। तेन लक्ष्मीङ्कामयमान इत्यत्र प्रतिषेधो
भवत्येव॰ एतदपवादतया॰ निष्ठेत्येतदपवादतया। अत एव॰ तत्सूत्रविहितक्तान्तस्य ग्रहणादेव॰ नात्र॰ भ्रान्तं देशमित्यादौ॰ एवं छात्रस्य हसितमिति॰

भै· ननुप्रागन्वयाविवक्षायामपिकृतेत्यस्यकर्माकाङ्क्षायाःसत्वेनसापेक्षत्वेनासामर्थ्यात्कथंवृत्तिरित्यतआह· वृत्तेः पूर्वमिति· इत्या
दावपीति· अन्यथातत्रापिकर्मण्येवक्तप्रत्ययःस्यात्तथाचकर्मणोऽनभिहितत्वाभावेनक्तस्यत्विषयस्येतिसप्तमीनस्यादितिभावः।यो
ध्यइति· करणादिरूपइत्यर्थःस्पष्टमेवोक्तम्· भाष्यकृतेतिशेषः।तद्भावइति· भाष्यकृद्भावइत्यर्थः।नचात्रनिष्ठान्तार्थभूतायानन्वि
वृत्तेःपूर्वङ्कर्मान्वयाभावाच्चसापेक्षत्वाद्वृत्तिर्नस्यादितिनशङ्क्यम्· एवमधीतीव्याकरणेइत्यादावपिबोध्यम्· तदुक्तम्भा
ष्येयदावीकान्नतदाप्रत्ययः।यदाप्रत्ययःसामान्येनतदावृत्तिरिति।नतदाप्रत्ययः।नतदाभावेप्रत्ययः।धातोःसकर्म
कत्वात्।यदाप्रत्ययः।भावइतिशेषः।तदावृत्तिरेव।साचवृत्तिर्नकदापिकर्मक्तान्तेनेत्याह· सामान्येनेति· कर्मविशेषस्य
तत्तद्रूपेणप्रागन्वयाविवक्षाविशिष्टोयोऽर्थस्तदर्थकधातुप्रकृतिकक्तान्तेनेत्यर्थः।इयमेवकर्मणोविवक्षानामानेनता
दृशक्तान्तस्यवाक्येनप्रयोगइतिस्पष्टमेवोक्तम्।प्रयोगानुरोधिनीहिविवक्षेतितद्भावः।नचाविवक्षितकर्मतयाभावेक्त
साधनपक्षेऽव्यर्थः।नपुंसकेभावइत्यनेनसकर्मकेभ्योपिसिद्धेरितिवाच्यम्ः तस्याप्यकर्मकेभ्यएवेष्टेः।अत्रचेदमेवभा
रूपितकर्मत्वसत्वात्तल्लोकेतिनिषेधस्यप्राप्तिरितिकथंषष्ठ्यापादनमितिवाच्यम्· तस्यापिपूर्वोत्तरसाहचर्येण ॥ष्यम्मानम्· ॥
प्रत्यासत्त्याचनिष्ठान्तमात्रशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मकत्वविशिष्टषष्ठीनेत्यर्थकल्पनात्।अत्रापिनिष्ठान्तश
क्तिग्रहजन्यतावच्छेदकतादृशप्रकारतामादायपरिष्करणीयम्· तेनदैत्यानूहतवत्तरामितिविशिष्टजन्योपस्थितिमादायनाव्याप्तिः।त
स्याप्यकर्मकेभ्यइति· नपुंसकेभावेक्तइतिसूत्रविहितक्तस्येत्यर्थः।अत्र·एतादृशेष्टौ।इदमेवभाष्यम्।यदावीकामित्यादिभाष्यम्॥ ॥

ष्ठ·शे· भै· एतदिति· वार्तिकमित्यर्थः। क्तातिरिक्तेति· एतेनपदसंस्कारपक्षे। आनन्देष्वामित्यादौ चाविवक्षितकर्मत्वेनाकर्मकत्वाद्भावेभूतेक्ते।
टी·भै· निष्ठान्तेन योगे षष्ठी नेति निषेधान्न षष्ठी किन्तु पुनः कर्मयोगेपि द्वितीयैवेति पराभिमतम्· एवं रीत्यास्य साधने पदसंस्कारपक्षमादाय क
४४५ टङ्कृतमिति प्रयोगस्यापत्तेः। ननु वार्तिकारम्भप्रत्याख्यानयोः फलभेदाभिप्रायेण पुनर्भाष्यप्राङ्कि तम्ः यद्येवमुत्तरत्र चातुः प्राव्यमाने
ति। इदमहेः सृप्तम्· अत्राधिकरणे क्तः। षष्ठीकर्त्तरि। इहाहिनासृप्तम्। अत्र भावे क्तः। इहाहिः सृप्तः। अत्र कर्त्तरि। अहेः सृप्तमिति। अ

शेषत्वविवक्षया भाष्योक्तप्रत्याख्याने तु। अनभिधानात् क्तातिरिक्तविषये नत्ता। पूरणगुणेति सूत्रे भाष्ये ध्वनित
मिदम्· तत्र हि सतिकिमुदाहरणम् ब्राह्मणस्य कुर्वन् नैतदस्ति कारकषष्ठ्या निषेधात् शेषषष्ठ्या तु ब्राह्मणस्य क
टमित्यर्थेनासामर्थ्यादित्याद्यर्थकमुक्तमिति परे· अधीयन्निति· इङ् धात्वर्थः पात्रकृक्तिर्णीतिपाना। द्विषन्निति· द्विषाः
॥मित्र इति पाना· ॥

त्र भावे। अत्र शेषषष्ठ्यपि प्राप्नोति। वार्तिकारम्भे तु क्तोधिकरणे चेति क्तविषये नपुंसके भावे क्त इत्यस्मादप्र
त्याः वार्तिकेन कर्त्तरि षष्ठी न। शेषत्वविवक्षायां त्वतन्मतेऽभाव एवेति त्रैप्राव्यमिति चेन्न· इहाहेः सृप्तं ग्रामस्य पार्श्वे ग्रामस्य मध्य इति।
इष्यत एव चातुः प्राव्यमिति। अत्र ग्रामस्य पार्श्व इति सप्तम्युक्त्यैव नाधिकरणस्यानभिहितत्वोपपत्त्यर्थं भाव एव प्रत्ययो विधेयस्तदा वार्ति
केन कर्त्तरि षष्ठी स्यादेव। इहेत्यस्य विवरणं ग्रामस्य पार्श्व इतीति फलभेदाभावात् क्तातिरिक्तविषय इत्यनेनान्यत्र लादेशादिनिषेधवि
षये शेषत्वविवक्षाभावो बोधितः। तत्र साधकमाह· पूरणेति· असामर्थ्यात्· ब्राह्मणस्येत्यस्य स्वान्वययोग्यनामार्थेऽन्वयेनासाम।

मै·

इदन्त्विन्त्यमिति· यदिब्राह्मणस्येत्यस्यक्रियायामन्वयःस्यात्तदेदंसूत्रोदाहरणंयुक्तंनामार्थान्वयेतुक्रियायामनन्वयेनशेषेषष्ठीतिवक्तु
मशक्यमितिभावः नेष्यतइति· अकस्यभविष्यतीतिवक्तव्यम् यवान्लावकोव्रजति ओदनम्भोजकोव्रजति· सक्तून् पायकोव्रजतीति इनआ
धमर्ण्येचेतिवक्तव्यम् शतन्दायीसहस्रदायी ग्रामङ्गमीति अत्रैतादृशयोगविभागेनव्याख्यानान्नेष्यतइतिसिद्धम् नन्वेवमुभयोरुभयत्रसम्भवोऽ।

शेषषष्ठीत्विति· इदन्त्विन्त्यमित्युक्तम्मते: अकेनो· अत्रयथासङ्ख्यन्नेष्यते अकस्याधमर्ण्येऽसम्भवादाह भविष्यत्यकस्ये
ति· वर्षशतस्यपूरकइत्यादौगतत्कर्मकयाजनकर्त्तारइत्यर्थकेअङ्ग यजतालप्स्यन्तेःस्ययाजकाइत्यादौचषष्ठीभवत्येव कर्त्तृ
मात्रार्थकेण्वुलतृचावितिण्वुलिपदान्तरसम्बन्धेनभविष्यत्वप्रतीतावप्यकस्यतत्रावृत्तेः तुमुनण्वुलावितिण्वुलतुभविष्यतीत्य
धिकृत्यविधानाद्भविष्यदर्थकएवेतिभावः व्रजङ्गमीति· गमेरिनिरित्यौणादिकइतिः सचभविष्यति भविष्यतिगम्यादयइत्यु
क्तेः गामीतिपाठेबाहुलकाद्वृद्धिः शतन्दायीति· आवश्यकाधमर्ण्ययोरितिणिनिः आवश्यकेणिनाबव्ययन्निषेधः सूत्रेआधम
र्ण्यपदेनतत्सूत्रोक्तार्थोपलक्षणात् अतएवांशंहारीतिनिर्देशः सङ्गच्छते तत्रह्यावश्यकेणिनिः नचात्रभविष्यदर्थकत्वेनसिद्धि
भूतवर्त्तमानयोरावश्यकत्वबोधनस्यवैफल्येनभविष्यतएवततोबोधादितिवाच्यम् वस्तुतोभविष्यतोबोधेपितत्त्वेनाबोधात्णि
नेस्तदर्थकत्वाभावाच्च·।। ९ त्वित्यतआह· अकस्येत्यादि· कर्त्तृमात्रार्थकइति· अत्रमात्रपदेनभविष्यत्वव्यवच्छेदः सूत्रेति· अकेनोरि
तिसूत्रइत्यर्थः तत्सूत्रइति· आवश्यकाधमर्ण्ययोरितिसूत्रेइत्यर्थः अतएव उपलक्षणादेव भूतवर्त्तमानयोरिति· भूतस्यजातत्वेननत्र
तथाकथनम्व्यर्थमेव वर्त्तमानेचप्रमाणान्तरेणैवतयानिश्चयसम्भवादेतत्कथनानुपयोगइतिभावः तत्त्वेन· भविष्यत्वेन।। ।।

मैं·

प्रौ·प्रो· अतएव णिनेर्भविष्यदर्थकत्वाभावादेव नव्याइति· अनेनसुप्यजातावितिसूत्रेणणिनिप्रत्ययेष्णुक्तरीत्या भविष्यत्वप्रतीतावपिनदो

टी·भै· षइतिसूचितम्· निषेधोयमिति· कृत्यानामितिनिषेधइत्यर्थः कर्त्तरिकर्मणिचेति· विशेष्यानुपादानादुभयत्रनिषेधोयमितिभावः।

४७६ प्राचीनोक्तंड्खण्डयति· व्रजमिति· नचानभिहिताधिकारावैपर्थ्योपपादनावसरेकर्त्तव्यः कटइत्यत्रपरत्वात्कृद्योगलक्षणाषष्ठीप्रस।

अतएवावश्यङ्करीकटस्येतिवृत्त्युदाहृतंसङ्गच्छते तत्रहिनानेनणिनिः अवश्यपदोपादानात्· किन्तुसुप्यजाता वितिनव्याः कृत्यानाङ्कर्तृकर्मणोरितिनित्येप्राप्तेविभाषाकर्मनिवृत्त्यर्थङ्कर्तृग्रहणम्· अनुवर्त्ततइति· निषेधोऽयङ्कर्त्तरिकर्मणिच कर्त्तरिवेतित्वनुभयप्राप्तिविषयमितिवृत्तिकैयटादयः व्रजमित्यत्रगुणकर्मणिवेष्यतइतिविकल्पस्तुन·। कृत्यातिरिक्तेचरितार्थस्तस्यदोग्धव्यागावः पयः कृष्णेनेत्यादौगुणकर्मणउक्तत्वात्प्रधानेचरितार्थेनानेनपरत्वाद्बाधात्· तुल्यार्थैर्योगइति· तुल्यत्वार्थैरित्यर्थः अतएवातुलोपमाभ्यामितिचरितार्थम्· अतएव पर्युदासादनव्ययप्रयोगावेदम्· तेनेवशब्दयोगेन·॥ ॥ङ्गादितिमनोरमायामभिहितन्तस्यकथमुपपत्तिरितिवाच्यम्· यत्रोभयोः प्रयोगस्तत्रैवोभयोःप्राप्तिरितिकर्त्तव्यःकटइत्यत्रनास्यनिषेधस्यव्यापारइत्याशयात्· नचोभयप्रयोगएवचेदाकृष्टव्याग्रामंशाखेतिकृत्यानामितिविभक्तसूत्रोदाहरणम्भाष्येउक्तन्तस्यकागतिरितिवाच्यम्· कर्तृपदाश्चर्यपदाध्याहारेणतस्यभाष्यस्योपपत्तेः यथाश्रुतेतुल्यशब्दस्यधर्मिवचनतयासाम्यङ्कृष्णस्यकृष्णेनवाप्रद्युम्नइत्यादौप्राप्तासङ्गतिःपरिहारायाह· तुल्यत्वार्थैरिति· अतएव·भावप्रधाननिर्देशादेव अन्यथातुलोपमाशब्दयोस्तुल्यार्थकत्वासम्भवेनयोरुपादानम्व्यार्थमेवस्यादितिभावः·अतएव· अस्मादेव ॥ ० ॥ ८ ॥ ८ ॥

भे· असधातुश्चसकर्मकस्तस्मान्नपुंसके भावेक्तइत्यनेनक्तस्यासम्भवात्कत्यर्थेत्यनेनभावेक्तप्रत्ययोपदानिक्रियतेतदाऽसमणक्रियाकर्तृवाचका।
त्कर्तृकर्मणोरितिप्राप्तषष्ठ्यानिष्ठेतिनिषेधोभवत्येवेतितृतीयैवभवतीतिभावः।एवञ्चपूर्वोक्तव्यवस्थासिद्धोचा।अकर्मकधातुविषयेविशे
षमाह· अहेःसृप्तमिति· अत्रसृधातोश्चलनमात्रमर्थः। परत्वेन· वार्तिकात्परत्वेन· शेषत्वविवक्षैव· कर्तुः·शेषत्वविवक्षैव· कर्तृकर्मणोरि
तितुनिष्ठेतिप्रतिषिद्धम्· भाष्येप्रत्याख्यातमिति· तत्रहिक्तस्यचवर्तमानेनपुंसकेभावेउपसङ्ख्यानमुक्तस्यचवर्तमानेनपुंसकेभावेउ

एवञ्चेहाहेःसृप्तमित्यादौपरत्वेनक्तोऽधिकरणेचेत्यनेनभावेक्तेशेषत्वविवक्षयैवषष्ठीसाधनस्यावश्यकत्वेनेदंशेष
त्वविवक्षयाभाष्येप्रत्याख्यातम्· वार्तिकेनचानेनकारकषष्ठीनिषेधविषयेशेषत्वेविवक्षानेतिज्ञाप्यते॥ ॥

पसङ्ख्यानकर्तव्यम्।नटस्यभुक्तम्· छात्रस्यहसितम्।मयूरस्यनृत्तम्।कोकिलस्यव्याहृतमिति।अत्रक्तस्यवर्तमानइत्यस्योपादान।
मस्मिन्वार्तिकेक्तस्येत्यस्यानुवृत्तिसूचनाय।नपुंसकेभावेविहितःक्तस्तुकालोदासीनएव।एवञ्चकालोदासीनभावविहितक्तान्तेनयो
गएवनिष्ठेतिनिषेधस्याधित्वानपुंसकेभावइतिषष्ठी· यद्यप्यत्रकर्तुःशेषत्वविवक्षयासिध्यति· तथापिकर्तृत्वप्रकारकबोधेषष्ठ्य।
र्थमिदमितिवार्तिककाराशयः।ततोभाष्यपूर्ववार्तिकमप्रत्याख्यातम्· शेषविज्ञानात्सिद्धम्· शेषलक्षणात्रषष्ठीभवति।शेषइत्युच्यते।
शेषश्चकः।कर्मादीनामविवक्षाशेषः।साचाविवक्षासतोप्यविवक्षाभवतीत्यनेनप्रकारेणोपपादिता· इदन्नपुंसकेभावेइत्येतत्· वि

श॰शे॰ मै॰ वृत्तेस्तथास्वभावेप्रमाणमाह॰ भाष्यइति॰ मूलेव्याख्यानादिति॰ प्राचाम्व्याख्यानादित्यर्थः ननुसुखशब्दान्तद्वन्द्वङ्गत्वाऽर्थशब्देनवहुव्री
टी॰भै॰ हिसमासेकृतेद्वन्द्वान्तइतिन्यायेनैवार्थलाभेव्याख्यानादित्ययुक्तमतआह॰ सूत्रेऽर्थशब्दइति॰ तथाचार्थशब्दान्तोद्वन्द्वएवापन्नत्वर्थशब्दे
४५७ नवहुव्रीहिरितिभावः प्राचोक्तन्दूषयति॰ भाष्येत्विति॥ ॥ इतिषष्ठीविवरणम्॰॥ ॥ तदाश्रयस्य॰ क्रियाश्रयस्य व्याख्यानादिति॰

भाष्येतयाप्यन्वयेवृत्तेरसाधुतायाअनुक्तेश्चेतिसमासवादेमञ्जूषायाम्विस्तरः व्याख्यानादिति॰ सूत्रेऽर्थशब्दः पृथङ्भि
न्नमितिभावः भाष्येतुनैतद्दृश्यते॰॥ ८॥ इतिषष्ठी॥ ९॥ आधारो॰ कारकेइत्यधिकारात्क्रियाजनकेएतत्संज्ञोपस्थित
त्वादाधारः क्रियापाएवतत्रेप्सिततमस्वतन्त्रपदाभ्यांसाक्षात्क्रियाधारयोः कर्मकर्तृसञ्ज्ञाभ्यांबाधात्परम्परयातदाश्रयस्य
ग्रहणम् परम्पराचकर्तृकर्मद्वारकैवव्याख्यानादित्याह॰ कर्तृकर्मद्वारेति॰ यद्यपिकालस्यसाक्षात्क्रियापरिच्छेदकत्वन्त
थापिकर्तृकर्मद्वारैव तथैवानुभवात्साक्षात्तदाधारत्वेपि आधारपदेस्वरितत्वप्रतिज्ञानात्परम्पराधारस्यग्रहणम्॰ किञ्चसाक्षात्त
दाधारत्वेकर्तृत्वमेवतस्यस्यात्कालः पचतिभूतानीतिवत् एवञ्चक्रियान्वयोऽप्यस्यकर्त्राद्यन्वयद्वारैव अस्यतद्द्वाराकारकत्वन्तस्यत
द्वारैवक्रियान्वयइतिव्युत्पत्तेः॥ ((कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणंस्मृतमितिहर्याद्यु
क्तिमूलकव्याख्यानादित्यर्थः हरिकारिकायांयदुक्तमसाक्षाद्धारयत्क्रियामितितद्व्यभिचारोपिक्वचिदस्तीत्याह॰ यद्यपीति॰ ननुसम्भवतिसाक्षा
त्तदाधारत्वेकथम्परम्परयातदाधारस्यग्रहणमतआह॰ आधारपदइति॰ साक्षात्तदाधारस्यतुचैत्रादितुल्यत्वमेवेत्याशयेनाह॰ किञ्चेति॰ तत्र
दृष्टान्तमाह॰ कालइति॰ एवञ्चपरम्परयाधारस्यग्रहणसिद्धौच अस्य आधारस्य॥ ॥ ॥ ॥ ॥

मे· अतएव· पूर्वोक्तनियमस्वीकारादेवा कारकाणाङ्क्रियान्वयित्वमितिनियमोऽप्यधिकरणविषयेपरम्परयैव। अस्यशौण्ड इत्यादाविति· यथाक
टेशेतेचैत्र इतिवाक्यात्कटाधिकरणकचैत्रकर्तृकंशयनमितिबोधस्तथास्येषुशौण्ड इतिवाक्यादपि अस्याधिकरणकशौण्डकर्तृकाभवन
क्रियैयेवंरीत्याबोधात्साक्षादेवसप्तम्यन्तस्यशौण्डादिभिःसामर्थ्यमितिसमाससम्बन्धासिद्धिः। अत्र· अस्यशौण्ड इत्यादौ· नयुक्तमिति· भाष्यकृतात
स्यार्थस्यानुक्तेरितिशेषः। यत्रतुक्रियावाचकम्पदन्नश्रूयतेतत्रापितदन्वययोग्यक्रियावाचकम्पदमध्याहृत्यक्रियाधारत्वमुपपादनीयम्।

अतएवाक्षशौण्ड इत्यादौसमासः। अत्राऽऽसक्त्यादिक्रियान्तर्भावेणबोधाननुभवात्क्रियाद्वारासामर्थ्यमितिकैयटाद्यु
क्तान्नयुक्तम्· मूलेवृक्षःकपिसंयोगीत्यादावस्तिक्रियामध्याहृत्यतस्याःस्वकर्तृकपिसंयोगिवृक्षद्वारामूलवृत्तित्वादाधा
रत्वम्विशिष्टवृक्षस्यमूलवृत्तित्वबोधनेऽन्यत्रावयवेतद्विशिष्टवृक्षाभावप्रतीतेःकपिसंयोगेतदवच्छेद्यत्वम्फल
तीतिदिक्· चकारादिति· प्रातिपदिकार्थैइतिशेषः॥ ॥ ९९ तदाह· मूलेवृक्षइति· फलतीति· एवमभिधानेनकपिसंयो
गादौमूलावच्छेद्यत्वावगाहिनीमानसीप्रतीतिरित्युक्तम्· तत्रकटेशेतेस्थाल्याम्पचतीत्यादावाधारत्वेनाभिप्रेतेकर्तृकर्मणोःसंयोगोऽस्तीति
तद्द्वाराधारत्वम्· क्वचित्तवच्छेदकतासम्बन्धेन। शिरसिमेवेदनापादेमेसुखमित्यादौयथा। क्वचित्तुप्रतियोगितानिरूपितानुयोगितया। यथा
ऽभावेप्रतियोगितयाघटःप्रकारोऽस्तीत्यादौ। एवमन्यत्राप्यूह्यम्। चकारेणविहितायासप्तम्याःसार्थेनतुतस्मिन्वाक्येऽधिकरणइत्यस्यसम्ब
न्धः। वाक्यभेदसामर्थ्यातदभिप्रायेणाह· प्रातिपदिकार्थइति॥

प्रा·प्री· मे· तत्र· तेषुमध्ये· सकलेति· सकलावच्छेदेनव्याप्तिरित्यर्थः। व्याप्ताविति· अत्रव्यापनम्व्याप्तिपदार्थः। सचव्यापकत्वाभिन्नइत्यभिप्रायेणाह·
टी·भै· व्यापकाधारत्वमिति· व्यापकत्वञ्चव्याप्यतानिरूपितम· व्याप्यताचकिन्निष्ठेत्याकाङ्क्षायामन्यस्यानुपस्थितत्वात्प्रकृतस्यर्थनिष्ठैवग्राह्या। प्रकृतस्यर्थ
४५८ स्यव्याप्यताचसमवायसम्बन्धेन। व्यापकत्वन्तुसंयोगसम्बन्धावच्छिन्नमाधेयनिष्ठंविवक्षितमितिसंयोगसम्बन्धावच्छिन्नाधेयनिष्ठव्याप
कतानिरूपितापासमवायसम्बन्धावच्छिन्नाव्याप्यतातद्विशिष्टाधारो·भिव्यापकाधारः। तिलेषुतैलमित्यत्रस्वावयवेषुसमवायेनतिलस्यस
त्वात्तेषुसर्वत्रतैलस्यसंयोगेनसत्वादुक्तव्याप्यव्यापकभावोद्रष्टव्यः। एवमेवदध्निसर्पिरित्यादावपिज्ञेयम· मुख्यमिति· आधारमाचार्यः किन्त्या

त्रिधेति· तत्रसकलावयवव्याप्तौव्यापकाधारत्वम· यथातिलेषुतैलमिदमेवमुख्यमधिकरणमितिस्वारितेनेस
त्रसाधकतममित्यत्रचभाष्येस्पष्टम· उपसमीपेश्लेषः सम्बन्धस्तत्कृतमौपश्लेषिकम· अतएवेकोयणचीत्यादा
वौपश्लेषिकेआधारेसततम्पूर्वासंहितायामितिसूत्रेभाष्ये· तत्राजादिसामीप्यमेवेगादीनांयन्मासेतिक्रान्तेदीयते
तस्यमासऔपश्लेषिकमधिकरणमित्युक्तम· तत्रचदीयतइतिसूत्रेभाष्येतदस्मिन्नधिकमितिसूत्रेभाष्येस्पष्टमिदम·

प्यमन्यतेयत्रकृत्स्नआधारात्माव्याप्तोभवतितेनेहैवस्यात्तिलेषुतैलन्दध्निसर्पिरितिहिसाधक तममितिसूत्रभाष्ये·भिहितम। अतएव· औप
श्लेषिकपदस्योक्तार्थस्वीकारादेव· एवञ्चेकोयणचीत्यादौनिमित्तत्वेनाभिप्रेतेऽचपदार्थेइकपदार्थसामीप्यादेवेगाधारत्वव्यवहारः। एता
दृशाधारस्यगौणत्वव्यवहारः। अतएवसाधकतमितिसूत्रभाष्येगङ्गायाङ्गावः कूपेगर्गकुलमित्यत्रनस्यात्कारकसञ्ज्ञायान्तरतमयोगेनभ
वतीत्यत्रापिसिद्धम्भवतीत्युक्तम· औपश्लेषिकाधारस्याप्यधिकरणकालपूर्वत्वरूपः। औपश्लेषिकमप्यधिकरणंसप्तमीशकामित्यत्रमाना

मे.
चतुर्थी सम्प्रदान इति वच्चतुर्थी चाशिषीत्युक्तत्वेनाशीश्चतुर्थ्यर्थ इति भ्रमवारणायाह· आशीर्विषयेति· तद्द्वारकेति· क्रियाद्वारकेत्यर्थः अतए
व· क्रियाद्वारकसम्बन्धस्वीकारादेव· उभयोरपीति· देवदत्ताय सुखम्भूयादित्यादौ देवदत्तापेत्यस्य सुखमित्यादेश्च क्रियान्वयेन सुखमित्यस्य क
र्तृतया देवदत्तोपेत्यस्य सम्बन्धित्वेन भूयादित्येतच्छब्दबोध्यक्रियामन्वयेन अतएव· एतद्धितचतुर्थ्यन्तस्य तेन समासाभावादेव· अ
नेन सूत्रेण यात्र चतुर्थी तत्र चतुर्थ्यन्तार्थस्योद्देश्यत्वमाशीर्विषयक्रियान्वयिनश्च विधेयत्वमिति वाक्यस्योद्देश्यविधेयभावावगाहिबोध

चतुर्थी चाशिषि· आशीर्विषयक्रियान्वय्यर्थकात्प्रातिपदिकात्तद्द्वारके आयुष्यादियोगे चतुर्थीषष्ठ्यावित्यर्थः अतएवै
तदर्थकचतुर्थ्याद्यन्तेन सुखहितादिभिर्न समासः उभयोरपि क्रियान्वयेन परस्परमसामर्थ्यात् अतए व हितेन च चतुर्थ्या
समासविधानं तद्योगे चतुर्थीज्ञापकमित्याकरोक्तं सङ्गच्छते· पन्तु वृत्तावुद्देश्यविधेयभावेनानन्वयादाशीर्विषये च तथा
न्वयान्न समास इति तन्न· वृत्तावपि प्राप्तत्वादिपर्यालोचनेन लोहितोष्णीषेत्यादौ तथान्वयदर्शनात्॥ ९ जनकस्मृत्तौ चन तथेति वृत्ति

विग्रहयोः समानार्थत्वाभावान्नैतद्धितचतुर्थ्यन्तेन समास इति प्राचोक्तं दूषयति यत्विति तथान्वयात्· उद्देश्यविधेयभावेनान्वया
त्तन्न समासः उद्देश्यविधेयभावेनान्वयबोधे पृथगुपस्थितेस्तन्त्रत्वादिति भावः वृत्तावपि प्राप्ताप्राप्तविवेकेन यत्प्राप्तं तदुद्देश्यं यच्चाप्राप्तं त
द्विधेयमिति कल्पनया उद्देश्यविधेयभावेनान्वयेन वृत्तौ सर्वत्र तथान्वय इति नियमे मानाभाव इत्यभिप्रायेण दूषयति· तन्नेति· लोहितो
ष्णीषा इत्यादावितिशेषः ष्णीषाः ऋत्विजः प्र चरन्तीति वाक्ये नोष्णीषस्य प्राप्तत्वात्तदनुवादेन लौहित्यमात्रस्य विधानादिति भावः ॥ ❀ ॥

शा·शे· भै· तेन· इन्विषयस्येत्यस्योक्तार्थकत्वेन· अभिहितत्वेनेति· सप्तम्यधिकरणे चेतिसूत्रेऽस्य वार्तिकस्य पाठादनभिहित इत्यस्य सम्बन्धः। यन्मूले
टी·भै· कर्तरीत्युपात्तन्तत्त्वोभोपायमाह· तत्रहीति· ननु प्राकृतमेवेदङ्कर्मेतिरीत्या कालस्यापि कर्मत्वात्तस्मिन्नपि सप्तमीस्यादिति मासमधीती व्याक
४४८ रण इत्यत्र मासपदादपि सप्तमीस्यादत आह· अत्रकर्मशब्देनेति· व्याख्यानादिति· अधीत इत्येतावन्मात्रोपादानेवेदादिरूपपरसन्द
र्भाकाङ्क्षानियमोस्तीत्येतादृशङ्कर्मान्तरङ्गमित्येतन्मूलकव्याख्यानादित्यर्थः। कैयट इति· अत्राहु· चिवीजन्तु कालादिकर्मणां सकर्मका
इन्विषयस्येति· इनो विषयस्येन्प्रकृतेः क्तान्तस्य कर्मणीत्यर्थः। तेन कृतपूर्वी कटमित्यत्र न। उदाहरणेन कर्मणि क्तः। अभि
तत्वेन सप्तम्यनापत्तेः किन्तु भावे इष्टादिभ्यश्चेति· तत्र हि श्राद्धमनेनेत्यत्तोऽनेनेति वर्त्तते अत्र कर्मशब्देन कालादिव्य
तिरिक्तमेव गृह्यते व्याख्यानात्· तेन मासमधीती व्याकरण इत्यत्र नेति कैयटः। साध्वसाधु· शेषषष्ठ्यपवादोऽयम्· साधु
निपुणाभ्यामित्येव सिद्धे· नचार्थमत्र साधुग्रहणम्· तेन तत्वकथनेऽपि भवति सूत्रेऽर्चाग्रहणन्तु निपुणार्थम्·॥ ॥
कर्मकसाधारण्येन धातुसामान्यकर्मतया तत्प्रयोगमानाभावः पदसन्दर्भस्यार्थशब्दत्वात्मकसामान्यरूपेण प्रकृतधात्वर्थकर्मतया कस्मि
न्निति विशेषाकाङ्क्षापि सामान्यज्ञानपूर्विका भवतीति तस्यापि ग्रहणमिति। एतद्वार्तिकव्याख्यानोत्तरम्मूले निमित्तात्कर्मयोग इति यस्य
चेति सूत्रम्व्याख्याय साध्वसाधुप्रयोग इति वार्तिकम्व्याख्यातमतान्नयुक्तम्· भाष्ये क्तस्येन्विषयस्येत्येतद्व्याख्यानानन्तरं साध्वसाधुप्रयो ४४९
गे चेत्यस्य व्याख्यानादितिते नैव क्रमेण व्याचष्टे· साध्वसाध्विति· तत्वकथनेपीति· अर्चा हि यत्राविद्यमानस्यापि धर्मस्य पूजनीयत्वद्योतना

भे॰ अतएवमूले ऽर्चायाङ्किम्· निपुणो राज्ञो भृत्य इत्येवोपात्तम्· इतो ऽये ऽहीणमित्येतद्व्याख्यानानन्तरम्भाष्यीयक्रमानुरोधेन व्याख्यानमुचितम्· मूलकारानुरोधेन तु व्याचष्टे। निमित्तादितीति· फलं सप्तम्यर्थ इति· अनिर्दिष्टार्थ इति न्यायादिति भावः। तल्लाभेच्छाधीनत्वादिति· एवञ्च फलेच्छाया उपायेच्छाप्रयोजकत्वस्य प्रसिद्धत्वाद्धननरूपोपायेच्छाप्रयोजकेच्छाविषयचर्मलाभस्यैव मुख्यफलत्वम्। चर्मणस्तु लाभकर्मत्वात्फलत्वमुपचरितम्बोध्यम्· चर्मणि द्वीपिनं हन्तीत्यादिभाष्योदाहरणादिति भावः। स्वरूपसन्नेव निमित्तमिति· ननु तस्य शाब्दबोधविषयत्वमाव

**निमित्तादिति· निमित्तवाचकात्सप्तमी भवति तस्य निमित्तस्य प्रत्यासत्त्या स्वान्वयिक्रियाकर्मणा योग इत्यर्थः। निमित्तञ्चात्र क्रियाफलम्। एवञ्च फलं सप्तम्यर्थः। चर्मणीति· चर्मणः फलत्वञ्च हननस्य तल्लाभेच्छाधीनत्वात् कर्मसम्बन्धश्च स्वरूपसन्नेव निमित्तम्· द्वीपिचर्मणोरण्डकोशमृगयोश्च समवायः। इतरयोः संयोगः। मुक्ताफलाय करिणं घ्नवीरेत्यादौ क्रियार्थोपपदस्येति चतुर्थी घ्नन्तीति शेषः। मुक्ताफलान्याहर्तुमित्यर्थः। यस्य च भा· भावः क्रिया· ततः ज्ञापकक्रियाश्रयवाचकात्। तेन गोषु दुह्यमानपदयोरुभयोरपि सप्तमी सिद्धा·॥ ९९**

ह इतिशेषः। कर्मयोग इत्यत्र प्रयोगपदे सम्बन्धवाचि। स च सम्बन्धः संयोगसमवायान्यतरात्मकस्तदभिप्रायेणाह· द्वीपिचर्मणोरित्यादि· अण्डकोशमृगयोरिति· यद्यपि मृगशब्दस्याल्पाच्तरत्वं तथापि सीम्नि पुष्कलको हत इति भाष्ये येन क्रमेणोपादानं कृतं तेनैव क्रमेण व्याख्यानमुचितमित्यभिप्रायेण पूर्वनिपातप्रकरणं समुद्भाव्याह इति सौत्रनिर्देशेनानित्यमतो वैपरीत्येन व्याख्यातम्। मुक्ताफलायेत्यत्र चतुर्थ्या असाधुत्वभ्रमनिरासायाह· ज्ञापकक्रियाश्रयवाचकादिति।

पू·पू· मे·क्रियापदस्यधात्वर्थप्रतिपादकतयाफलव्यापारयोश्चधात्वर्थत्वादाह·कर्त्ताकर्मचेति अत्रकर्मकर्त्ताचेतिवक्तव्येकर्तृशब्दस्यप्रथममुपाद
टी·भै· नङ्कर्मसंज्ञाविधायकसूत्रेकर्तृशब्दस्यप्रथमोपादानाभिप्रायेण।क्रियायाःपरस्परंज्ञाप्यज्ञापकभावःप्रकृतसूत्रस्यप्रवृत्तौनियामकः।तत्रनिर्ज्ञा
५५० तकालाक्रियाऽनिर्ज्ञातकालक्रियायाज्ञापिका।अत्रकालोनवर्त्तमानएवविवक्षितःकिन्तुभूतभविष्यतोरपिसम्भवतिघटकत्वमित्याशयेनत
त्कालस्थलेसूत्रप्रवृत्तिन्दर्शयति·तत्रकाचित्क्रियेति·तत्रज्ञापकक्रियासु।ज्ञापकत्वमिति·नचसमस्यर्थेज्ञापकत्वेकृदन्तार्थविशेषणेना

क्रियाश्रयःकर्त्ताकर्मच·तत्रब्राह्मणेष्वधीयानेषुगतइतिकर्त्तर्युदाहरणम्·कर्मण्याह·गोष्विति·तत्रकाचित्क्रियास्वाधा
रकालेनान्याङ्क्रियाम्परिच्छिनत्ति·यथाप्रकृतेकाचित्तुस्वाधारकालाव्यवहितपूर्वकालेन।यथागोषुधोक्ष्यमाणास्वित्यादौ·का
चित्स्वाधारकालानन्तरकालेन·यथागोषुदुग्धास्वित्यादौ।ज्ञापकत्वंसमस्यर्थस्तस्यचभावलक्षणमित्युक्तेःक्रियायामेवान्व
यः।लक्ष्यलक्षणभावःशब्दबोध्यएवैतच्छास्त्रप्रवृत्तौनिमित्तन्नतुतस्यभूपोदर्शनादिरूपमानान्तरेणग्रहणापेक्षेतिबोध्य
म्·अन्यथोदितेआदित्येतमोनष्टमित्यादावेवस्यान्नतुप्रकृते।कदाचिद्धिगोषुदुह्यमानास्वसौगतः॥ ॥ ॥

पन्नक्रियायाएकविशेषणत्वेनोपस्थितस्यान्यत्रविशेषणतयाऽन्वयायोगइतिव्युत्पत्तिविरोधाद्विशेषणतयाऽन्वयोनसम्भवती
तिवाच्यम्·प्रकृत्यर्थस्यक्रियाविशिष्टकृदन्तार्थस्याधेयतयाऽन्वयस्वीकारात्।विशेष्येज्ञापकत्वबाधेपिविशेषणेपर्यवसानमास्त
गोंध्वस्तइतियथा·तस्यचज्ञापकत्वस्यस्वनिरूपितज्ञाप्यत्वसम्बन्धेनगतशब्दार्थघटकगमनक्रियायामन्वयः॥ ॥

मे· तत्रत्यैकारश्चाधिका। अस्मिन्नश्नातइत्यत्र शतस्याधिकरणत्वाभावात्कथं सप्तमीत्याशङ्क्यौपश्लेषिकमिदमधिकरणमित्युक्तम्। ग्रात
समीपेहितेभवन्तिनतुतदन्तर्भूताइति। नौपश्लेषिकमिति· औपश्लेषिकपदस्यावयवमर्यादयायोऽर्थः प्रतीयते सोऽत्रनास्तीतिभावः। तदेत
दाह· उक्तभाष्येति· सूत्रस्थभाष्ये इत्यर्थः। नन्वेवङ्कटे आस्ते स्थण्डिले शेते इत्यौपश्लेषिकाधारे सप्तमीतिग्रन्थानाङ्गतिरिति चेत्तेषामपि यथा
कथञ्चित्तदभिप्रायेणाह· यद्वेति· एतत्सर्वमिति· औपश्लेषिकं सर्वाधिकरणमित्यर्थः। गङ्गायाङ्गाव इत्यादिकञ्चेति· आदिना कूपे गर्गकूल

कटे आस्ते इति तु नौपश्लेषिकोदाहरणं युक्तमुक्तभाष्यविरोधात्· यद्वैकदेशावच्छेदेन श्लेषपि श्लेषस्य समीपमुपश्लेषन्न
त्वक्तमितिव्युत्पत्त्यौपश्लेषिकत्वमित्यभिप्रायेणतदुदाहरणन्नत· एतत्सर्वङ्गौणमधिकरणङ्गङ्गायाङ्गाव इत्यादि^
कञ्चेति स्वरितेनेत्यादौ भाष्ये स्पष्टम्· गौणोप्याधारादिः सप्तम्यादिशक्य एवेति बोध्यम्· एतदतिरिक्तं सर्वं वैषयिकम्।
अधिकरणत्वशक्तिमांश्चाधिकरणविभक्त्यर्थः॥ ॥ ९९ मित्यस्य सङ्ग्रहः। अत्र यद्यपि गङ्गापदस्य सामीप्यात्तीरे गङ्गा^

त्वारोपात्सवृत्तित्वन्तथापि न सर्वावयवावच्छेदेन गोसम्बन्ध इति भावः। शक्य एवेति· आधारोऽधिकरणमिति सूत्रस्याधारपदे स्वरि
तत्वप्रतिज्ञानात्। अधिकः कारोऽधिकार इत्यर्थाश्रयणात्। एतदतिरिक्तमिति· उभाभ्याम्भिन्नमित्यर्थः। यथा मोक्ष इच्छास्ति· खेश^
कुनपदस्यादौ। उक्तद्वयातिरिक्तत्वेन सर्वसङ्ग्रहो न तु विषयतासम्बन्धावच्छिन्नाधिकरणमेवेत्याग्रहः। एवञ्च वैषयिकपदमुभयाति
रिक्तेरूढ इति भावः। शक्तिमांश्चेति· चकारेण क्रियाधिकरणभावसम्बन्धपरिग्रहः॥ ॥ ॥ ॥

प्र·भा·
टी·मै·
४५१

मै· नावश्यन्तरेवलक्षणम्भवतियेनपुनः पुनर्लक्ष्यतेसकृदपियन्निमित्तत्वायकल्प्यतेनतदपिलक्षणम्भवतीतिभाष्यस्वरसादिसर्थः॥ निमित्तत्वा
यापरिच्छेद्यपरिच्छेदकभावनिमित्तत्वायेसर्थः।सचपरिच्छेद्यपरिच्छेदकभावः।क्रियाद्वाराकालयोःफलति। क्वचित्तुनिर्ज्ञातदेशक्रियाअनिर्ज्ञात
देशविशेषक्रियायालक्षणम्भवति।यथाद्रव्यगुणकर्मान्यत्वेसतिसत्वादित्यादौ।भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः।क्षीयन्तेचास्यकर्मा
णितस्मिन्दृष्टेपरावरइत्यादौच।अत्रसतीत्यस्याध्याहारः।सत्वादित्यत्रतुसतीत्यनन्तरंसतइत्यस्याध्याहारोविवक्षितः।नन्वेवंराहूपरागेस्नायादि
दित्यत्रज्ञापकक्रियावाचकपदाभावात्कथमेतत्सूत्रप्रवृत्तिरतआह· राहूपरागइत्यादिष्वप्यधिकरणसप्तम्येवेति· यद्यत्रराहूपरागेसतिस्ना

राहूपरागेस्नायादित्यत्रराहूपरागपदेनतदाश्रयकालउच्यतइत्यधिकरणसप्तम्येव·विवाहेनान्दीमुखङ्कुर्यादित्यत्रवि
वाहपदेनतत्काल उच्यते· मघासुपिण्डदानमित्यत्राप्यधिकरणसप्तम्येवसप्तम्यविस्तरः॥ ॥ ॥

यादित्येवक्रियावाचकपदाध्याहारेणास्यचभावेनेतिसप्तमीत्युच्यतेतदाराहूपरागेसत्वस्नानयोर्लक्ष्यलक्षणभावस्यसमानकालिकत्व
स्यवालाभेपिराहूपरागसत्वस्यस्नाननिमित्तत्वा लाभः।इष्टापत्तिस्तुन·स्नाननिमित्तत्वाभावेसति आलस्यादिनाशक्तेनस्नानाद्यकरणेप्रा
यश्चित्तविधेरनुपपत्तेः।अधिकरणसप्तम्यान्तुराहूपरागकालत्वावच्छेदेनस्नानस्यविधानेनराहूपरागस्यनिमित्तत्वम्फलति।यत्ता
देशोःचइत्येतिभावः।नत्वेवाह·विवाहइति·लक्षणयाउदाहरणान्तरमप्याह·गवामितिमानान्तरसिद्धस्यकालदेशविशेषज्ञापनाययत्रप्र
योगस्तत्रैवयस्यचेतिसप्तमीस्वीकारेणेत्तत्वस्नानादीनामेतैरेवविधानेनतत्सूत्राप्राप्तेः।राहूपरागादीनान्निर्ज्ञातदेशकालत्वाभावाच्चेति

मे॰ अर्हाणाम्॰ भाष्ये यद्यप्यत्र कारकार्हाणाञ्च कारकत्वे कारकार्हाणाञ्च कारकत्वे सप्तमी। अकारकार्हाणाञ्चाकारके सप्तमी वक्तव्या। ऋद्धे
षु भुञ्जानेषु दरिद्रा आसते ब्राह्मणेषु तरत्सु वृषला आसते। तद्विपर्यासे च सप्तमी वक्तव्या। ऋद्धेषु आसीनेषु मूर्खा भुञ्जते ब्राह्मणेष्वासनेषु वृष
लास्तरन्तीत्युक्तम्॰ कारकशब्दोऽत्र भावप्रधानः। कारकत्वमर्हन्तीति कारकार्हा इत्यर्थः। तथापि प्रत्यासत्त्या अर्हणाकारकत्वस्यैव लभ्यत इत्या

अर्हाणाम्॰ कर्तृत्वार्हाणाम्॰ तद्वैपरीत्ये ऽर्हाणामकर्तृत्वेऽनर्हाणाञ्च कर्तृत्व इत्यर्थः। वाक्यचतुष्टयमेतत्। कर्तृपरसम
र्पकादकर्तृसमर्पकाच्च सप्तमीत्यर्थः। सप्तम्याश्चान्तरेणापि क्रियावाचकाद्धातोः प्रथमासामानाधिकरण्याच्छतृशानचा
वेव लक्ष्यलक्षणभावाविवक्षार्थमिदम्॰ सत्स्विति॰ सन्तो हितरणक्रियाकर्तृत्वार्हाः तरणक्रियाकर्तृसत्सम्बन्धि ब्र
सत्कर्तृकमासनमिति बोधः। स्वक्रियाधिकरणकालवृत्तित्वं सम्बन्धः। असत्स्विति॰ तरणक्रियाकर्तृत्वानर्हाणां त
दकर्तृत्वमत्र॰ यद्यपि स्थितिक्रियाकर्तृत्वार्हत्वेनेदं सिद्धम्॰ तथाप्यसतां तरणक्रियानर्हत्वादिकमपि बोधविषय इति
भावः। सत्स्विति॰ तरणक्रिया असत्स्विति॰ तरणक्रियाकर्तृत्वानर्हाणां तत्कर्तृत्वमत्र अर्हाणां तदकर्तृत्वमत्र कर्तृत्वा॰ षष्ठी
चा॰ अनादर इति विषयसप्तमी यस्य च भावेनेत्याद्यनुवर्तते अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः
सप्तमीषष्ठ्यौ विस्यर्थः। फलितमाह॰ अनादराधिक्य इति॰॥ ॥ ९९ प्रायेन कारकशब्दः परित्यक्तः। अत्रार्हत्वमनर्हत्वं वान
भिन्नक्रियामादाय किन्त्वेकक्रियामादायैव। अन्यथा सर्वेषामेव यत्किञ्चित्क्रियाकर्तृत्वार्हतयाऽनर्हाणामप्रसिद्धिः स्यात्। अर्हाणा॰
मिति वचनस्य फलान्तरमप्याह॰ यद्यपीत्यादि॰ षष्ठी चानादर इति सूत्रे यस्य च भावेनेत्याद्यनुवृत्तौ यादृशो वाक्यार्थस्तमाह॰ अनादरे गम्यमान

श॰ शे॰ भै॰ षष्ठीतात्पर्येति इदमुपलक्षणम् सप्तम्यपितत्वेनात्पर्यग्राहिका । वैशिष्ट्यञ्च समानकर्तृकत्वस्योत्तरकालिकत्वोभयसम्बन्धेन पर्याय
टी॰ भै॰ न्तरेति प्रभ्वादेरित्यर्थः । समुदायविशेषणत्वेऽर्थासङ्गतिपरिहारायाह गवादिकञ्चेति गवाङ्गेषु वादायादइत्यत्रेत्यादि । स्वामिपर्याय इति अ
७५२ स्यात्रेत्यादि । एतेन पृथिव्यादायादो राजेति प्रयोगापत्तिनिरासः । नन्वासेवापदादक्षरमर्यादयातात्पर्यस्य न लाभ इत्यत आह आसेवापदस्येति तदेक
परता । तन्मात्रसाध्यकप्रवृत्तिमत्त्वम् । अधिकरणत्वविवक्षयेति वैषयिकाधारत्वविवक्षयेत्यर्थः । अत्र आयुक्तशब्दमोगोवचनमिति षष्ठ्य
लक्ष्यलक्षणभावः षष्ठ्यर्थः । अनादरविशिष्टप्रव्रजनन्धात्वर्थः । तत्र षष्ठीतात्पर्यग्राहिकाऽनादरश्च प्रत्यासत्त्या
पुत्रादिविषयक एवेति भावः । स्वामीश्वरा शब्दपरत्वाद्विरूपाणामपीति नैकशेषः । पर्यायान्तरसङ्ग्रहाय स्वाम्यर्थे
तिनोक्तम् दीयत इति व्युत्पत्त्या दीयमानांशरूपं दायमादत्ते इति सोपसर्गोऽस्मादन्तादत एव निपातनात्कः । गवादिक
न्दीयमानेऽन्वेति नित्यसाकाङ्क्षत्वादावृत्तिः । दायादशब्दः स्वामिपर्याय इत्यन्ये षष्ठ्यामेवेति शेषे षष्ठीत्यनेनेति भा
वः । तात्पर्ये इति आसेवापदस्य न त्वरूढेरिति भावः । तात्पर्यञ्च तदेकव्यापारता । आयुक्तयोगेऽधिकरणत्वविव
क्षायां सप्तमी प्राप्तौ सम्बन्धविवक्षायामत्र कुशलयोगे च षष्ठी प्राप्तौ वचनम् ॥ ९९ र्थे सप्तम्यर्थे च वचनमित्यर्थः । यत
श्च निर्धारणमिति सूत्रात् यथाश्रुतात् यस्मात्समुदायान्निर्धारणं पृथक्करणं तादृशसमुदायघटकावृत्तिधर्मवत्त्वबोधनं यत्र तत्र तादृशस
मुदायवाचकप्रातिपदिकात् षष्ठीसप्तम्याविस्यर्थः प्रतीयते परन्त्वयमयुक्तः । नराणां क्षत्रियः शूर इत्यत्र नृशब्दस्य समुदायवाचकत्वाभावादनुप
पत्तिरतः सूत्रार्थ उक्तो मूला जातिगुणक्रियासञ्ज्ञादिभिरिति

भे॰ वस्तुतस्तु क्रिययोर्ज्ञाप्यज्ञापकभावः। सूत्रप्रवृत्त्यापदस्य साधुतायामुपयुज्यते। सप्तम्यास्तु ज्ञापकत्वेनाभिप्रेता क्रियैवार्थः। तस्याश्च समानकालिकत्वं ज्ञाप्यक्रियायां सम्बन्धो गोषु दुह्यमानासु गत इत्यादौ वर्त्तमानार्थकक्तसमभिव्याहारात्। एवञ्च दुह्यमानगोवृत्तिदोहनसमानकालिकगमनकर्त्तेति शाब्दबोधः। यत्र भविष्यदर्थकक्तसमभिव्याहारस्तत्र गोषु धोक्ष्यमाणास्वित्यादौ सप्तम्यर्थदोहनक्रियायाः प्राक्कालिकत्वसम्बन्धेन ज्ञाप्यगमनक्रियायामन्वयः। यत्र तु भूतार्थकः क्तस्तत्र गोषु दुग्धास्वित्यादौ सप्तम्यर्थदोहनक्रियाया उत्तरकालिकत्वसम्बन्धेन गमनक्रियायामन्वय इत्यूह्यम्। अस्मिन्पक्षे च ज्ञाप्यज्ञापकभावस्य शाब्दबोधाविषयत्वेन लक्ष्यलक्षणभावः शाब्दबोध्य एवेति लक्षणप्रवृत्तौ निमित्तमित्युत्तरग्रन्थासङ्गतिरिति न वाच्यम्। तस्य पूर्वोक्तपक्षाभिप्रायकत्वात्। द्वितीयपक्षे तु वस्तुतः क्रियाद्वयनिष्ठ इत्यर्थः कार्यः। न तु लक्ष्यल

इदञ्च यत्र मानान्तरेण ज्ञातस्वरूपस्यार्थस्य कालविशेषादिज्ञानार्थं शब्दप्रयोगस्तत्रैव प्रवर्त्तते भाष्यस्वरसात्॥

क्षणभावो यत्र भूयः सहचारदर्शनं तत्र युक्तः। यथा वह्निधूमयोः। प्रकृते तु गमनक्रियासकृदेव जातेति कथं त्रैकालिकसम्बन्धघटितो ज्ञाप्यज्ञापकभाव इत्यत आह। लक्ष्यलक्षणभाव इति। मानान्तरम्। ज्ञानान्तरम्। अन्यथा। भूयः सहचारदर्शनसहकारेण यत्र ज्ञाप्यज्ञापकभावप्रतीतिस्तत्रैवेति सूत्रप्रवृत्तिस्वीकारे। मानान्तरेण। प्रमाणान्तरेण। ज्ञातस्वरूपस्यार्थस्य। ज्ञातं स्वरूपं यस्य तादृशस्यार्थस्य क्रियाद्वयस्य। यथा गोदोहनं मनोजन्यस्मृतिविषयः। पुरुषविशेषगमनं तु तद्देशाधिकरणस्थितिकर्तृत्वाभावेनानुमितम्॥ भाष्यस्वरसादिति।

श॰शे॰भै॰ एवञ्च जात्यादिविशिष्टस्य यद्धर्मावच्छिन्नस्य तादृशजात्यादिशून्यतद्धर्मावच्छिन्नावृत्तिविधेयवत्त्वबोधनं यत्र तत्र तद्धर्मावच्छिन्नवाचका-
टी॰भै॰ प्रातिपदिकात्षष्ठीसप्तम्यौ भवत इति सूत्रार्थः पर्यवसन्नः। यथा क्षत्रियत्वविशिष्टस्य नरत्वावच्छिन्नस्य क्षत्रियत्वशून्यनरत्वावच्छिन्ननरा
३४१३ णावृत्तिशूरत्ववत्त्वबोधनन्नराणां क्षत्रियः शूर इत्यत्रास्तीति भवति न शब्दादिभक्तिः। यत इत्यस्याभावे यस्य जातिविशिष्टस्य तस्य लाभः स्या

यतः किम्॰ यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वबोधनं तत्रैव मा भूत् षष्ठ्यपवादत्ववत् प्रथमापवादत्वस्यापि
सम्भवात्॰ स्वघटितसमुदायावधिकस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारणविषयत्वरूपो
ऽवयवावयविभावरूपश्च सम्बन्धो विभक्त्यर्थः। नृसमुदायावधिकद्विजेतरनरव्यावृत्तश्रेष्ठत्वकरणकपृथक्करणरूप
निर्धारणविषयो नृसमुदायावयवो द्विजः श्रेष्ठ इति बोधः। संसर्गघटककरणञ्च श्रेष्ठत्वादिरूपमेव प्रत्यासत्तेः। अत
एव न निर्धारणे इति सूत्रबोधितन्निर्धारणस्य विभक्त्यर्थत्वं सङ्गच्छते॰ उद्भूतावयवभेदविवक्षया नृणामिति बहुवचनम्
तिरोहितावयवभेदविवक्षया निर्धारणविषये एकवचनन्त्वसाध्विति कौरक इति सूत्रे भाष्ये स्पष्टम्॰ तत्र हि निर्धारणे का-
रकेष्विति न्नृपादिष्वुक्तम्॰ मिश्चोन्यादिस्यादौ नु सौत्रो निर्देश इति न दोषः। हन्तुः समासिकस्य चेयत्र समाससमूहमध्ये इत्य

त्तदा क्षत्रियपदादेव षष्ठी स्यादित्याशयेनाह॰ यतः किमित्यादि। ननु क्षत्रियपदात्प्रथमपरत्वात्स्यादत आह॰ षष्ठ्यपवादत्ववदिति॰ अत एव॰
निरुक्तस्य विभक्त्यर्थत्वादेव॰ नृणामिति बहुवचनोपपत्तये आह॰ उद्भूतावयवेति॰ यद्धर्मावच्छिन्नस्येत्युपादानान्नराणाम्व्याघ्रः शूर इति न
किन्तु नरेभ्यो व्याघ्रः शूर इत्येव। तादृशजात्यादिशून्येत्युपादानाद्विधेयेन याविवक्षितस्य शूरत्वस्य नरत्वावच्छिन्नावृत्तित्वबाधेऽपि न क्षतिः

मे॰ तद्धर्मावच्छिन्नाद्वृत्तित्वम्परित्यज्यतादृशजात्यादिशून्यसामान्यावृत्तित्वनिवेशः॥ ः॥ ननुनिर्द्धारणस्थलेयदेकवचनन्तद्गणिनावा
क्यस्यकागतिरत आह॰ दून्दुइत्यादि॰ पञ्चमीवि॰ अस्मिन्सूत्रेपिअनुवर्त्तमानन्निर्द्धारणपदंवृत्तिधर्मप्रकारकज्ञानविषयीकरणमेव॰ ए
तद्घटकाभावप्रतियोगिवृत्तित्वप्रकृत्यर्थतावच्छेदकावच्छिन्नस्यनिरूपितत्वसम्बन्धेनान्वयोनिर्द्धारणस्यचविशेष्यतासम्बन्धेनभे॰
दाश्रयेविशेषणत्वम्। भेदश्चप्रकृत्यर्थतावच्छेदकानाश्रयत्वमेवात्रपारिभाषिकोविभक्तग्रहणसामर्थ्यान्नत्वन्योन्याभावः। एवञ्चस
तियादृशोवाक्यार्थवोधस्तमाह॰ पाटलिपुत्रकावधिकेति॰ त्रितयोपादानइतिनिरुक्तनिर्द्धारणनिरूपकवाचकस्यतदाश्रयवाचकस्यनि

पञ्चमीति॰ यतश्चनिर्द्धारणमित्यनुवर्त्ततेविभागोऽत्रभेदः। तत्रनिर्द्धारणेसर्वत्रयथाकथञ्चिद्भेदस्यसत्त्वेनविभक्त
ग्रहणसामर्थ्यादत्रभेदएवनतुकेनाप्युपात्तरूपेणाभेदस्तत्रैवप्रवृत्तिरित्यत आह॰ भेदएवेति॰ अत्रपञ्चम्यर्थोनिर्द्धारण
विषयत्वरूपएव॰ पाटलिपुत्रकावधिकनिर्द्धारणविषयामाथुराआढ्यतराइतिवोधः। एवञ्चत्रितयोपादानएवनि
र्द्धारणप्रतीतिरितिपुरुषोत्तमइत्यादौसम्बन्धसामान्येषष्ठी॥ ॥ ((रुक्तनिर्द्धारणप्रयोजकधर्मवाचकस्यचयत्रोपाद

नइतिनिरुक्तनिर्द्धारणनिरूपकवाचकस्यतदाश्रयवाचकस्यनिरुक्तनिर्द्धारणप्रयोजकधर्मवाचकस्यचत्रोपादानंशब्देनोच्चारितेनप्र
तीतिस्तत्रैवतत्सूत्रनिष्पन्नपञ्चम्यन्तस्यसाधुत्वमितिफलितम्। यत्रतुसाङ्काश्यकानाम्पाटलिपुत्रकाणाञ्चपाटलिपुत्रकाअभिरूपतमा
इतिप्रयुज्यते। तत्रनिर्धार्यमाणेषुपाटलिपुत्रकेषुनभेदएवाचशब्दार्थैकवुद्धिविषयत्वरूपसाहित्याश्रयत्वेनाभेदस्यापिसत्त्वात्। सावु
द्धिश्चपूर्वकालिकीसाङ्काश्यकाश्चपाटलिपुत्रकाश्चाभिरूपाइत्याकाराग्रात्येतिनतत्रपञ्चमी। ननुपुरुषोत्तमइत्यत्रपुरुषाणामुत्तमइत्यर्थः

श॰ प्रे॰ मे॰ प्रतीयत एवम्वात्र पूर्वसूत्रेण षष्ठी वा स्यात्तथा च न निर्द्धारणे इति सूत्रेण समासनिषेधापत्तिरत आह॰ सम्बन्धसामान्य इति॰ ॥ ॐ ॥ नत्वा च
टी॰ भै॰ न निर्द्धारणे इति स्वत्रप्राप्तिरिति भावः कैयट इति॰ अत्रारुचिबीजन्तु पुरुषोत्तम इत्यत्र षष्ठीसमासस्तत्वे हितदुक्तरीत्या पुरुषोत्तमपदस्य साधु
५५५ त्वङ्क्त्यनीयम्॰ स एवन्तु न॰ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति वाक्यात्कर्मधारयस्यैव प्रतीतेः॰ न चोत्तमपदस्य पूर्वनिपातापत्तिः
राजदन्तादित्वात्पूर्वनिपातप्रकरणस्यानित्यत्वाद्वा॥ अर्चने श्चेति॰ अर्चते स्त्रित्यर्थः।गणपाठे प्रन्यादिपाठाभावादाह॰ लेख्यण इति॰ न

उत्तमनिरूपितेति समाससिद्धिरिति तरप्सूत्रे कैयटः।साधुनि॰ निपूर्वात्पुणकर्मणि शुभे इत्यत इगुपधलक्षणः।
अर्चते श्चमौवादिकाद्गुरोश्च हल इत्यप्रत्ययः।अर्चा।चौरादिकात्तु ण्यासश्रन्थेति युच् स्यात् षष्ठ्यपवादोऽयम्॰ अ
प्रत्ययादिभिरिति॰ लक्षणेत्थमितिसूत्रोपात्ताः प्रत्यादयः।नस्त्रे च॰ लुपशब्देन लुप्यमन्तया लुप्तप्रत्ययार्थो लक्ष्यते
इति बोध्यम्॰ अधिकरणे किम्॰ अद्यपुष्यः।असत्यान्तरनुवृत्तावन्तरङ्गत्वात्प्रातिपदिकार्थ एव स्यात्॰ मूलेनेति॰ न
स्त्रेण युक्तः कालइत्यणो लुबविशेष इति लुप् नस्त्रे किम् पञ्चालेषु तिष्ठन्ति जनपदे लुबिति लुप्॰ ॥ ॥

च साधुशब्दोपादानमत्र विफलम्।साध्वसाधुप्रयोगे चेत्येव सिद्धत्वादिति वाच्यम्॰ अर्चायाम्प्रत्यादियोगनिषेधार्थमस्योपादानात्
प्रसितोत्सुकाभ्याम्।प्रसितशब्दोत्राशक्तपरो न तु प्रकर्षेण सित इत्यर्थः।तत्परे प्रसितासक्त इति कोशात्।लुपशब्दस्याभावबोधकत
यान स्त्रवाचकस्य तस्मिन्नर्थे न वृत्तिरत आह॰ लुपशब्देनेति॰ अधिकरण इति किमिति॰ मण्डूकप्लुत्याधिकरणशब्दानुवृत्तिः किमर्थे
त्यर्थः।अनुवृत्त्यभावे सर्वविभक्त्यपवादत्वमस्य स्यात् अनिर्दिष्टार्था इति न्यायात्।अन्तरङ्गत्वात्॰ इतरानपेक्षत्वेनान्तरङ्गत्वादित्यर्थः॥

भे॰ एवमपिजात्यादिभिरेवपृथक्करणमितिभ्रान्तिर्भवतीत्यतआह॰ विशिष्टस्येत्यध्याहारइति॰ एवमपिजात्यादिविशिष्टस्यैवयतोनिर्द्धारणमितिभू
पःस्य इतः पूरणेनव्याचष्टे। एकदेशस्येति॰ एतेनतादृशसमुदायवृत्तिधर्माश्रयस्यलाभः। यथानराणाङ्क्षत्रियः शूरइत्यत्रनृसमुदायवृत्तिनरत्वा
श्रयस्यक्षत्रियस्यजातिविशिष्टस्यलाभः। समुदायवृत्तित्वञ्चसमुदायत्वाश्रयवृत्तित्वमेवनतुसमुदायत्वपर्याप्त्यधिकरणपर्याप्तत्वम्॰ क्षत्रियत्व॰
स्यतथात्वासम्भवात्। नहिनृत्वेसमुदायत्वपर्याप्त्यधिकरणेसमुदायपर्याप्तम्। तस्यप्रत्येकपर्याप्तत्वात्। एवञ्चप्रकृतेनृशब्दोनसमुदायबोधाक
स्तादृशसमुदायेवर्त्तमानंयत्समुदायत्वंस्वरूपसम्बन्धेनतादृशसमुदायत्वाश्रयक्षत्रियस्यतादृशसमुदायत्वाश्रयवृत्तिनृत्वावच्छिन्नस्यलाभः। क्ष

यतश्च॰ जातिगुणक्रियासञ्ज्ञाभिरिति॰ विशिष्टस्येत्यध्याहारः। तद्विशिष्टस्यैकदेशस्ययतःस्वघटितसमुदायात्स्वेतरसमुदा
यघटकव्यावृत्तधर्मकरणकमपृथक्करणन्तद्वाचकात्षष्ठीत्यर्थः॥ ॥ (( त्रियपदार्थञ्चात्रैकदेशः। स्वघटितसमुदायात्॥

नृसमुदायात्। स्वेतरसमुदायघटकेतिसचग्रासणादिः। स्वमेकदेशोजात्यादिविशिष्टः। स्वेतरेत्यस्यसमुदायघटकेऽन्वयः। तस्यचव्यावृ
त्तौतादृशसमुदायघटकावृत्तिर्धर्मः शूरत्वन्तत्करणकमपृथक्करणञ्चक्षत्रियस्यशूरत्वाश्रयत्वबोधनमेवेतिनृशब्दात्षष्ठ्युपपत्तिः। यद्य
पितद्धर्माश्रयत्वबोधनस्यतद्धर्मप्रकारकबोधानुकूलव्यापाररूपतयातस्यधर्मस्यकर्मत्वंसम्भवति। तथापितद्धर्मवत्त्वबोधनेतस्यधर्म
स्य करणत्वाविवक्षयैवंलेखः॥

प्र॰शे॰ मै॰यश्चकर्मार्थकाध्यारूढशब्दात्कनिकृतेउत्तरपदलोपेचसिद्धोऽधिकशब्दस्तद्योगेत्वाह॰कर्मणीति॰अधिकमितिसूत्रेणतन्त्रेणोभ
टी॰भै॰ योरप्यधिकशब्दयोर्निपातनादितिभावः।अधिकमितिसूत्रेभाष्येस्पष्टमेतत्।उपशब्दस्यकर्मप्रवचनीयत्वमुपपादयतिउपोधिकइतिप
४५५ रार्द्धेऽधिकेत्यत्रपूर्वोक्तज्ञापकादेवपञ्चमी।मूलेपर्यायेणेति॰यदिपस्यचेश्वरवचनमित्यत्रयच्छब्दःस्ववाचीश्वरशब्दस्तुधर्मिपरएवत
दायस्येश्वरउच्यतेतद्वाचकात्सप्तमीत्यर्थः।यदातुयच्छब्दःस्वामिपरईश्वरईश्वरशब्दश्चभावप्रधानत्वेनेश्वरत्वपरस्तदायस्यस्वामिनई
श्वरत्वमुच्यतेतद्वाचकात्सप्तमीत्यर्थस्वामिवाचकात्सप्तमीत्यर्थः।उभयत्राप्यधिरीश्वरइतिकर्मप्रवचनीयसञ्ज्ञा।इयञ्चसप्तमीवि

कर्मणिक्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिकयोगेतु अधिकोलोकोहरिणेतिप्रथ
मैव॰उपपरार्द्धेइति॰उपोधिकेचेतिकर्मप्रवचनीयत्वम्॰ननुमामुद्दिश्यविनियोक्ष्यत
इत्यर्थादत्रकर्मणिद्वितीयैवेतिकिङ्कर्मप्रवचनीयत्वेनेत्यतआह॰ अगतित्वादिति॰॥

शेषत्ववाचकादेव॰षष्ठ्यपवादत्वात्।विशेष्यवाचकात्तुप्रातिपदिकार्थेप्रथमैव।अधिभुवीत्यस्माद्भूनिरूपितस्वामित्ववानितिबोधः।अ
धिरामेइत्येतस्मात्तुरामनिरूपितस्वत्ववतीभूरितिबोधइतिभावः।अधिशब्दस्यशौण्डादिगणेपाठफलमाह॰सप्तमीशौण्डैरितीति॰यदातु
विभक्त्यर्थेऽव्ययीभावस्तदात्वधिरामम्भूरितिप्रयोगः।ईश्वरेऽर्थइति॰गम्यमानइत्यर्थः।तदुपपादयति॰विनियोक्तुरिति॰ननुमामित्यत्रक
र्मणिद्वितीयेतिसूत्रेणैवद्वितीयाभविष्यतिकिङ्कर्मप्रवचनीयसञ्ज्ञयेत्याशयेनशङ्कतेनन्विति॰अत्रेपि॰यदत्रमामधिकरिष्यतीत्यत्रेत्य

४४भे० उदात्तवत्वमिति॰ विकरणेभ्यो नियमस्य बलवत्त्वेन करिष्यतीत्यत्र तिङि कृते विकरणे च कृते उदात्तवत्त्वमिति भावः। सर्वेष्टसिद्धिरिति॰।
टीभे सर्वेषामिष्टानां निघातवारणकर्मप्रवचनीयसंज्ञाफलोदात्तश्रवणरूपाणामित्यर्थः। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानीति भा॰
४५६ ष्यकारोक्तेर्मङ्गलस्यावश्यकत्वाभिप्रायेणात्र सिद्धिशब्दोपादानम्॰ मूलेऽप्यधिरीश्वर इति सूत्रादीश्वर इत्यतो विभाषा कृञीति सूत्रे ईश्वरश
ब्दोऽनुवर्तते। तस्य ज्ञानेनेश्वरस्मरणरूपमङ्गलं सर्वेषामभवत्वित्यभिप्रायेण प्रकरणान्तःस्थसूत्रस्योपन्यास इति शिवम्॥ ॐ ॥

तिङि चेति॰ उदात्तवति तिङन्ते गतिर्निहन्यत इत्यर्थः। अत्र तिङ्। तिङ इति नि
घातस्य निपातैर्यद्यदीत्यादिना निषेधात् करिष्यतीति तिङन्तस्योदात्तवत्त्वमिति
सर्वेष्टसिद्धिः॥ ॐ ॥ इति विभक्त्यर्थाः॥ ॥ ॥

॥ इति सप्तमी विवरणम्॥ ॐ ॥ इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलप्रसारिविमलतरानवद्यय॰
शःपार्वणपीयूषभानुप्रभवागस्त्यकुलवंशावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकल्पितायां चन्द्रकलापाङ्कुरकालशब्देन्दुशे
खरव्याख्यानं समाप्तम्॥ ॐ ॥ अङ्कर्षिसिद्धीन्दुमिते वत्सरे विजयाह्वये। सम्वत् १९ २३ मी॰ पौषमासि सिते पक्षे तृतीया भौमवासरे॥

॥श्रीशब्देन्दुशेखरटीका भैरवी औ महाशिवभट्टीसंयुक्त समाप्तम्० शुभमस्तु०॥

भे॰ द्विवचनान्तेन समास इति॰ अन्यथा सूत्रस्यैवैतस्यानुपपत्तिः स्यादिति भावः। अभेदैकत्वसङ्ख्यायावृत्तेर्भानानुरोधेनाह॰ बोधस्त्विति॰ कारकस्य द्रव्यरूपतया तन्मध्यत्वमनुपपन्नमित्यभिप्रायेणाह॰ ननु कर्त्रृरूपस्येति॰ शक्तिरेव कारकमिति॰ अत्र कारकपदेन विवक्षितेत्यर्थः धर्मधर्मिणोरभेदादिति भावः। क्रियाभेदेन॰ भिन्नभिन्नकालोत्पन्नक्रियाभेदेन॰ तदाधारकालग्रहणादिति॰ लक्षणया शक्त्याधारकालग्र

सप्तमीपञ्चम्यौ॰ कालाध्वनोरित्यतस्तदनुवर्तते तच्च पञ्चम्या विपरिणम्यते मध्यस्यावधिद्वयसापेक्षतया द्विवचनान्तेन समासः। बोधस्तु शक्तित्वेन शक्तिद्वयस्य न तु द्वित्वेनेति बोध्यम्॰ ननु कर्त्तृरूपस्य कारकस्यैक^
त्वाद्भेदनिबन्धनमध्यव्यपदेशासम्भवोऽत आह॰ शक्तिद्वयमध्ये याविति॰ कर्तृत्वादिशक्तिरेव कारकं। सा च क्रियाभेदेन भिन्नेति भावः। यद्यप्यवध्यवधिमतोस्साजात्यनियमान्न कालाध्वानौ कारकमध्ये सम्भवतस्तथापि श
क्तिशब्देन तदाधारकालादिग्रहणान्न दोषः। षष्ठ्यपवादोयम्। स्वानन्तरकालवृत्तित्वादिकं विभक्त्यर्थः। शक्तिद्वय
मध्यवर्त्तित्वं तु वस्तुसन्निमित्तम्॰ अधिकशब्देनेति॰ कर्तरि क्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिकशब्दयोगे लोकश
ब्दात्षष्ठ्याम्प्राप्तायां ज्ञापकादिमे इष्येते इत्यर्थः। तदस्मिन्नधिकमिति सूत्रे भाष्येतु उपश्लिष्टपदाध्याहारेणोपश्लेषवि

हणादित्यर्थः। अत्र कालाध्वनोर्विभक्त्योश्च न यथासङ्ख्यमस्वरितत्वात्॰ कर्तरि क्तप्रत्ययान्तेति॰ अधिकमिति सूत्रेण कर्तरि क्त प्रत्ययेक
नि उत्तरपदलोपे च सिद्धोयस्तेन योग इत्यर्थः। षष्ठ्यामिति॰ निरूपितत्वार्थकषष्ठ्यामित्यर्थः। ज्ञापकादिति॰ उक्तसूत्रद्वयनिर्देशरूपकादि
त्यर्थः। ननु सप्तम्यधिकरणे चेति सूत्रेण सप्तमी क्रियायोगाभावादिति भावः। इदमनध्याहारपक्षेऽध्याहरत्वधिकरणसप्तम्येवेत्याह॰ नर